Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथद्वादशकोशानांसंग्रह


तत्रादौमेदिनी१ · · · · ततएकाक्षरी २ · · ·

द्वौद्विरूपौ ४ · · · · · ततस्त्रिकाण्डशेषः ५

अनेकार्थध्वनिमंजरी६ हारावली७ · · · ·

धनञ्जयः ८ · · · · वररुचिकोशः ९ · ·

नाममालाकोशः १० · मातृकाकोशः ११ · ·

अव्ययकोशः
१२


॥वाराणसीप्रसादस्यनियोगेनतुयत्नतः॥का
शीसंस्कृतमुद्रायामङ्कितोयंविचक्षणैः॥ १ ॥


श्रीकाशीजीमे
॥ज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजी
केपासश्री ३ पुतमहाराजशिवलालदुबेजीके
मकानमेछपी
॥जिसकोलेनाहोयउन्होनेइसछापेखानेकेकार्य
सम्पादकबाबूवाराणसीप्रसादयाकचौरीगली
मेभाईप्रतापसिंहजीकेदुकानपरमिलेगी
संवत् १९२९

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥अथमेदिनीकोशःप्रारम्भः॥

## ॥श्रीगणेशायनमः॥

॥श्रीगणेशायनमः वृषांकायनमस्तस्मैयस्यमौलिविलंबिनी ।
जटावेष्टनजांशोभांविभावयतिजान्हवी १ पूर्वाचार्यकृतीर्वी
क्ष्यशब्दशास्त्रंनिरूप्यच नानार्थशब्दकोशोयंलिंगभेदेनक
थ्यते २ प्रायशोरूपभेदेनविशेषणवशात्क्वचित् स्त्रीपुन्नपुं
सकंज्ञेयंविशेषोक्तेश्चकुत्रचित् ३ त्रिलिङ्गयांत्रिष्विितिपदंमिथु
नेतुद्वयोरिति निषिद्धलिंगशेषार्थत्वंताथादिनपूर्वभाक् ४ रूपा
द्यक्तंलिङ्गमुक्तंलिपिभ्रांतिच्छिदेक्वचित् विशेष्यनिघ्नेऽनुक्तेऽ
पिविज्ञेयावाच्यलिंगता ५ गुणेशुक्लादिकद्वाद्याःपुंसिस्युस्त
द्वतित्रिषु तीक्ष्णाद्याश्चगुणेक्लीबंगुणिलिंगास्तुतद्वति ६ क्लीब
पुंसोरपिस्त्रीत्वंक्वाप्यल्पत्वविवक्षया जातिवाचकशब्दानामपि
तत्क्लीविवक्षया ७ उद्भिदःप्रसवेक्लीबेहरीतक्यादयःस्त्रियां
पुष्पेजातीप्रभृतयःस्वलिङ्गाव्रीहयःफले ८ प्राङ्नानार्थोन्नत
ल्लिंगद्वयोर्द्वंद्वेनचैकता शब्दावृत्तिर्नलिंगैक्येसप्तमीनविशेष
णे ९ क्लीबेनपुंसकेपुंसिस्त्रियांयोषितिचद्वयोः त्रिषुचेत्यादि
यद्रूपंतल्लिंगस्यैववाचकम् १० नानार्थःप्रथमांतोऽत्रसर्वत्रा
त्रैप्रदर्शितः सप्तम्यंताभिधेयेषुवर्तमानोविनिश्चितः ११ एक
द्वित्रिचतुःपंचषड्वर्णानुक्रमात्कृतः स्वरकाद्यादिकाद्यांतवर्गै

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नानार्थसंग्रहः १२ नानार्थकोशपुस्तकभाराजेनदुःखहानये
कृतिनः मेदिनिकरकृतकोशोविशुद्धलिंगोऽभिलिख्यतामकः ।
१३ **कंकम्कोब्रह्मणिसमीरात्मयमदक्षेषुभास्करेकामग्रंथौ**
चक्रिणिचपतत्रिपार्थिवेतथा १४ मयूरेऽग्नौनपुंसिस्यात्सुख
शीर्षजलेषुकम्॥ **कद्विः अर्को**ऽर्कपर्णेस्फटिकेरवौताम्रे
दिवस्पतौ १५ **अंको**रूपकभेदांऽगचिन्हरेखाजिभूषणे रूपका
शांतिकोत्संगस्थानेऽकंपापदुःखयोः १६ **एकं**संख्यांतरेश्रेष्ठ
केवलेतरयोस्त्रिषु **कर्कः**कर्केनिलेवह्नौशुक्लाश्वेदर्पणेघटे ॥
१७ **कंकः** स्त्रद्म द्विजेरव्यातौलोहपृष्ठकृतांतयोः **कल्को**ऽ
स्त्रीघृततैलादिशेषेदंभेविभीतके १८ विट्किट्टयोश्चपापेचत्रिषु
पापाशयेपुनः **काकः** स्याद्वायसेरक्षप्रभेदेपीठसर्पिणि १९ ।
शिरोऽवक्षालनेमानप्रभेदद्वीपभेदयोः **काका** स्यात्काकनासायां
काकोलीकाकजंघयोः २० रक्तिकायांमलप्वांचकाकमाच्यांच
योषिति **काकं** सुरतबंधेस्यात्काकानामपिसंहतौ २१ **कि
ष्कु** र्ईयोर्वितस्तौचप्रकोष्ठेऽपिकरेऽपिच **कोकः** श्वकेरके‍ज्ये ।
ष्ठ्यांखर्जूरीद्रुमदर्दुरे २२ **छेको** गृहाश्रितमृगपक्षिणोर्नागरेत्रि
षु **टंको** नीलकपित्थेचखनित्रेटंकनेस्त्रियां २३ जंघायांस्त्री
पुमान्कोपेकोशासिग्रावदारणे **तर्कः** कांक्षावितर्कोहेतुशास्त्रे
पुकथ्यते २४ **त्रिका** कूपस्यनेमौस्यात् **त्रिकं** पृष्ठाधरेत्रये ।
**तोकं** पुत्रेसुतायांचद्विकःस्यात्काककोकयोः **न्यंकु** र्मुनौमृ
गेपुंसि **नाकः**स्तुत्रिदिवेंबरे २५ **नाकु** र्मुन्यंतरेपृथ्वीधरव ।
ल्मीकयोः पुमान् **निष्क** मस्त्रीसाष्टहेमशतेदीनारकर्षयोः ।
२६ वक्षोलंकरणेहेमपात्रेहैमपलेऽपिच २७ **पंको** स्त्रीक
र्दमेपापे **पाकः** परिणतौशिशौ केशस्यजरसाशौक्ल्येस्यात्स्याद्दो
पचनेपिच २८ **बक** स्तुबकपुष्पेस्यात्कुहुश्रीदेचरक्षसि ।
**भूके** छिद्रेचकालेच **भेको** मंडूकमेघयोः २९ **मुष्को** ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोसकरक्षेस्यात्संहतेदूषणेऽपिच मूकस्त्ववाचिनादैत्यरेकः
कृपणमंदयोः ३० राका तदंतरेकच्छुनकन्यातरुज स्त्रियाम
संपूर्णेंदुतिथौ रेकः शंकानीचविरेचने ३१ रोकस्तुक्रय॰
भिद्दीत्यो रोकं नाविचलेबिले लंका रक्षःपुरीशाखाशाकि
नीकुलटासुच ३२ लोको जनेपिभुवने वल्कं वल्कलश॰
ल्कयोः वंकः पर्याणभागेनानदीपात्रेचभंगुरे ३३ शल्कं
तुशकलेवल्के शको जात्यंतरेनृपे शंकुः संख्याऽस्त्रयादो॰
भित्कीलाशकलुषेषुना ३४ शंका त्रासेवितर्केच शाकोद्दी
पांतरेऽपिच शक्तौद्रुमविशेषेच पुमान्हरितकेऽस्त्रियां ३५ शु
को व्याससुतेकीरेरावणस्यचमंत्रिणि शिरीषपादपेपुंसिग्रंथि
पर्णेनपुंसकम् ३६ शुल्कं घट्टादिदेयेस्याद्वराद्यर्थग्रहेस्त्रियां॰
शूका स्त्रीभुंगदलयोः श्लोकः पद्येयशस्यपि ३७ शौकंस्तु
कगणेस्त्रीणांकरणे सूक इत्यपि बाणवातोत्पले स्तोक स्त्रि
ष्वल्पेचातकेपुमान् ३८ कत्रिः अशोक स्त्रिषुनिःशोके
पुंसिकंकेल्लिपादपे स्त्रियांतुकटुरोहिण्यांपारदेस्यान्नपुंसकम्
३९ अलका कुबेरपुर्यामस्त्रियांचूर्णकुंतले अभीकः॰
कामुकेक्रूरेनिर्भयेत्रिषुनाकवौ ४० अनीको स्त्रीरणेसैन्ये
प्यणुको निपुणाऽल्पयोः अलीकमप्रियेऽपिस्याद्दिव्यसत्येन
पुंसकं ४१ अनूकं तुकुलेशीलेपुंसिस्याद्गतजन्मनि अंशुकं
श्लक्ष्णवस्त्रेस्याद्वस्त्रमात्रोत्तरीययोः ४२ अंतिकं निकटे॰
वाच्यलिंगंस्त्रीशातलौषधौ चुल्यांज्येष्ठभगिन्यांचनाट्योक्त्या॰
कथ्यतेंऽतिका ४३ अलर्कौ धवलाऽर्कैस्याद्योगोन्मादितकु
कुटे अंबिका पार्वतीमात्रोर्धृतराष्ट्रस्यमातरि ४४ अंधिका
द्यूतभेदेचरजन्यामपियोषिति अम्लिका तिंतिडीचाम्लोद्गार
चांगेरिकासुच ४५ अर्भकः कथितोबालेमूर्खेपिचकृशेपिच॰
आनकः पटहेभेर्यांमृदंगेध्वनदंबुदे ४६ आढकी तुतुवर्यां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रीपरिमाणांऽतरे त्रिषु **आलोक**स्तु पुमान्द्योते दर्शने बंदिभाष
णे ४७ **आह्निकं** दिननिर्वर्त्ये त्रिलिंगमथ नद्वयोः नित्यक्रिया
भोजनयोर्ग्रंथप्रकरणस्य च ४८ **आतंको** रोगसंतापशंकासु
मुरजध्वनौ **इक्ष्वाकुः** कटुतुंब्यां स्त्री सूर्यवंशनृपे पुमान् ४९
**उलूकः** पुंसि काकारातिद्वे भारतयोधिनि **उदर्क** एष्यत्काली
नफले मदनकंटके ५० **उत्सुक**स्तु निरोधे स्यादातुरेष्टिप्रकारिणि
**उष्ट्रिका** मृत्तिकाभांडभेदेपि करभस्त्रियाम् ५१ **ऊर्मिका**चांगुलीये
स्याद्धस्त्रभंगतरंगयोः **कनकं** हेम्नि पुंसि स्यात्किंशुके नागकेसरे ५२
धत्तूरे कांचनारे च कालीयेन्वंपके ऽपि च **करक**स्तु पुमान्पक्षिवि
शेषे दाडिमेपि च ५३ द्वयोर्मेघोपले न स्त्री करके च कमंडलौ **क्र**
**मुक**स्तु पुमान्भद्रमुस्तके ब्रह्मदारुणि ५४ फले कार्पासिकाया
श्च पट्टिकालोध्रपूगयोः **कटको** स्त्री नितंबाद्रेर्दंतिनां दंतमंडने
५५ सामुद्रलवणे राजधानीवलययोरपि **कटुका** कटुरोहिण्यां
स्त्रियां व्योषे नपुंसके ५६ **कंटको** न स्त्रियां क्षुद्रशत्रौ मत्स्यादि
कीकसे नैयोगिकादिदोषोक्तौ स्याद्रोमांचद्रुमांगयोः ५७ **करं**
**को** मस्तके ऽस्थ्नि नालिकेरफलास्थनि **कलंकों**ऽके ऽपवादे च
कालायसमले ऽपि च ५८ **कर्णिका** करिहस्ताग्रे करमध्यांगुलावपि
क्रमुकादिच्छटाशेब्ज वराटे कर्णभूषणे ५९ **कणिका** कथ्यते ऽत्यं
तसूक्ष्मवस्त्वग्निमंथयोः **कचाकु**स्तु दुराधर्षे दुःशीले च बिले
शये ६० **कंचुको** वारबाणे स्यान्निर्मोके करभेपि च वर्धा
पकगृहीतांगस्थितवस्त्रे च चोलके ६१ कंचुक्योषधिभेदे ऽथ
**कारिका** नटयोषिति कृतौ विवरणश्लोके शिल्पयातनयो
रपि ६२ नपुंसकं तु कर्मादौ कारकं कर्तरि त्रिषु **कामुकः** कम
ने ऽशोकपादपे चा ऽतिमुक्तके ६३ **कामुकं** धनुषि स्यान्नावे
णौ कर्मक्षमे ऽन्यवत् **काचूकः** कृकवाकौ स्यात्पीनमस्तके
कोकयोः ६४ **क्षारकः** पक्षिमत्स्यादिपिटके जालके ऽपि च ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालिका चंडिकाभेदे कात्स्न्ये रश्मिकपत्रयोः ६५ क्रमदेयवस्तुमूल्ये धूसरीनवमेघयोः पटोलशाखारोमालीमांसीकाकाशिवासु च ६६ मेघावलौ च किंपाको महाकालफलाज्ञयोः कीचको दैत्यभिद्वातहतसस्वनवंशयोः ६७ कीटकः कृमिजातौ नानिष्ठुरे पुनरन्यवत् कुलकं तु पटोले स्यात्स्तवके श्लोकसंहतौ ६८ पुंसि वल्मीककाकेंदुकुलश्रेष्ठेषु कथ्यते क्षुल्लकस्त्रिषु नीचेऽल्पे कुशिको मुनिसर्जयोः ६९ कुषाकुः कपिवन्ह्यर्केनापरोत्तापिनि त्रिषु कुलिको नागभेदे स्याद्द्रुभेदे कुलसत्तमे ७० क्षुरकः कोकिलाक्षे स्याद्गोक्षुरे तिलकद्रुमे कूपको गुणवृक्षे स्यात्तैलपात्रे ककुंदरे ७१ उदपानेऽच्युतायां तु कूपिका ऽभोगतोपले कूलकं न स्त्रियां स्तूपे पुंसि स्यात्कृमिपर्वते ७२ कूर्चिका सूचिकायां च तूलिकायां च कुड्मले कपाटाकुडके क्षीरविकृतावपि योषिति ७३ कृषकः पुंसि फाले स्यात्कर्षके त्वभिधेयवत् कोरकोऽस्त्री कुड्मले स्यात्कक्कोलकमृणालयोः ७४ कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः तथा परंपरायातमंगले च कुतूहले ७५ विवाहसूत्रगीतादिभोगयोरपि नह्वयोः कौशिको नकुले व्यालग्राहे गुग्गुलुशुक्रयोः ७६ कोषज्ञोलूकयोश्च स्याद्विश्वामित्रमुनावपि कौषिकी चंडिकायां च नदीभेदे च योषिति ७७ खनको नींदुरौ संधिचौरे त्रिष्ववदारके खड्गिको महिषीक्षीरफेनशौनिकयोरपि ७८ स्यात्खोलकस्तु पाके शिरस्त्रवल्मीकपूगकोशेषु गणिकायूथीवेश्याभीतकारीषु नातुदेवहे ७९ ग्रंथिकं पिप्पलीमूले गुग्गुलुग्रंथिपर्णयोः करीरपुंसि दैवज्ञे सहदेवाख्यपांडवे ८० गंडकः पुंसि खड्गे स्यात्संख्याविद्याप्रभेदयोः अवच्छेदेऽन्तराये च गंडकी सरिदंतरे ८१ ग्राहको घातिविहगे धान्यानां च गृहीतरि गांधिको लेखकेऽपि स्यात्सुगं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धिष्ण्यवह्निरिणि ८२ गुंडकोमलनेधूलौकलोक्तिस्नेहपात्र
योः गृह्यकोनिघ्नकेछेकेगैरिकंधातुरुक्मयोः ८३ गोल
कोविधवापुत्रेजारात्स्यान्नालिकेगुडे गोरंकुःस्यात्पुमा
न्पक्षिभेदलग्नकबंदिनोः ८४ चषकोऽस्त्रीसुरापात्रेमधु
मद्यप्रभेदयोः चुलकःप्रसृतौभांडभेदेचुलुकवत्पुमान्
८५ चतुष्कीमसकहर्म्यपुष्करिण्यंतरेपिच चारकःपा
लकेऽश्वादेःस्यात्संचालकबंधयोः ८६ चित्रकेतिलके
नातुव्याघ्रभिच्चंचुपादिषु चुंबकश्चुंबनपरेधूर्तायस्कांतयो
रपि ८७ बहुग्रंथैकदेशज्ञेघटस्योद्ध्वावलंबने चुल्लकी
शिशुमारेऽपिकुंडीभेदेकुलांतरे ८८ चूलिकानाटकस्यां
गेकर्णमूलेचहस्तिनां चूतकःकूपकेव्याम्रजनकःपितृभू
भुजोः ८९ जंबूकःफेरवेनीचेपश्चिमाशापतावपि जतु
का जिनपत्र्यायांजतुकंहिंगुलास्सयोः ९० जाहकोगो
घमार्जाररवट्वांकारुंडिकासुच जालकंकोरकेदंभेकुला
यानाययोरपि ९१ नपुंसिमोचकफलेस्त्रियांतुवसनांतरे गि
रिसारजलौकायामपिस्याद्विधवास्त्रियां ९२ भटानामश्म
रचितांऽगरक्षिण्यांचजालिका जालिकोवाच्यवद्ग्रामजा
लिजालोपजीविनोः ९३ जीवकःप्राणकेपीतशालरुप
णयोरपि कूर्चशीर्षेपिपुंसिस्यादाजीवेजीविकामता ९४
त्रिषुसेविनिवृध्याजीविनोराहितुंडिके झल्लिकोद्वर्तनपटे
स्त्रियांद्योतेचझिल्लिका ९५ आतपस्यरुचौझिंटयांटुंटुकः
शोणकाल्पयोः डिंबिकाजलबिंबेस्यान्मोणकेकामुकेस्त्रि
यां ९६ तंडकःखंजनेफेनेसमासप्रायवाचिच गृहदा
रुतरुस्कंधमायाबहुलकेष्वपि ९७ तक्षकस्तुपुमान्नाग
राजभेदेचवर्द्धकौ तारकोदैत्यभित्कर्णधारयोर्नद्वयोर्दृशि
९८ कनीनिकायामृक्षेचनपुंसस्यात्तरिस्त्रिषु तिलकोद्रु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मरोगाश्वभेदेचतिलकालके ९९ क्लीबेमौवर्चलक्लोम्नोनेत्रि
यांतुविशेषके त्रिशंकुर्नाराजभेदेशलभेरषदंशके १०० ।
तुरुष्कःसिल्हकेम्लेछेजातौदेशांतरेऽपिच तूलिकाकू
र्चिकायांचशय्योपकरणेऽपिच १०१ दर्शकःस्यात्प्रतीहारे
दर्शयितृप्रवीणयोः दारकोबालकेऽपिस्याद्भेदकेत्वभिधेय
वत् १०२ द्रावकोग्रावभेदेस्याद्विदग्धेमोषकेऽपिच दीप
केवागलंकारेवाच्यवद्दीप्तिकारके ३ दीप्यकश्चाजमो
दायांयवानीवर्हिचूडयोः दुच्छुकोगंधकुट्यांस्याद्विदा
राद्यवकाशके ४ दूषिकातूलिकायांचमलेस्याल्लोचनस्य
स्यच धनिकासाधुनार्योनाधान्याकेत्रिसाधुधनिनोश्च ५
स्याद्धेनुकाकरिण्यांधेनावपिनातुदानवविशेषे धैनुकंक
रणेस्त्रीणांधेनूनामपिसंहतौ ६ नर्तकःकेवलेपोटगलचा
रणयोर्नटे नर्तकीलासिकायांचकरेण्वामपियोषिति ७ न
ग्निकापिकुमार्यास्यात्पुमान्क्षपणवंदिनोः नरकःपुंसिनि
रयदेवारातिप्रभेदयोः ८ नंदकोहरिखड्गेचहर्षकेकुलपा
लके नालीकःशरशल्यांगेष्वब्जखंडेनपुंसके ९ नायः
कोनेतरिश्रेष्ठेहारमध्यमणावपि निर्मोकोमोचनेव्योम्निस
न्नाहेसर्पकंचुके १० नीलिकानीलिनीक्षुद्ररोगशेफालि
कासुच पराकस्तुव्रतेखड्गेप्रसेकःसेचनेच्युतौ ११ प्र
तीकोऽवयवेऽपिस्यात्प्रतिकूलविलोमयोः॥ पद्मकंस्या
त्पद्मकाष्ठबिंदुजालकयोरपि १२ पक्षकस्तुपुमान्पार्श्वद्वा
रेचपार्श्वमात्रके पल्यंकोमंचपर्यंकेवृषीपर्यस्तिकासुच
१३ पताकावैजयंत्यांचसौभाग्यनाटकांगयोः पातुकः
पतयालौस्यात्प्रपातजलहस्तिनोः १४ प्राणकःसत्वजा
तीयेजीवकद्रुमचोलयोः पाटकःस्यान्महाकिष्कौकटका
तरवाद्ययोः १५ अक्षादिचोलनेमूलद्रव्यापचयरोधसोः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पालंकः शल्लकीशाकभेदयोः साजिपक्षिणि १६ पावको
ऽग्नौसदाचारेवन्हिमंथेचचित्रके भल्लातकेविडंगेऽथप्रिय
कः पीतशालके १७ नीपेचित्रमृगेचालौप्रियंगौकुंकुमेऽपि
च पिण्याकोऽस्त्रीतिलकल्केहिंगुवाल्हीकसिल्हके १८
पिनाकोऽस्त्रीरुद्रचापेपांशुवर्षत्रिशूलयोः पिटकस्त्रिषु
विस्फोटेमंजूषायांपुनःपुमान् १९ पिष्टकोघृतपूपादौनेत्र
रोगांतरेऽपिच पुलकः कृमिप्रभेदेप्रस्तरभेदेचमणिदोषे २०
रोमांचेहरितालेगजान्नपिंडेचगंधर्वे पुलाकस्तुच्छधान्येऽ
स्यात्संक्षेपेभक्तसिक्थके २१ पुष्पकंरीतिपुष्पेचविमानेध
नदस्यच नेत्ररोगेतथारत्नकंकणेचरसांजने २२ लोहको
स्यमृदंगारशाकट्यांचनपुंसकं स्यात्पुत्रिकापुत्तलिका
दुहित्रोर्यावतूलके २३ नापुत्रेसरभेधूर्तेशैलरत्नप्रभेदयोः
पूर्णकः स्वर्णचूडेस्यान्नासाछिन्न्यांतुपूर्णिका २४ पृदाकु
र्वृश्चिकेव्याघ्रसर्पचित्रकयोःपुमान् पृथुकः पुंसिचिपिटशि
शोस्यादभिधेयवत् २५ पेचकोगजलांगूलमूलोपांतेच
कौशिके पेटकंपुस्तकादीनांमंजूषायांकदंबके २६ वल्मी
कोरोगभेदेचनाकौचपुन्नपुंसकम् बंधूकंबंधुजीवेस्या
द्बंधूकः पीतशालके २७ बंधकः स्याद्विनिमयेपुंश्चल्यां
स्याच्चबंधकी बाहुलः कर्कटेचाऽकेंदास्यूहेजलरवातके
२८ वराकः शंकरेपुंसिशोचनीयेऽभिधेयवत् बालकस्तु
शिशावश्वबालधौहयहस्तिनोः २९ अंगुलीयकह्रीबेरवलये
पुंसिवालिका वालायांवालुकापत्रकाहलाकर्णभूषणे ३०
वारकोऽश्वगतौपुंसिवाच्यवत्स्यान्निषेधके वालुकासि
कतास्त्रस्याद्वालकंत्वेलवालुके ३१ भर्मकंरोगभेदेस्या
द्दिंडककलधौतयोः भ्रामकोजंबुकेधूर्तेसूर्यावर्ताश्मभे
दयोः ३२ भ्रालांकः करपत्रेस्याच्छाकभेदेचरोहिते महा

For Private and Personal Use Only

लक्षणसंपन्नपुरुषेकच्छपेहरे ३३ भूमिकारचनायांस्याद्दे
शांतरपरिग्रहे भूतीकमपिभूनिंबेरोध्यकर्पूरकेतृणे ३४
[illegible] मधुकं [illegible] वल्पतरानाम
शकौरोगक्षीरप्रभेदयोः ३५ मंडुकः [illegible]
वर्चसि मंडूकपर्ण्योमंडुकीमल्लिकोहंसभिद्यपि ३६ मल्लि
कातृणशून्येपिमीनमृत्पात्रभेदयोः मामकंस्यान्मदीयार्थे
त्रिषुपुंसितुमातुले ३७ मातृकाधातृकामात्रोर्देवीभिद्वर्णमा
लयोः मालिकासप्तलापुत्रीग्रीवालंकरणेषुच ३८ पुष्पमा
ल्येनदीभेदेपक्षिभेदेतुमालिकः मेचकस्तुमयूरस्यचंद्रके
श्यामलेपुमान् ३९ तद्युक्तेवाच्यवल्लीबंस्रोतोंजनांधकार
योः मोचकःकदलेशिग्रुनिर्मोचकविरागिषु ४० मोदकः
खाद्यभेदेस्त्रीहर्षुकेपुनरन्यवत् यमकंयमजेशब्दालंका
रेपुंसिसंयमे ४१ याजकस्तुगजेराज्ञोयाज्ञिकेप्यथयाज्ञि
कः याजकेचकुशेचाथयुतकंसंशयेयुगे ४२ नारीवस्त्रांच
लेपुंस्तेचलनाग्रेऽपियौतके यूथिकाम्लानकेपुष्पविशेषे
पिचयोषिति ४३ रसिकास्त्रीरसालेक्षुरसयोःसरसेत्रिषु
रक्तकोऽम्लानबंधूकरक्तवस्त्रानुरागिषु ४४ राजिका
पिचकेदारेराजसर्षपरेखयोः रात्रकंपंचरात्रेनावेश्यावेश्मा
ब्दवासिनि ४५ रुचकोबीजपूरेचनिष्केदंतकपोतयोः न
द्ध्योःसर्जिकाक्षारेप्यश्वाभरणमाल्ययोः ४६ सौवर्चलेपि
मांगल्यद्रव्येचाप्युत्कटेपिच रुंडिकाद्वारपिंड्यांचद्रुनिक
यांरणक्षितौ ४७ रूपकंनाटकेमूर्तेकाव्यालंकरणेपिच
रेणुकापिहरेणौचजामदग्न्यस्यमातरि ४८ रोहकःप्रेतभे
देनारोढरित्रिषुविश्रुतः लंपाकोलंपटेदेशेलासकालास्य
कारिणि ४९ मयूरेलसकेचाथलूनकोभेदितेपशौ लो
चकोमांसपिंडेक्षितारकायांचकज्जले ५० ललाटाभर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णेस्त्रीणांकदलीनीलवस्त्रयोः निर्मुक्तोकर्णपूरेचमूर्व्यांभू
र्जत्वचर्मणि ५१ वस्तकंरोमकेपुंसिशिवमल्पर्कपर्णयोः
वर्णकश्चारणेस्त्रीतुचंदनेचविलेपने ५२ द्वयोर्नील्यादिषु
स्त्रीस्यादुत्कर्षैकथनस्यच वर्तकस्तुखुरेऽश्व स्यविहगे
वर्तकीद्वयोः ५३ वंचकस्तुखलेधूर्तेगृहबभ्रौचजंबुके
व्यलीकमप्रियाऽकार्यवैलक्ष्येष्वपिपीडने ५४ नानागरे
ऽथवाल्हीकंवाल्हीकेधीरहिंगुनोः द्वावेतौपुंसिदेशस्य
प्रभेदेतुरगांतरे ५५ वार्दुकंरद्धसंघातेरद्धस्यभावकर्मणोः
वार्षिकंत्रायमाणायांक्लीबंवर्षाभवेत्रिषु ५६ बालकोऽ
स्त्रीपारिहार्येत्रिषुस्यादंगुरीयके वितर्कस्तुपुमानूहेसंश
येचनिगद्यते ५७ विपाकःपचनेस्वादेकर्मणोविसदृक्फ
ले विवेकःस्याज्जलद्रोण्यांपृथग्भावविचारयोः ५८ वृ
श्चिकश्चद्रुणेराशौशूककीटौषधीभिदोः वृषांकःशंकरेसा
धौभल्लातकमहल्लयोः ५९ वैजिकंशिग्रुतैलेस्याद्धेतौस
द्योंकुरेतुना शलाकाशल्यमदनशारिकाशल्लकीषुच ६०
छत्रादिकाष्ठीशरयोःशल्लकीपशुरक्षयोः शंबूकोगज
कुभांतेघोंगेचशूद्रतापसे ६१ जलजंतुविशेषेचशुंबूकानन
पुंसकं शुंबूका वलयेकंबावस्त्रीपुंसिशिरोरुजि ६२ शार्क
कःस्याद्दुग्धफेनशर्करापिंडयोःपुमान् शिशुकःशिशुमा
रेस्याद्बालकोलूपिनोरपि ६३ शीतकःशीतकालेचस्वस्थि
तेदीर्घसूत्रिणि शूलकःशावटेपिस्याद्रसेपिपरिकीर्तितः
६४ सस्यकोमणिभेदेऽसौसंपर्कोमिलकेरतौ संपाक
स्तर्कवेरष्टेत्रिषुनाचतुरंगुले ६५ स्यमीकानीलिकायां
स्त्रीस्यमीकोनाकुरक्षयोः स्वस्तिकोमंगलद्रव्येचतु
ष्कगृहभेदयोः ६६ सरकोऽस्त्रीसीधुपानेशीधुपात्रेक्षु
सीधुनोः अल्पिन्याऽध्वगपंक्तौचसायकःशरखड्गयोः ६७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थासकः पुंसिचार्चिक्येजलादेरपिबुद्बुदे सूचकः सी
वनद्रव्येबोधकेपिशुनेशुनि ६८ ओतौकाकेसूतकोऽस्त्री
पारदेनद्वयोर्जनौ सृदाकुर्नानिलेवज्रेज्वलनेप्रतिसूर्यके
६९ सेवकस्तुप्रसेवेनावाच्यलिंगोऽनुजीविनी सेचकः
स्यात्पुमान्मेघेवाच्यलिंगस्तुसेक्तरि ७० सैनिकःसैन्यरक्षे
चस्यात्सेनासमवेतके हारकःकितवेचौरेगद्यविज्ञानभेद
योः ७१ हुडुक्कोवाद्यभेदेचमत्तदात्यूहपक्षिणि हेरुको
बुद्धभेदेस्यान्महाकालगणेपिच ७२ कचतुः भवेदलिम
कोभेकेपिकेऽलोपद्मकेसरे मधूकेऽप्यथालिपकोभृंगको
किलकुक्कुरे ७३ अंगारकःकुजेऽपिस्यादुन्मूकाशेकुरं
टके भवेदंगारिकाचेक्षुकांडेकिंशुककोरके ७४ स्याद
श्मंतकमुद्धानेमल्लिकाच्छदनेपिच आकल्पकस्तमोमो
हग्रंथावुत्कलिकामुदोः ७५ आक्षेपकोऽनिलव्याधौव्या
धेनिंदाकरेपिच भवेदाखनिकश्चौरेशूकरेमूषकेपिच ७६
कथितोत्कलिकोत्कंठाहेलासलिलवीचिषु एडमूकोऽ
न्यलिंगःस्याच्छठेवाक्श्रुतिवर्जिते ७७ कटिल्लकस्तुप
र्णाशेवर्षाभूकारविल्लयोः कपर्दकोवराटेस्याज्जटाजूटे
चधूर्जटेः ७८ कर्कोटकःस्यान्मालूरकाद्रवेयप्रभेद
योः कलविंकःपुमान्ग्रामचटकेपिकलिंगके ७९ कनी
निकातारकोष्ण्यःस्यात्कनिष्ठांगुलावपि कार्पटिकोऽन्यमर्म
ज्ञेछात्रेपुंसिशठेत्रिषु ८० काकरुकोनग्नदंभस्त्रीजितोलू
कभीरुषु निर्धे कुरुबकःशोणाऽम्लानझिंटीप्रभेदयोः ८१
कुरंटकःपीतपुष्पाम्लानझिंटीकयोःपुमान् कृकवाकुर्म
यूरेपिसरटेचरणायुधे ८२ कोशातकःकठेपुंसिपटोल्याघोष
केस्त्रियां अथकौकुटिकोऽदूरप्रेरिताक्षेचदांभिके ८३ कौ
लेयकःसारमेयेकुलीनेऽयखरालिकः ग्रामणीभेडिनारा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेप्युपधानेचपुंस्ययं ८४ भवेद्गुणनिकानृत्यशून्यांकेपाठ
निश्चितौ **गोकंटको** गोक्षुरकेस्यपुंडेचगवांखुरे ८५ **गोमेद**
**कं** पीतमणौकाकोलेपत्रके ऽपिच स्याद्गोकुलिकोवलिरेपंक
स्थगव्युपस्पके ८६ अथ**घर्घरिका**क्षुद्रघंटावादित्रदंडयोः
**चर्चरीको** महाकालेकेशविन्यासशाकयोः ८७ **चंडालिका**
किंनरायामुमायामोषधीभिदि अथ**चातुरकः**स्रक्गंडोपुंस्य
भिधेयवत् ८८ गोचरेलोचनस्यापिचाटुकारेनियंतरि **जर्जे**
**रीकं**बहुछिद्रेजरातुरेपिवाच्यवत् ८९ **जीवंतिकागुडू**
च्यांचजीवाख्यशाकवंदयोः **जैवातृकः**पुमान्सोमेदीर्घायुः
कृशयोस्त्रिषु ९० **तर्तरीकं**वहित्रेस्यात्नद्योःपारगेत्रिषु
**तिक्तशाकः**सुरवदिरेवरुणेपत्रसुंदरे ९१ **त्रिवर्णकं**गो
क्षुरकेत्रिफलायांकटुत्रिके **दलाढकः**स्वयंयाततिलेपृश्न्यां
चगैरिके ९२ फेनखातकयोर्नागकेसरेचमहत्तरे **दंदशूक**
स्तुपुल्लिंगोराक्षसेचसरीसृपे ९३ **दासेरकः**सुकरभेदासीपु
त्रेचधीवरे **नियामकः**कर्णधारेपोतवाहेनियंतरि ९४ **नि**
**श्वारकः**पुरीषस्यक्षयेस्वैरेसमीरणे **निर्ग्रंथकः**स्यात्क्ष
पणेनिष्फलेप्यपरिछदे ९५ **प्रचलाकः**शराघातेशिखंडेच
भुजंगमे **प्रकीर्णकं**चामरेस्याद्विस्तारेनातुरंगमे ९६ **पं**
**चालिका**स्त्रियांवस्त्रपुत्रिकागीतिभेदयोः **स्यात्पिप्पल**
**कं**वक्षोजवृंतेसीवनसूत्रके ९७ **पिंडीतकः**स्यात्तगरेमद
नाख्यमहीरुहे अथ**पुष्कलको**गंधमृगेक्षपणकीलयोः
९८ **पुंडरीकं**सिताभोजसितछत्रेचभेषजे पुंसिव्याघ्रेःग्नि
दिङ्नागकोशकारांतरेपिच ९९ भवेत्**पूर्णानकं**वर्हिष्ने
चपटहेपिच **फर्फरीकःस्व**पेटेस्यात्**फर्फरीकं**तुमार्दवे
२०० **बलाहको**गिरौमेघेदैत्यनागविशेषयोः **वराटकः**
पद्मबीजकोशेरज्जौकपर्दके १ **बकेरुका**बलाकाभिद्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावर्जितशाखयोः **वरंडक**स्तुमातंगवेद्यांयौवनकंटके २
वर्त्तुलेऽथोवाणिजकोवाडवाग्नौवणिज्यपि **वृंदारकः** सुर
पुंसिमनोज्ञश्रेष्ठयोस्त्रिषु ३ अथ**भ्रमरको**भृंगेगिरिकेचाल
कांतरे **भट्टारको**नृपेनाट्यवाचादेवेतपोधने ४ **भयानक**
स्मृतोव्याघ्रेरसेराहौभयंकरे **भार्याटिकः**पुमान्भार्यानिर्जि
तेहरिणांतरे ५ भवेन्**मरुबकः** पुष्पविशेषमदनद्रुमे **मं**
**डोदकं** चित्तरागेक्लीबमातर्पणेपिच ६ भवेन्**मंडलकं** विंबे
कुष्ठभेदेचदर्पणे अथ**मर्कटकः** सस्यभेदेवानरलूतयोः ७
**मयूरको**प्यपामार्गेक्लीबंतुत्यांजनेपुनः **माणवको**हारभे
देबालेकुपुरुषेपिच ८ **मृष्टरुको**वदान्येपिमिष्टाशिन्यतिथि
द्विषि **रतहिंकं**स्याद्दिवसंसुखस्यानेचमंगले ९ **राधरेकः**
पुमान्सीरेसीरकेचघनोपले **लालाटिकः** प्रभोर्भावदर्शिन्या
श्लेषणांतरे १० कार्याक्षमे**लेखनिकः** कथितोलेखहारके
लेखेषुपरहस्तेन ——— स्वहस्तस्यचलेखके ११ **वर्तक**
**को**नदीभेदेकाकनीडेजलावटे **विनायक**स्तुहेरंबेतार्क्ष्येवि
घ्नजिनेगुरौ १२ **वितुन्नक**स्तुधान्याकेझाटामले मयूरके
**विशेषको**ऽस्त्रीतिलकेविशेषयितरित्रिषु १३ **विदूषक**
स्यादुबटौपरनिंदाकरेऽपिच **वैनाशिकः** स्यात्क्षणिकेपर
तंत्रोर्णनाभयोः १४ **वैदेहको**वाणिजकेशूद्राद्वैश्यासुतेपि
च **वैतालिकः** पुमान्वैदृतालेबोधकरेत्रिषु १५ **शतानीक**
स्तुवृद्धेस्यान्मुनिराजप्रभेदयोः **शालावृकः** शृगालेस्यात्सारमे
येवलीमुखे १६ **शिलाटकः** पुमानट्टेविलेपपरिकीर्तितः **शृगा**
**लिका** शिवायांस्यात्त्रासादपिपलायने १७ **शृंगाटकं** भवेद्धा
रिकंटकेचचतुष्पथे **संतानिका**पिक्षीरादिसारेमर्कटजालके
१८ **संदंशिका**पिसुत्रुटीलोहयंत्रविशेषयोः **संचारिका**तु
युगलेकुट्टनीघ्राणयोरपि १९ **संघाटिका**स्त्रियांयुग्मेकु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्विन्यांजलकंटके **सुप्रतीकः** शोभनांगेभवेदीशानदिग्गजे २०
अथसैकतिकं मात्रयात्रामंगलसूत्रके नासन्यस्तेक्षपणके
त्रिषुसंदेहजीविनि २१ **सोमवल्क**स्तुधवलखदिरेकट्फले
पिच **सौगंधिकं**तुकल्हारेपद्मरागेपिकत्तृणे २२ पुल्लिंगोगंध
पाषाणेस्रगंधव्यवहारिणि ॥ **कपंच** ॥ अनेडमूकमुद्दिष्टः
शठेवाक्श्रुतिवर्जिते २३ **स्यादाकुरित** कंहासनखराघातभे
दयोः **उपकारिको**पकार्यांपिष्टभेदेनृपालये २४ **कस्याव**
स्तकइत्येषमुष्टोतोद्यानपालयोः रङ्गाजीवेकणेखंगेद्वाःस्थेः
थकटखादकः २५ **खादकेका**चकलशेबलिपुष्टेचजंबुके
**कृमिकंटकं**तुचित्रांगविडंगोदुंबरेषुच २६ **गोजागरिकं**मं
गलेपुंसिस्यात्कंटकारके **चिलमीलिका**तुकेठीभेदेखद्योत
विद्युतोः २७ **अथोजलक**रंकः स्यान्नालिकेरफलेऽंबुजे ।
शंखेजललतायांचवारिवाहेचकीर्तितः २८ जलतापिकइल्ली
सकाकेचीत्रषयोश्चपुंसिस्यात् **नवफलीका**स्त्रीनव्येनव
जातरजोंगनायांच २९ **नागवारिक**उद्दिष्टोराजकुंजरहस्ति
पे गणस्थराजगरुडेचित्रमेखलकेपिच ३० **स्याद्धीहिराजिकः**
कंगुधान्यचीनकधान्ययोः **व्यवहारिका**स्याल्लोकयात्रासं
मार्जनीगुदे ३१ **शतपर्विका**तुदूर्वायांवचायामपियोषिति ।
**शीतचंपक**इत्येषस्यादातर्पणदीपयोः ३२ **स्कवसंतक**उ
द्दिष्टोवासंत्योमदनोत्सवे **स्याद्धेमपुष्पिका**यूथ्यांचंपकेहेम
पुष्पकः ३३ ॥ **कषट्** ॥ **ग्राममद्गुरिका** ग्रामयुद्धेस्त्रंगीङ्गप
स्त्रियां **मदनशलाका**कामोद्दीपकभैषज्यसारिकयोः ३४ ।
**मातुलपुत्रक**इत्यपिमामकतनयेफलेचधूर्तस्य **वर्णवि**
**लोडक**एषश्लोकस्तेनेचसंधिचौरेच ३५ **सिंदूरतिलक**
उक्तोमतंगजेस्त्रीतुकामिन्यां ॥ ॥इतिकांतवर्गः रेवैकखसिद्रिये
पुंसेवेमूर्न्येबिंदौषिहायसि संवेदनेदेवलोकेकर्मण्यपिनपुंस

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खैकं

कं १ खद्विः॥ नखीस्त्रीक्लीबयोः शुक्तौ नखरे पुंनपुंसके
न्युंखः सम्यङ्मनोज्ञे च साम्नः षड्गणवेणु च २ प्रेंखा पर्यट
नेप्यश्वगतौ संवेशनांतरे मुखं निःसरणे वक्त्रे प्रारंभोपाययो
रपि ३ संध्यंतरे नाटकादेः शब्देपि च नपुंसके लेखो लेख्येसु
रे लेखा लिपि राजिकयोर्मता ४ रिंखा श्वगतिभेदेपि भूकशिं
ख्यां च नर्तने शंखः कंबौ नयोषिन्ना भालास्थिनिधिभिन्नखे ५
शाखा पक्षांतरे बाहौ वेदभागद्रुमांगयोः शिखा शाखा बर्हिचू
डालांगलिक्यग्रमात्रके ६ चूडामात्रे शिखायां च ज्वालायां प्र
पदेपि च सखा मित्रे सहायेनावयस्यायां सखी मता ७ सुखं
शर्मणि नाके च स्रुखा पुर्यांपि चेतसः॥ खत्रि ॥ गोमुखं
कुटिलागारे वाद्यभांडे च लेपने ८ पुंसि मालति पुत्रे च महादेव
गणांतरे त्रिशिखो राक्षसे क्लीबं त्रिशूले मंडलांतरे ९ दुर्मु
खः कपिभिन्नागभिदोर्नामुखरे त्रिषु प्रमुखः प्रथमे श्रेष्ठे म
यूखः किरणेपि च १० ज्वालायामपि शोभायां विशिखस्तो
मरे शरे विशिखा तु खनित्र्यां च रथ्यानलिकयोरपि ११ वि
शाखस्तर्कके स्कंदे स्त्रियामृक्षे कठिल्लके वैशाखो मासभे
देपि मंथाने च प्रकीर्तितः १२ स्रमुखस्तार्क्ष्यतनये शाखना
गभेदयोः॥ खचतुः॥ भवेदग्निमुखो देवविप्रे भल्लात
के स्त्रियां १३ अथाग्निशिखमुद्दिष्टं कुसुंभे कुंकुमेपि च॥
लांगलिक्याख्यौषधौ च विशिल्यायां च योषिति १४ इंदुले
खा मृता सोमलता शशिकलासु च अथ बहुशिखा स्त्री
स्यादुच्चटायां शिशौ त्रिषु १५ महाशंखो मानुषास्थिसंख्या
भेदालिकेषु च भवेद्व्याघ्रनखं कंदे गंधद्रव्यविशेषयोः १६
नखक्षतांतरे क्लीबं शिलीमुखोलिकांडयोः शशिलेखा
कलाभागे गुडूचीवृत्तभेदयोः १७ भवेत्स्वस्तिमुखो लेखे
ब्राह्मणे वंदिनि त्रिषु॥ खपंच ॥ मलिनमुखो गोगो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लांगूलेपुंसित्रिषुक्रूरे १८ शीतमयूखश्चंद्रेघनसारेचापि
पुल्लिंगः सर्वतोमुखउग्रेचस्रेअब्जब्रह्मणोःपुमान् १९ नपुं
सकेतुपानीयेसुरवर्त्मन्यपिस्मृतम्॥ ॥इतिखांतवर्गः॥
॥ गैकं ॥ गौःस्वर्गेचबलीवर्देरश्मौचकुलिशेपुमान् ॥
स्त्रीसौरमेयीदृग्बाणदिग्वाग्भूष्वप्सुभूम्निच १॥ गद्विः॥
अगःस्यान्नगवत्पृथ्वीधरपादपयोःपुमान् अंगंगात्रप्रती
कोपाययोःपुंभूम्निनीवृत्ति २ क्लीबैकत्वेत्वप्रधानेत्रिष्वंग
वतिचांतिके इंगःस्यादद्भुतेज्ञानेजंगमेंगितयोरपि ३ ख
गःसूर्यग्रहेदेवेमार्गणेचविहंगमे खड्गोगंडकशृंगासिबु
द्धभेदेषुगंडके ४ गांगस्तुगंगासंभूतेत्रिषुभीष्मेगुहेपुमा
न् चंगस्तुशोभनेदक्षेटंगोस्त्रीस्यात्खनित्रके ५ खड्ग
भेदेचजंघायांत्यागोदानेचवर्जने तुंगीनिशावर्चवयोःपुन्ना
गनगयोःपुमान् ६ उन्नतेत्रिषुदुर्गोमानील्योःस्त्रीदुर्गमेत्रि
षु नागंनपुंसकेरंगेसीसकेकरणांतरे ७ नागःपन्नग
मातंगक्रूराचारिषुतोयदे नागकेसरपुन्नागनागदंतकमु
स्तके ८ देहानिलप्रभेदेचश्रेष्ठेस्यादुत्तरस्थितः पिंगा
गोरोचनाहिंगुनालिकाचंडिकासुच ९ पिंगीशम्यांपिशंगे
नाबालकेतुनपुंसकं पूगस्तुक्रमुकेवृंदेफलसारेऽभिधेयव
त् १० नदीभेदेमलप्वास्त्रीभंगोजयविपर्यये भेदरोगतरंगे
पुभंगासस्यांतरेस्त्रियां ११ भगंश्रीयोनिवीर्येच्छाज्ञानवैराग्य
कीर्तिषु माहात्म्यैश्वर्ययत्नेषुधर्मेमोक्षेचनारवौ १२ भागो
रूपार्द्धकेभाग्येकदेशयोर्भृगुःपुमान् मुनौहरेतटप्रुक्रे भृंगो
धूम्याटपिंगयोः १३ मधुव्रतेभृंगराजेपुंसिभृंगीगुडत्वचि ॥
भोगःसुखेधनेचाहेःशरीरफणयोरपि १४ पालनेव्यवहारे
चयोषिदादिभृतावपि मार्गोमृगमदेमासप्रभेदेऽन्वेषणाध्व
नोः १५ मृगःपशौकुरंगेचकरिनक्षत्रभेदयोः अन्वेषणे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चषाज्वायांमृगीतुवनितांतरे १६ युगोरथहलाद्यंगेनद्वयोस्तु
स्तादिषु पुम्मेहस्तचतुष्केपिहृद्धिनामौषधेःपिच १७ योगोऽपू
र्वार्थसंप्राप्तौसंगतिध्यानयुक्तिषु वपुःस्थैर्येप्रयोगेचविष्कंभादिषु
भेषजे १८ विश्रब्धघातकेद्रव्योपायसन्नहनेष्वपिंकार्मणेपिचरं
गोनारागेनृत्यैरणक्षितौ १९ अस्त्रीत्रपुण्यरागस्तुमात्सर्येलोहि
तादिषु क्लेशादावनुरागेचगांधारादौनृपेपिच २० रोगःकुष्ठौषधे
व्याधौलंगस्तुसंगषिड्गयोः लिंगंचिन्हेऽनुमानेचसांख्योक्तप्रकृ
तावपि २१ शिवमूर्तिविशेषेपिमेहनेपिनपुंसकं व्यंगोभेके
चहीनांगेवंगंसीसकरंगयोः २२ वार्त्ताकेपिचकार्पासेपुंभूम्नि
नीवृदंतरे वल्गुःस्याच्छगलेपुंसिसुंदरेचाभिधेयवत् २३ वेगो
जवेप्रवाहेचमहाकालफलेपिच शार्ङ्गःकार्मुकमात्रेपिविष्णोर
पिशरासने २४ शृंगो वटाऽम्रातकयोःपर्कट्यामपिचास्त्रियाम्
शृंगंप्रभुत्वेशिखरेचिन्हेक्रीडांबुयंत्रके २५ विषाणोत्कर्षयो
श्चाथशृंगःस्यात्कूर्चशीर्षके स्त्रीविषायांस्वर्णमीनभेदयोर्क्र
षभौषधौ २६ सर्गस्तुनिश्चयाध्यायमोहोत्साहात्मसृष्टिषु ॥ ॥
॥गत्रिः॥अयोगोविधुरेकूटेविश्लेषेकठिनोद्यमे २७ अनंगो
मदनेनंगमाकाशमनसोरपि अपांगस्त्वंगहीनेस्यान्नेत्रांतेतिल
केपिच २८ आभोगोवरुणछत्रेपूर्णतायत्नयोरपि आयोगो
व्यापृतौगंधमाल्योपहारबोधयोः २९ आशुगोमारुतेबाणे
प्युद्वेगःक्रमुकीफले उद्वेगो प्युद्गाहुलकोद्वेजनोद्भ्रमनेषुच ३०
उत्सर्गःपुंसिसामान्येन्यायेचत्यागदानयोः कलिंगःपूतिकरजे
धूम्याटेभूम्निनीवृति ३१ नद्योःकौटजफलेमहिलायांतुयोषि
ति कालिंगो भूमिककरीदंतावलभुजंगयोः ३२ कालिंगी
राजकर्कट्यांचक्रांगोमानसौकसि चक्रांगीकटुरोहिण्याजि
ह्मगोऽहौचमंदगे ३३ तडागोऽस्त्रीजलाधारविशेषेयंत्रकू
टके नातगुःसुद्रतातेनाजनकस्यहितेत्रिषु ३४ त्रिवर्गोध

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेकामार्थेस्त्रिफलायांकटुत्रिके वृद्धिस्थानक्षयेसत्वरजस्त
मसिचेष्यते ३५ तुरगी चाश्वगंधायांतुरग श्चित्तवाजिनोः
धारांगोऽसौचतीर्थेचनरांग स्तुवरंडके ३६ मेहनेनद्वयोश्चा
थनारंगः पिप्पलीरसे यमजप्राणिनिविटेनागरंगद्रुमेऽपिच
३७ निषंगःसंगतेतूणेनिसर्गोरूपसर्गयोः नीलगुःस्यात्कृ
मौपुंसिभस्मराल्यांतुयोषिति ३८ पत्रांग नद्वयोर्भूर्जेपद्मकेरक्त
चंदने पन्नग श्चौषधीभेदेतथैवपवनाशने ३९ प्लवगो वानरेभे
केसारथौचोष्णदीधितेः परागःसुमनोरेणौधूलिस्नानीययोरपि ४०
गिरिप्रभेदेविख्यातावुपरागेचचंदने प्रयाग स्तीर्थभेदेस्याद्यज्ञेश
तमखाश्वयोः ४१ प्रयोगःकर्मणोऽपिस्यात्प्रयुक्तौचनिदर्शने पतं
गःशलभेशालिप्रभेदेपक्षिसूर्ययोः ४२ क्लीबंसुतेप्रियंगुःस्त्रीरा
जिकाकणयोरपि फलिन्यांकंगुसस्येचपुन्नाग स्तुसितोत्पले ४३
जातीफलेनरश्रेष्ठेपांडुनागेद्रुमांतरे वरांगं योनिमातंगमस्तकेषु
गुडत्वचि ४४ भुजंगो हौचपिंगेच मातंगः श्वपचेगजे मृदंगः
पटहेघोषेरक्तांगस्तुमहीसुते ४५ कंपिल्लेस्त्रीतुजीवंस्यांक्लीबं
विद्रुमधीरयोः रथांगं नद्वयोश्चक्रेनाच क्रौंचविहंगमे ४६
वातिगःपुंसिभंटाक्यांधातुवादिनिचान्यवत् विडंग स्त्रिष्व
भिज्ञेस्यात्कृमिघ्नेपुन्नपुंसकं ४७ विसर्ग स्तुपुमान्दानेत्या
गेचमलनिर्गमे विसर्जनीयेप्यपनभेदेपिचविभावसोः ४८
विहंग स्तुत्रिलिंगःस्यादाशुगेचविहंगमे सर्वगं सलिलेक्ली
बंसर्वगः शंकरेविभौ ४९ संभोग स्तुपुमान्भोगेसुरते
जिनशासने सारंगः पुंसिहरिणेचातकेचमतंगजे ५०
शबलेत्रिषुद्देमांगो गरुडेपरमेष्ठिनि॥ ॥ गचतुः॥ ॥
॥ स्यादपवर्ग स्त्यागेमोक्षेकार्यावसानसाफल्ये ५१ ॥
अभिषंगो नपुंलिंगः पराभवाक्रोशशपथेषु ईहामृग
स्तुपुंसिस्यात्कोकरूपकभेदयोः ५२ ॥ ॥ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५२ उपरागस्तुपुंसिस्याद्राहुग्रस्तार्केचंद्रयोः दुर्नयेग्रहक
ल्लोलेव्यसनेपिनिगद्यते ५३ उपसर्गःपुमान्रोगभेदोपप्लु
वयोरपि कटभंगस्तुशस्यानांहस्तछेदेनृपात्यते ५४ छ
त्रभंगःपिवैधव्येस्वातंत्र्यनृपनाशयोः दीर्घाध्वगःपुमानु
ष्ट्रेलेख्यहारेतुभेद्यवत् ५५ मल्लनागोऽभ्रमातंगेवात्स्या
यनमुनावपि समायोगस्तुसंयोगेसमवायेप्रयोजने ५६
संप्रयोगोरतेपिस्याद्न्वितौकार्मणेपिच॥ ॥गपंच॥ ॥क
थाप्रसंगोवातूलेविषवैद्येचवाच्यवत् ५७ नाडीतरंगः
काकोलेहिंडकेरतहिंडके इतिगांतवर्गः ॥घेकं॥ घोघं
टायांघर्घरेनास्त्रियांतुकांचिघातयोः॥ ॥घद्विः ॥अघंतु
व्यसनेदुःखेदुरितेचनपुंसकं १ अर्घःपूजाविधौमूल्येप्यु
ह्नःस्याद्दृजानिले अर्गोहस्तपुटेशस्तेप्योघोवेगेजलस्यच
२ वृंदेपरंपरायांचद्रुतंन्टस्योपदेशयोः मघामघीचनस्त्रेः
धान्यभेदेयथाक्रमं ३ मघोद्वीपांतरेमेघोमुस्ताजलदयोःपु
मान् मोघास्त्रीपाटलायांस्याद्धीननिष्फलयोस्त्रिषु ४ ल
घुस्गुरौचमनोज्ञेनिःसारेवाच्यवत्क्लीवं शीघ्रेचकृष्णागुरुणि
पृक्कानामौषधौतुस्त्री ५ श्लाघास्त्रियांप्रशंसायांपरिचर्याः
भिलाषयोः॥घत्रिः अनघोनिर्मलापापमनोज्ञेष्वभिधेयवत्
६ अमोघंसफलेवाच्यवत्स्त्रीपथ्याविडंगयोः उल्लाघो
पिसुचोरुक्षमेदक्षनीरोगयोस्त्रिषु ७ कांचिघःकांचनेपिस्याः
च्छेमंडेमूषकेपिच निदाघोग्रीष्मकालेस्यादुष्मस्वेदांबुनो
रपि ८ पलिघःकाचकलशेघटेप्राकारगोपुरे परिघोयोग
भेदेःस्त्रविशेषेर्गलघातयोः ९ प्रतिघःप्रतिघातेस्यात्क्रोधे
पिपरिकीर्त्तितः महार्घस्तुमहामूल्येत्रिषुस्याल्लावकेपुमा
न् १० सर्वाघोगुरुभेदेचसर्वसन्नहनेपुमान्॥ इतिघां
तवर्गः ॥ङैकं॥ ङःपुमान्विषयेख्यातःस्पृहायांविषयः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यच ॥ इतिङांतवर्गः॥ चैकं॥ चश्चंडेशेपुमानुक्तः कच्छ
पेचंद्रचौरयोः चर्हिः अर्चा पूजाप्रतिमयोः कचः केशेगुरोः
सुते १ बंधेशुष्कव्रणेपुंसिकरिण्यांतुकचा स्त्रियां काचः
शिक्यमणौनेत्ररोगभेदेमृदंतरे २ कांची स्यान्मेखलादाम्नि
प्रभेदेनगरस्यच कूर्चमस्त्री भ्रुवोर्मध्येकठिनश्मश्रुकैतवे
३ क्रौंचोद्वीपविशेषेस्यात्पक्षिपर्वतभेदयोः चर्चाचिंतास्था
सकयोश्चर्चिकायांतुयोषिति ४ चंचातुनलनिर्माणेतृणनि
र्मितपूरुषे चंचूस्त्रीद्वयोस्त्रियांपुंसिगोनाडीकेव्यडंबके ५
त्वक्स्त्रीचर्मणिवल्केचगुडत्वचिविशेषतः न्यङ्नीचनिम्न
योर्नीचः पामरेवामनेपिच ६ प्राच्छब्दोदिशिदेशेचकालेच
वाच्यलिंगकः पिचुर्नाकुष्ठभेदेचकर्षेतूलेसुरांतरे ७ मोचः
शोभांजनेपुंसिमोचा शाल्मलिरंभयोः रुचिः स्त्रीदीप्तौशोभायां
मभिष्वंगाभिलाषयोः ८ रुक्स्त्रीशोभाद्युतीछासुवचः कीरेच
चौषधौ शारिकायांचवाग्वाचभारत्यांवचनेस्त्रियां ९ वीचिः
स्वल्पतरंगेस्यादवकाशेसुखेद्वयोः शचीद्राण्यांशतावर्यांत
थास्त्रीकरणांतरे १० शुचिर्ग्रीष्माग्निशृंगारेष्वाषाढेशुद्धमंत्रि
णि ज्येष्ठेचपुंसिधवलेशुद्धेनुपहतेत्रिषु ११ सूचीतुसीवनद्र
व्येप्यांगिकाभिनयांतरे॥ ॥चत्रि॥ ॥ उदग्दिग्देशकाले
षुवाच्यवत्त्रितयेऽव्ययं १२ कुणीचीपुष्पितलतागुंजयोःशाक
टस्त्रियां कवचोगर्दभांडेचसन्नाहेपटहेपिच १३ क्रकचः
करपत्रेऽस्त्रीग्रंथिलाख्यतरौपुमान् नमुचिस्तुपुमान्दैत्यभेदे
कुसुमकार्मुके १४ नाराचोपणिकयांनालोद्वाणोवृद्धस्ति
नोः प्रपंचः संचयेपिस्याद्विस्तारेचप्रतारणे १५ प्रत्यग्दिग्दे
शकालेषुवाच्यवत्त्रितयेऽव्ययं मरीचिर्मुनिभेदेनागभस्त्रावन
पुंसकम् १६ मारीचोरक्षसोभेदेकक्कोलेयाजकद्विजे मारीची
देवताभेदेविपंची केलिवीणयोः १७ विकचः क्षपणकेतोनाःके

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शेस्फुटितेऽन्यवत् **विरिञ्चिर्ना** विरिंचश्च वैकुंठे परमेष्ठिनि १८
**संकोचो** मीनभेदे स्यात् वधे क्लीबं तु कुंकुमे **सम्यकू** स्याद्वाच्य
लिंगं तु मनोज्ञे संगतोपि च १९ ॥ **चचतुः** ॥ **जलसूचिः** कंक
त्रोटिमत्स्य शृंगाटयोरपि शिशुमारे च पुंल्लिंगो जलौकायां तु यो-
षिति २० **मलिम्लुचो** मासभेदे चौरज्वलनयोः पुमान् ॥ **चपं**
**च** ॥ **रतनारीचो** नारीणां सीत्कारे च शुनि स्मरे २१ **इति चांत**
**वर्गः** ॥ ॥ **छैकं** ॥ **छा** छादने स्त्रियां स्यात्तानिर्मलेन्यवदिष्यते ॥
॥ ॥ **छद्विः** ॥ **अच्छः** स्फटिकभल्लूकनिर्मलेष्वच्छमव्ययम्
१ आभिमुख्ये ऽथ **कच्छः** स्यादनूपे तुन्नकद्रुमे नौकांगे पुंसि वारा
ह्यां चीरिकायां च योषिति २ स्याद् **गुच्छः** स्तवके स्तंबे हारभेदक
लापयोः **पिच्छा** पूगकटाकोशमोचाशाल्मलिवेष्टके ३ भक्त-
संभूतमंडे च पंक्तावश्वपदामये स्त्रियां पुंसि तु लांगूले नहुषो बर्हि
चूडयोः ४ **पुच्छः** पश्चात्प्रदेशे स्याल्लांगूले पुच्छमिष्यते **म्लेच्छः**
पामरभेदे च पापरक्तेऽपभाषणे ५ ॥ ॥ **छचतुः** ॥ **मत्स्यकच्छ**
स्तु पुंसि स्यात्समुद्रे च प्रचेतसि ॥ **इति छांतवर्गः** ॥ **जैकं** जो ना
मृत्युंजये जन्यां तातमात्रे जनार्दने **जूस्त्व** रागमने प्रोक्ता सामा
न्यगमने स्त्रियाम् १ **जूरा** काश सरस्वत्यां पिशाच्यां जवने-
स्त्रियाम् ॥ ॥ **जद्विः** ॥ **अजश्** छागे हरिब्रह्मविधुस्मरनृपे हरे
**अब्जो** स्त्रीशंखे नानिचुले धन्वन्तरौ च हिमकिरणे क्लीबं पद्मेऽ
थाजिः स्त्री समभूमौ च संग्रामे ३ **ऊर्ज्जस्तु** कार्त्तिकोत्साह बले
षु प्राणनेपि च **केजः** केशे विरिंचे त्र **कजं** पीयूषपद्मयोः ४
**कुजा** कात्यायनी देव्यां **कुजो** नरकभौमयोः **कुब्जो** रक्षप्रभे
देनान्युब्जे स्याद्वाच्यलिंगकः ५ **कुंजो**ऽस्त्रियां निकुंजेपि हनौ
दंतेपि हस्तिनां **खंजा** छंदःप्रभेदे स्त्री कुटिलां घ्रौ तु वाच्यवत् ६
**खजा** मंथे प्रहस्ते ऽथ **खजुः** कीटांतरे स्मृता **खर्जूरी** पादपे कं डूं म
जो माने मतंगजे ७ वास्तुनःस्थानभेदेपि **गंजा** खनौ सुरागृहे

गंजः स्यात्पुंसि रीढायां भांडागारे तु न स्त्रियां ८ गुंजा तु का
कचिं चायां पटहे च कलध्वनौ द्विजः स्याद्ब्राह्मणक्षत्रवैश्यदंता
ण्डजेषु ना ९ द्विजा भार्ग्यां हरेण्वां च ध्वजः स्याच्छौंडिके पुमान्
न स्त्रियां तु पताकायां खट्वांगे मेढ्रचिन्हयोः १० निजं स्वीये च नि
त्ये चन्युब्जो दर्भमयस्रुचि कर्मरंगफले क्लीबं कुब्जाधोमुख
योस्त्रिषु ११ प्रजा लोके च संताने पिंजा तूलहरिद्रयोः बले क्ली
बं वधे पुंसि व्याकुले त्रिष्वथो भुजा १२ द्वयोर्बाहौ करे मज्जः स्त्री
शुद्धौ धावकेऽपि च रजो रणोपरागे स्यादार्तवे च गुणांतरे १३
रज्जुर्वेण्यां गुणे योषिद्राजिः स्त्री पंक्तिलेखयोः रुजा रोगे च भं
गे थ लाजः स्यादार्द्रतंडुले १४ नपुंसकमुशीरेऽथ स्त्रियां पुंभूम्नि
चाक्षते व्रजो गोष्ठाध्ववृंदेषु वाजो निःस्वनपक्षयोः १५ वेगे
पुमानथ क्लीबे घृतयज्ञान्नवारिषु व्याजः शाठ्यापदेशयोः बी
जमंकुरकारणे १६ हेतुतत्वाधानशुक्रे सर्जुर्वणिजि विद्युति
स्त्रियां स्वजो विधौ रुद्रे स्वजः प्रस्वेदपुत्रयोः १७ क्लीबं रक्ते
थ संजः स्यात्सन्नद्धे संभृते त्रिषु ॥ जत्रि ॥ अंडजा मृगना
भौ स्यात्सरटे द्वौ खगे झषे १८ अंगजं रुधिरेऽनंगकेशपुत्र
मदेषु ना अंबुजो निचुले पुंसि कमले तु नपुंसकम् १९ अ
सृक् स्याद्योगभेदे ना रक्तेऽपि स्यान्नपुंसकम् कंबोजो हस्तिभे
दे शंखदेशविशेषयोः २० करजः स्याद्व्याघ्रनखे करंजनख
योः पुमान् कारुजः शिल्पिनां चित्रे वाल्मीके गजार्भके २१ कां
बोजोऽश्मांतरे सोमवल्के पुन्नागपादपे कांबोजी माषपर्ण्यां
च वल्कस्खदिरे स्त्रियां २२ कुटजो वृक्षभेदे स्यादगस्त्यद्रोण
योरपि गिरिजं त्वभ्रकेऽपि स्याच्छिलाजतुनि शैलजे २३ लोहे
पि गिरिजा गौरीमातुलुंग्योश्च योषिति जलजं कमले शंखे
नीरजं कुष्ठपद्मयोः २४ परंजस्तैलयंत्रे स्यात्क्षुरिकाफलफे
नयोः बलजं गोपुरक्षेत्रे शस्यसंगरयोरपि २५ बलजा वर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योषायांपूष्यामक्षवणिक्स्त्रियांवणिज्यायांपुमान्वाणिज्यके
चकरणांतरे २६ बाहुजःक्षत्रियेकीरेस्वयजातत्तिलेपिच भू
मिजोनरकेगारेसीतादेव्यांतुभूमिजा २७ वनजामुद्गप
र्ण्यानामुस्तकेक्लीबमंबुजे सहजस्तुनिसर्गेनासहोत्थेपुनर
न्यवत् २८ समजःपशुवृंदेनाविपिनेतुनपुंसके सामज
स्तुगजेपुंसिसामोत्थेपुनरन्यवत् २९ हिमजातुशचीगौर्योः
पुंसिमैनाकपर्वते ॥ जचतुः ॥ अहिभुग्बर्हिणेतार्क्ष्येपुंसि
काश्मीरजंपुनः ३० कुष्टकुंकुमयोःक्लीबेतिविषायांतुयोषिति
क्षीराब्धिजंतुसामुद्रलवणेमौक्तिकेपिच ३१ पुमांस्तुषारकि
रणेकमलायांतुयोषिति ग्रहराजोरवौचंद्रेजघन्यजःकनीय
सि ३२ वृषलेद्विजराजस्तुचंद्रेऽनंतेगरुत्मति धर्मराजोयमे
बुद्धेयुधिष्ठिरनृपेपुमान् ३३ भरद्वाजोगुरोःपुत्रेव्याघ्राटाख्य
विहंगमे भारद्वाजावनकार्पास्यांनाद्रोणऋषिभेदयोः ३४ अ
थभृंगराजउक्तःपक्षिविशेषंचमार्कवेभ्रमरे यक्षराट्पुंसि
धनदेमल्लानांरंगचत्वरे ३५ राजराजःकुबेरेपिसार्वभौमे
सुधाकरे॥ ॥जपंच॥ ॥ऋषभध्वजएषोपिशंकरेचार्ह
दंतरे ३६ मुनिभेषजमागस्त्यहरीतक्यांचलंघने ॥ इतिजां
तवर्गः॥ झैकं ॥ झोदृं टीशसुरगुरौदैत्यराजेध्वनावपि ॥
झाद्वि॥ झंझावातेतारवायोमष्टेपिकीर्त्यतेबुधैः झंझाध्वनि
विशेषेचस्यादंबुकणवर्षणे ॥इतिझांतवर्गः ॥ ञैकं ॥
ञःपुमान्स्याद्बलीवर्देमुकेवाममतावपि ज्ञोब्रह्मबुधविद्व
त्सुस्यादज्ञोजडमूर्खयोः १ प्रज्ञस्तुपंडितेवाच्यलिंगोबुधेच
योषिति राज्ञोराजप्रियायांचभार्यायांभास्करस्यच २ ॥संज्ञा
नामनिगायत्र्यांचेतनारवियोषितोः अर्थस्यसूचनायांचहस्ता
द्यैरपियोषिति ३ ॥ ञत्रि ॥ कृतज्ञःकुक्कुरेपुंसिमर्यादि
न्यभिधेयवत् क्षेत्रज्ञआत्मनिछेकेदैवज्ञोगणकेपुमान् ४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवज्ञेक्षणिकायांस्त्रीसर्वज्ञःशिवबुद्धयोः॥ इतिज्ञांतवर्गः
॥ ॥टैकं॥ टःपुमान्वामनेपादेनिःस्वनेपिक्कचिन्मतः॥ ॥
टद्वि॥ ॥अट्टंभक्तेचशुष्केनाक्षौमेऽत्यर्थेगृहांतरे १ दृष्टमा
शंसितेपिस्यात्पूजितेप्रेष्ठयसित्रिषु सप्ततंतौपुमान्क्लीवेसंस्का
रेक्रतुकर्मणि २ इष्टिर्मताऽभिलाषेपिसंग्रहश्लोकयागयोः
कटःश्रोणोद्भयोःपुंसिकिलिंजेऽतिशयेशिरे ३ समयेगजगंडे
चपिप्पल्यांतुकटीमता कटुस्त्रीकटुरोहिण्यांलताराजिक
योरपि ४ नपुंसकमकार्येस्यात्पुल्लिंगेरसमात्रके त्रिषुतद्व
त्सुगंध्योश्चमत्सरेथिरवरेपिच ५ कष्टंतुगहनेकृच्छ्रेकुष्टंरोद
नरावयोः कुटःकोटेपुमानस्त्रीघटेस्त्रीपुंसयोर्गृहे ६ कु
टीस्यात्कुंभदास्यांचसुरायांचित्रगुच्छके कूटोऽस्त्रीनिश्चले
राशौलोहमुद्गरदंभयोः ७ मायाद्रिशृंगयोस्तुच्छेसीरावयव
यंत्रयोः अनृतेचाथकृष्टिस्यादाकर्षेस्त्रीबुधेपुमान् ८ कोटिः
स्त्रीधनुषोऽग्रेऽश्रौसंख्याभेदप्रकर्षयोः खटोंधकूपकफयोःप्र
हारांतरटंकयोः ९ खाटिस्त्वसद्व्रहेणिस्यात्किणेशवरथेस्त्रियां
खेटःकफेग्रामभेदेचर्मण्यस्त्र्यधमेत्रिषु १० अथगृष्टिःसकृ
त्सूतगवीबदरयोस्त्रियाम् घटःसमाधिभेदेभशिरःकूटकुटेषुच
११ घटाघटनगोष्ठीभघटनासुचयोषिति घृष्टिःस्त्रीघर्षणस्य
द्रौविष्णुकांतासुनाकिरौ १२ घोंटा तुबदरीपूगवृक्षयोरपियो
षिति चटुश्चाटौपिचिंडेचव्रतिनामासनेपुमान् १३ जटाल
ग्नकचेमूलेमांस्यांप्लक्षेपुनर्जटी जुष्टंतुक्लीबमुच्छिष्टेसेवि
तेवाच्यलिंगकं १४ झाटोनिकुंजेकांतारेव्रणादीनांचमाजे
ने तटंनपुंसकंक्षेत्रेप्रतीरेतुतटीत्रिषु १५ त्वष्टापुमान्देवः
शिल्पितक्ष्णोरादित्यभिद्यपि त्रुटिःस्त्रीसंशयेस्वल्पेसूक्ष्मै
लाकालमानयोः १६ त्रोटिःस्त्रीकट्फलेचंचांखगेमीनां
तरेऽपिच दिष्टंदैवेपुमान्कालेदिष्टिर्मुत्परिमाणयोः १७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रियोदृष्टिस्त्रियांबुद्धौलोचनेदर्शनेपिच धटोदिव्यतुलायांस्या
ढूटी चीरेचवाससः १८ नटीनल्यौषधेस्त्रीस्यात्शैलूषाशो
कयोःपुमान् पटस्त्रिनपटेवस्त्रेःस्त्रीप्रियालद्रुमेपुमान् १९ प
टुर्दक्षेचनीरोगेचतुरेप्यभिधेयवत् पटोलेतुपुमान्क्लीबेछत्राल
वणयोरपि २० पट्टःपेषणपाषाणेव्रणादीनांचबंधने चतुष्पथे
चराजादिशासनांतरपीठयोः २१ पटिःस्त्रीपटभेदेस्याद्दागुलो
कुंभिकाद्रुमे पुष्टिःस्त्रीपोषणेवृद्धौफटातुफणदंतयोः २२ व
टीत्रिषुगुणेपुंसिस्यान्न्यग्रोधकपर्दयोः भटःस्यात्पुंसिवीरेचवि
शेषेपामरस्यच २३ भृष्टिःस्याद्भर्जनेशून्यवाटिकायांचयोषि
ति स्लिष्टंत्रिष्वव्यक्तवाचिम्लानेमुष्टिर्द्वयोःफले २४ बहु
पाणौत्सरौयष्टिःपुंसिस्याद्भुजदंडके द्वयोर्हारलताभार्ग्योर्मधु
काशस्त्रभेदयोः २५ रिष्टः क्षेमाशुभाभावेपुंसिखड्गेचफेनि
ले रिष्टिःखड्गेनाशुभेस्त्रीलाटोदेशांतरेःशुके २६ वाटो मा
र्गेवृत्तिस्थानेस्यात्कुटीवास्तुनोःस्त्रियां विटोःद्रौलवणेषिड्गेमू
षिकेखदिरेपिच २७ विष्टिःस्त्रियुकर्मकरेस्त्र्याजूवेतनकर्मसु
व्युष्टिःफलेसमृद्धौस्त्रीव्युष्टंकल्येत्रिषूषिते २८ सटा जटाके
सरयोस्फुटोव्यक्तप्रफुल्लयोः व्याप्तेत्रिषुस्फुटिर्योषित्पादस्फोटा
मयेपिच २९ निर्भिन्नकर्कटीशस्येःपिस्यात्सृष्टंतुनिर्मिते यु
क्तनिश्चितयोःप्राज्येत्रिषुसृष्टिस्तुनिर्मितौ ३० स्वभावेचापिक
थिताहृष्टोरोमांचितेपिच जातहर्षप्रहसितेविस्मितेप्यभिधेयव
त् ३१ टत्रि ॥अवटःस्यात्तिलेगर्तेकूपेकुहकजीविनि अरिष्टो
लशुनेनिंबेफेनिलेकाककंकयोः ३२ अरिष्टमशुभेतक्रेसूतिका
गारआसवे शुभेमरणचिह्नेचाःदिष्टमादेशितेत्रिषु ३३ आज्ञसो
च्छिष्टयोःक्लीबमुत्कटस्तीव्रमत्तयोः उद्भटःकच्छपेशूर्पेकर्कटो
विहगांतरे ३४ राशिभेदेकुलीरेचवालूक्यांशाल्मलीफले क
र्हटःकरहाटेस्यात्पंकपंकारयोरपि ३५ करटो गजगंडेस्या

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्कुंतुभेनिंद्यजीवने एकादशाहादिश्राद्धेदुर्दुरूढेपिवायसे ३६
**करटो**वाद्यभेदेथ**कार्पटो**जंतुकार्थिनोः **कीकटः**कृपणेनिः
स्वेत्रिषुपुंभूम्निनिवृत्ति ३७ **कुरंटो**दारुपुत्र्यांनाझिंटीम्लानप्रभे
दयोः **कुक्कुटय**नृतचर्यायांपुंसिस्याच्चरणायुधे ३८ निषादशू
द्रयोःपुत्रेतृणोल्कायांचकुक्कुभे **कुनटी**मनःशिलायांनेपाल्या
मपियोषिति ३९ **कपीट**मुदरेतोयेकेशटोहर्यजोत्कटे **चर्पटः**
स्फारविपुलेचपेटेपर्पटेपिच ४० **चक्राटो**विषवैद्येपिधूर्तदीनारयो
रपि **चिपिटः**खाद्यभेदेनात्रिषुपिट्टितविस्तृते ४१ **चिरिंटी**तुसु
वासिन्यांस्याद्वितीयवयःस्त्रियां **जकुटं**वार्ताकुपुष्पेज**कुटो**मल
येशुनि ४२ **त्र्यंकटं**शिक्यभेदेपिधौतांजन्यांचनद्वयोः **त्रिकूटं**
सिंधुलवणे**त्रिकूटः**पर्वतांतरे ४३ **त्रिपुटा**मल्लिकायांचसूक्ष्मै
लात्रिवृतोःस्त्रियां सतीनकेचतीरेच**त्रिपुटः**समुदाहृतः ४४ **द्रो**
**हाटः**कथितोगाथाप्रभेदेमृगलुब्धके वैडालव्रतिकेचाथ**धाराट**
श्चातकाश्वयोः ४५ **निर्दट**स्तुदयाशून्येकथितोनिष्प्रयोजने प
रापवादरक्तेचवाच्यलिंगोयमिष्यते ४६ **निष्कुट**स्तुगृहोद्याने
स्यात्केदारकपाटयोः॥ **पर्कटी** नूतनफलेपूगादेःप्लक्षपादपे ४७
**परीष्टिः**परिचर्यायांप्राकाम्येऽन्वेषणेस्त्रियां **पर्पटं**पिष्टभेदेस्या
**त्पर्पटो**भेषजांतरे ४८ **पात्रटः**कर्परेपुंसिदेशेस्यादभिधेयव
त् **पिच्चटो**नेत्ररोगेस्यात्त्रपुसीसकरंगयोः ४९ **वरटा**द्वयो
र्वरट्योःस्त्रीहंस्यांचतस्यतौपुमान् **बर्बटी**पण्ययोषायांव्रीहि
भेदेचयोषिति ५० **वेकटः**स्याद्वैकटिकेमत्स्यभेदेचयूनिच
**भावाटो**भावकेसाधुनिवेशेकामुकेनटे ५१ **भाकूटः**शैल
झषयोर्भेदेस्यादथ**मर्कटी** करंजभिच्छूकशिंब्योःपुंसिवान
रलूतयोः ५२ **मोचाटः**कृष्णजीरेचरंभास्त्रिमलयोद्भवे **मो**
**रटं**तुभवेदिक्षुमूलांकोठप्रसूनयोः ५३ सप्तरात्रात्परक्षीरेमू
र्विकायांतु**मोरटा** **वर्णाटो**गायनेचित्रकरेस्त्रीकृतजीवने ५४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विकटा** वज्रवाराह्यांत्रिपूरुविकरालयोः **शाकटं** शकटस्येदमि
त्यर्थेतस्यवोढरि ५५ **शैलाटो** देवलेसिंहेशुक्लकाचकिरातयोः
**संसृष्टं** त्रिषुसंसर्गेसंशुद्धेवसनादिना ५६ **टचतुः**॥ ॥**उत्कं**
**गटः** स्तृणगडुमत्स्येकोपनपूरुषे **करहाटः** शिफाकंदेपद्मस्यम
दनद्रुमे ५७ स्यात्**कार्यपुटः** कृपणोन्मत्तानर्थकरेषुच **काम**
**कूटः** स्तुवेश्यायाःप्रियविभ्रमयोःपुमान् ५८ **कुटन्नटं** तुकैव
र्ते गुस्नकेपुंसिशोणके **कुंडकीटः** स्तुचार्वाकवचनाःभिद्रपू
रुषे ५९ पतितब्राह्मणीपुत्रदासीकामुकयोरपि **खङ्गरीटः** स्तु
फलकासिधाराव्रतधारिणोः ६० **गाढमुष्टिः** कृपणेनाकृपणे
त्वभिधेयवत् **चक्रवाटः** क्रियारोहेपर्यंतेचशिखातरौ ६१
**चतुःषष्टिः** कलासंख्याभेदयोर्बह्वृचिस्त्रियां **नारकीटो**ऽश्म
कीटेस्यात्स्वदत्ताशाविहंतरि ६२ **परपुष्टः** परभृतेवारनार्यांतु
योषिति **प्रतिकृष्टं** मतंगुह्येद्विराहृत्याचकर्षिते ६३ **प्रतिसृष्टः**
प्रेषितेस्यात्प्रत्याख्यातेचवाच्यवत् **वर्करीटो** कटाक्षेस्यात्तरुणादि
त्यरोचिषि ६४ नारीपयोधरोत्संगकोतदंतनखक्षते **शिपिवि**
**ष्टः** स्तुखलतौशिवेदुश्चर्मणिस्मृतः ६५ अथ**श्रुतिकटः** प्रांचल्लो
हेःह्येपापशोधने ॥**टपंच**॥ **दशनोच्छिष्टः** पुंसिस्यान्निः
श्वासाधरचुंबयोः ६६ ॥**इतिटांतवर्गः**॥**ठेकं**॥ **ठो** मंडले
चंद्रबिंबेशून्येचलोकगोचरे ॥**ठद्वि**॥ **कठो** मुनौतदाख्यातवे
दाध्येतृकयोःस्वरे १ **कंठो** गलेसन्निधानेध्वनौमदनपादपे **का**
**ष्ठा** दारुहरिद्रायांकालमानप्रकर्षयोः २ स्थानमात्रेदिशिचस्त्री
दारुणिस्यान्नपुंसकं **कुष्ठं** रोगेपुष्करेस्त्री**कुंठो** कर्मण्यमूर्खयोः
३ **कोष्ठः** कुसूलेचात्मीयेमध्येकुक्षौगृहस्यच **गोष्ठं** गोस्थानके
**गोष्ठी** सभासंलापयोःस्त्रियां ४ **ज्येष्ठः** श्रेष्ठेऽतिवृद्धेचत्रिषुमासां
तरेपुमान् **ज्येष्ठा** तुगृहगोधाख्यजतुनक्षत्रभेदयोः ५ **निष्ठा**
निष्पत्तिनाशांतयाच्ञानिर्बर्हणेषुच **प्रष्ठ** स्त्रिषुग्रगेश्रेष्ठेपुंसि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चांडालिकौषधौ ६ **पाठश्च**पठनेऽन्यातेविद्धपर्ण्यांतुयोषिति ॥
**पृष्ठं**चरममात्रेपिदेहस्यावयवांतरे ७ **वंठः**स्यादकृतोद्वाहेखर्वे
कुंताऽऽयुधेपिच **शठो**मध्यस्थपुरुषेधूर्तधुस्तूरयोरपि ८ **श्रेष्ठो**
वरेकुबेरेच**शौठो**मूर्खेऽलसेपिच **षष्ठी**कात्यायनीतिथ्योस्त्रिषु
षण्णांचपूरणे ९ **हठः**स्यात्प्रसभेपृश्न्यां**हेठो**बाधाविहेठयोः ॥
॥ ॥ठत्रि॥ ॥ **अपष्ठु**पुंसिकालेचवामेस्यादन्यलिंगकः १०
**अंबष्ठो**देशभेदेपिविप्राद्वैश्यासुतेपिच **अंबष्ठा**चाम्ललोण्यांस्या
त्पाठायूथिकयोरपि ११ **कमठः**कच्छपेपुंसिभांडभेदेनपुंसकम् ॥
**कनिष्ठो**ऽतियुवाल्पानुजेस्त्रीदुर्बलांगुलौ १२ **जरठः**कर्कशेपां
डौकठिनेप्यभिधेयवत् **नर्मठ**श्चिबुकेषिड्गेप्रतिष्ठागौरवेस्थितौ
१३ स्थानेचयागनिष्पत्तिचतुरक्षरपद्ययोः **प्रकोष्ठो**मणिबंधस्यकू
र्परस्यांतरेपिच १४ भूपकस्यांतरेपिस्या**द्वरिष्ठं** मरिचेपिच ॥
ताम्रेक्लीबंतित्तिरौनावरोत्तमयोस्त्रिषु १५ **मकुष्ठो**व्रीहिभेदे
नामंथरेपुनरन्यवत् **लघिष्ठो**ऽत्यल्पकेभेले**वैकुंठः**कृष्णशक्र
योः १६ **श्रीकंठो**देशभिच्छंभे**साधिष्ठो**ऽतिदृढार्थयोः ॥ठचतुः
॥ **कलकंठः**कलध्वानेहंसेपारावतेपिके १७ **कालकंठश्च**
दात्यूहेकलविंकेचखंजने मयूरेपीतशालेचस्यात्खंडपरशौपुमान्
**कालपृष्ठं**कर्णचापेपुंसिकंकविहंगमे स्या**द्धतशठो**जंबीरेकपि
त्थेकर्मरंगके १९ नागरंगेपिचपुमान्स्याज्ज्ञांगेर्यांतुयोषिति **पू**
**तिकाष्ठं**चसरलदेवदारुमहीरुहोः २० **सूत्रकंठः**पुमान्विप्रे
खंजरीटकपोतयोः **हारिकंठः**पिकेपुंसिहारान्वितगलेत्रिषु २१
॥ ॥इतिठांतवर्गः॥ ॥डैकं॥ **डः**पुमान्वाडवाग्नौस्या
डाकिन्यांस्त्रीनिगद्यते ॥**डद्वि**॥ **अंडं**मुष्केचपेश्यांस्या**दिडा**तु
बुधयोषिति १ सौरभेय्यांचवचनेवसुमत्यामपिस्त्रियाम् **कांडः**
स्तंबेतरुस्कंधेबाणेऽवसरनीरयोः २ कुत्सितेवृक्षभिन्नाडीवृंदे
रहसिनस्त्रियाम् **क्रीडा**केलिप्रकारेस्यात्खेलावज्ञानयोरपि ३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुंडमस्त्र्यालयेमानभेदेदेवजलाशये कुंडीकमंडलौजारात्प
तिवत्नीसुतेपुमान् ४ पिठरेतुननास्क्ष्वेडोध्वनौकर्णामयेविषे
क्ष्वेडा वंशशलाकायांसिंहनादेचयोषिति ५ लोहितार्कपर्णफ
लेघोषपुष्पेनपुंसकम् दुरासदेचकुटिलेवाच्यलिंगःप्रकीर्तितः ६
क्रोडःशनौसूकरेनानपुमानंकरक्षसोः खेडोस्त्रीशकलेनेत्रवि
कारमणिदोषयोः ७ खंडःपानांतरेभेदेगंडःस्यात्पुंसिखड्गिनी
ग्रहयोगप्रभेदेचवीथ्यंगेपिटकेपिच चिन्हवीरकपोलेषुहयभूष
णबुद्बुदे गडुः पृष्ठगुडेकुब्जेगडोमीनांतरायचोः ९ गुडःस्या
द्गोलकेहस्तिसंन्नाहेक्षुविकारयोः गुडास्नुह्यांचकथितागुडिका
यांचयोषिति १० गोंडःपामरजातौचवृद्धनाभौचतद्वति चंडो
नातित्तिडीवृक्षेयमकिंकरदैत्ययोः ११ चंडाधनहरीशंखपुष्यो
स्त्रियातिकोपने चंडीकात्यायनीदेव्यांहिंस्रकोपनयोषितोः १२
तीव्रेपिचूडावडभौशिखायांबाहुभूषणे चोडःप्रावरणेभून्निदेश
भेदेजडास्त्रियां १३ शूकशिंब्यांहिमग्रस्तमूकाप्रज्ञेषुतुत्रिषु ता
डस्तुताडनेघोषमुष्टिमेयतृणादिषु १४ ताडीपत्रद्रुमेत्वाथद्रं
डोःस्त्रीलगुडेपुमान् व्यूहभेदेप्रकांडेःश्वकोपाभंथानयोरपि १५
सैन्येकालेमानभेदेचंडांशोःपारिपार्श्विके दमेयमेऽभिमानेच ना
डीनालेव्रणांतरे १६ शिरायांगंडदूर्वायांचर्यायांकुहनस्यच त
थाषट्क्षणकालेपिनीडंस्यानकुलायचोः १७ पंडःषंढेथिपि
स्त्रीस्यात्पांडुर्नानृपतौसिते पिंडोबोलेबलेसांद्रेदेहागारैकदे
शयोः १८ देहमात्रेनिवापेचगोलसिल्हकयोरपि ओड्रपुष्पेच
पुंसिस्यात्क्लीबमाजीवनायसोः १९ पिंडीतुपिंडीतगरेऽलाबु
खर्जूरभेदयोः पीडारूपाशिरोमालाऽपमर्दसरलद्रुषु २० भांडं
पात्रेवणिङ्मूलधनेभूषाश्वभूषयोः मंडः पंचांगुलेशाकभेदे
क्लीबंतुमस्तुनि २१ आमलक्यांस्त्रियांमंडाःथाःस्त्रियांसा
रपिच्छयोः मुंडोदैत्यांतरेराहुग्रहेनामुंडितेत्रिषु २२ मुंडा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुंडीरिकायांस्यात्स्त्रियामस्त्रीतुमूर्द्धनि रंडा मूषिकपर्ण्यांच
विधवायांचयोषिति २३ रोडुः क्षोदेभवेत्पुंसितृप्तेतुवाच्यलिं
गकः रंडातुपांसुलायांस्त्रीत्रिषुहस्तादिवर्जिते २४ व्याडो
हिंस्रपशौसर्पेशुंडापानगृहेमता अप्यंबुहस्तिनीवेश्याहस्ति
हस्तसुरासुच २५ शौंडोमत्तेचविख्यातःपिप्पल्यांचभवेत्स्त्रि
यां षंडंपद्मादिसंघातेनस्त्रीस्याद्गोपतौपुमान् २६ ॥ डत्रि
॥ करंडोमधुकोशासिकारंडेषुदलाढके कूष्मांड्युमायांस्त्री
पुंसिकर्कारौचगणांतरे २७ भ्रूणांतरेऽथकोदंडंचापेनानीवृदं
तरे भुज्यथोगरुडस्वेडमंत्रेमरकतेपिच २८ तरंडोवडि
सीसूत्रबद्धकाष्ठादिकेप्लवे नौकायामपिस्त्रीस्यात्तिंतिडीहिं
बचिंचयोः २९ द्राविडोदेशभिज्जातेसंख्याभिहृदमुख्ययोः
निर्गुंडीनीलशेफाल्यांसिंधुवारद्रुमेपिच ३० प्रचंडोदुर्वहे
श्वेतकरवीरेप्रतापिनि प्रकांडोनस्त्रीविटपेमूलशाखांतरेतरोः
॥३१ शस्तेपिचंडउदरेपशोरवयवेपुमान् पूत्यंडोगंधकीटेपि
तथाजंत्वंतरेपुमान् ३२ वरंडोव्यंतरेवेदीसमूहमुखरोगयोः
वारुंडोद्वारपिंड्यांस्त्रीफणीनांराजकेपुमान् ३३ नस्त्रियांसे
कपात्रेचमलेक्ष्णःश्रवणस्यच भेरुंडादेवताभेदपक्षिण्यंतरयोः
स्त्रियां ३४ भयानकेवाच्यवत्स्यान्मार्तंडःक्रोडसूर्ययोः मा
रुंडोऽडेभुजंगीनांमार्गेगोमयमंडले ३५ वरंडासारिकावर्त्ति
शास्त्रभेदेचयोषिति वितंडावादभेदेस्यात्कचीशाकेशिलाह्वये
३६ करवीर्यामपिस्त्रीस्याच्छिखंडोवर्हचूडयोः शरंडस्तुपुमान्भू
र्तेशरटेभूषणांतरे ३७ ॥ डचतुः ॥ अपोगंडस्तुवलिभेवि
कलांगेशिशावपि अतिगंडोयोगभेदेवृहद्गंडेतुवाच्यवत् ३८
चक्रवाडोऽद्रिभेदेस्याच्चक्रवाडंतुमंडले जलरुंडोजलाव
र्त्तेपयोरेण्वौभुजंगमे ३९ देवताडःसैंहिकेयेजीमूतेचहुताशने
अथवातहुडावात्याराजशोणितयोरपि ४० पढ्ढिलस्फोटि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कायांचवामायामपियोषिति॥ ॥इतिडांतवर्गः॥५९॥ढैके॥
ढोढक्कायांपुमानुक्तःशुनितस्यचलांगुले॥ ॥ढद्वि॥ गूढंरह
सिगुह्येचनहूपोःसंवृतेत्रिषु १ दृढंस्थूलेनितांतेचप्रगाढेबलव
त्यपि माढिःस्त्रीपत्रपंक्तौचदैन्यस्यापिप्रकाशने २ मूढस्तु
तंत्रितेबालेराढा स्त्रीशुद्धपुंभयोः रूढंजातेप्रसिद्धेचबाढंदृ
ढप्रतिज्ञयोः ३ व्यूढःसंहतविन्यस्तपृथुलेष्वभिधेयवत् वो
ढानाभारिकेसूते शूढःस्यात्पुंसिगोपतौ ४ आकृष्टोडेवर्षवरे
तृतीयाप्रकृतावपि षोढातितिक्षासंयुक्तेशक्तेचाप्यभिधेयवत् ५
॥ढत्रि॥अध्यूढाकृतसापत्न्यनार्यामध्यूढईश्वरे आषाढो
व्रतिनांदंडेमासेमलयपर्वते ६ स्त्रीपूर्णिमायामालीढेपादन्या
सेशितेत्रिषु उदूढं ऊढेस्थूलेस्यादुपोढोनिकटोढयोः ७
प्रगाढःकृच्छ्रदृढयोःप्रमीढोमूत्रितेघने प्ररूढोजठरेबद्धमूले
वारूढइत्ययं ८ वस्त्रांचलेकपाटेऽग्नौपंजरेशबलेपिच वि
रूढोंकुरितेजातेविगूढोगर्हितेपिच ९ गुप्तेपित्रिषुसंरूढःप्रो
ढेसांकुरितेत्रिषु समूढःपुंजितेभुग्नेसद्योजातेनुपप्लुते १०॥ ॥
ढचतुः॥अध्यारूढंसमारूढेऽप्यधिकेचाभिधेयवत् खट्वा
रूढःश्रितेखट्वामविनीतेचवाच्यवत् ११ प्रत्यालीढंतुचर
णन्यासभेदेशितेत्रिषु ॥ इतिढांतवर्गः ॥ णैकम् ॥ णःपु
मान्बिंदुदेवेस्याद्भूषणेगुणवर्जिते पानीयनिलयेपीतिकेचिद्
चुर्विपश्चितः १ ॥ णद्वि॥ अणुर्व्रीहिविशेषेस्यात्पुंसिसूक्ष्मे
भिधेयवत् अणिराणिवदस्राग्रकीलाश्रिसीमसुद्वयोः २ उ
ष्णोग्रीष्मेपुमान्दक्षाशीतयोरन्यलिंगकः ऊर्णामेषादिलोम्नि
स्यादंतरावर्तकेभ्रुवोः ३ कर्णःपृथाज्येष्ठसुतेसुवर्णालौश्रुता
वपि क्षणःपर्वोत्सवव्यापारेशुमानेऽप्यनेहसः ४ कणाजीरक
कुंभीरमक्षिकापिप्पलीषुच कणोऽतिसूक्ष्मेधान्यांशेकाणःका
केकचक्षुषोः ५ कीर्णंछन्नेचविक्षिप्तेहिंसितेप्यभिधेयवत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुणि स्तुन्नकवृक्षेनाकुकरेत्वभिधेयवत् ६ कृष्णःसत्यवतीपु
त्रेवायसेकेशवेऽर्जुने कृष्णास्याद्द्रौपदीनीलीकणाद्राक्षासुयोषि
ति ७ मेचकेवाच्यलिंगस्यात्क्लीबेमरिचलोहयोः कोणोवाद्य
प्रभेदेस्याद्वीणादीनांचवादने ८ एकदेशेगृहादीनामस्रौचल
गुडेपिच गणःप्रथमसंख्यौघेचंडासैन्यप्रभेदयोः ९ गुणो
मौर्व्यामप्रधानेरूपादौसूदइंद्रिये त्यागशौर्यादिसत्वादिसंध्याद्यावृत्ति
रज्जुषु १० शुक्लादावपिरत्यांचगेष्णुर्नागायनेनटे घ्राणं
क्लीबंनासिकायांघ्रातेस्याद्वाच्यलिंगकं ११ घृणाजुगुप्साकृप
योरथचूर्णीकपर्दके चूर्णोधूलीक्षारभेदेचूर्णानिवासयुक्तिषु १२
जर्णश्चंद्रेचवृक्षेचजिष्णुर्वासवेऽर्जुने जित्वरेवाच्यवज्जीर्णं
परिपक्वपुराणयोः १३ कूणिःकमुकभेदेपिदुष्टदैवश्रुतौस्त्रियां
त्राणं तुत्रायमाणायांरक्षणेरक्षितेत्रिषु १४ तीक्ष्णंसामुद्रल
वणेविषलोहाजिमुष्कके क्लीबंजवाग्रजेपुंसितिग्मात्मत्यागिनो
त्रिषु १५ तूणीनील्यांनिषंगेनातृष्णास्यात्तर्षलिप्सयोः दी
र्णोविदारितेभीतेद्रुणं चापेऽलिनिद्रुणः १६ द्रुणीतुद्रोणीक
च्छप्योर्देष्णु र्दातरिदुर्गमे द्रोणोऽस्त्रियामाढकेस्यादाढवाप
चतुष्टये १७ पुमान्कृपीपतौदग्धकाकेस्त्रीनीवृदंतरे तथाका
ष्ठांबुवाहिन्यांगवादीनामपीष्यते १८ पणोवराटमानेस्या
न्मूल्येकार्षापणेग्रहे क्रैव्यशाकादिकाद्यूतव्यवहारेभृतौधने
१९ पर्णंपत्रेकिंशुकेनापार्ष्णिस्यादुन्मदस्त्रियां स्त्रियांतुयोःसै
न्यपृष्ठेपादग्रंथ्यधरेपिच २० प्राणोहन्मारुतेवालेकाव्यजीवेऽ
निलेऽबले पुल्लिंगःपूरितेवाच्यलिंगःपुंभूम्निचासुषु २१ पूर्णं
शक्तेसमग्रेनापूरितेत्वभिधेयवत् फाणिर्गुडेकरंबेचस्त्रियांवा
णीतुयोषिति २२ व्यूतावपिसरस्वत्यांभ्रूणःस्त्रीगर्भडिंभयोः
मणिःस्त्रीपुंसयोरश्मजातौमुक्तादिकेपिच २३ कंठदेशेस्त
नेजायालिंगाग्रेऽलिंजरेपिच मोणःशुष्कफलेनक्रमक्षिकाःद्वि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करंडयोः २४ **रणः** कोणेक्वणेपुंसिसमरेपुनपुंसकं **रेणुः** स्त्रीपुं
सयोर्धूलौपुल्लिंगपर्पटेपुनः २५ **वर्णो** द्विजादिशुक्लादियशोगुण
कथासुच स्तुतौनानस्त्रियांभेदरूपाक्षरविलेपने २६ **बाणः** स्या
द्गोस्तनेदैत्यभेदेकेवलकांडयोः **बाणा**तुबाणमूलेस्त्रीनीलझिं
ट्यांपुनर्द्वयोः २७ **वीणा** विद्युतिवल्लक्यां**तृष्णि**ःपांडवचंद्रयोः
त्रिषुनायादवेमेषे **वेणी** केशस्यबंधने २८ नद्यादेरंतरेदेवता
ले **वेणु**र्नृपांतरे त्वक्सारेपिचपुंसिस्या**च्छाणो**मासचतुष्टये
२९ लोहादीनांचनिकषे **शाणो** प्रावरणांतरे **श्राण**पक्वेयवाग्वां
स्त्री**शीर्णं** तनुविशीर्णयोः ३० **श्रेणिः** स्त्रीपुंसयोःपंक्तौसमान
शिल्पिसंहतौ **शोणः** कृशानौश्योनाकेलोहिताश्वेनदेपुमान् ३१
त्रिषुकोकनदच्छाये**स्थाणुः** कीलहरेपुमान् अस्त्रीध्रुवेः**स्थूणा**
स्यात्सूर्म्यांस्तंभेगृहस्यच ३२ ॥**णत्रि**॥ **अरुणो**ऽव्यक्तरागे
ऽर्केसंध्यारागेऽर्कसारथौ निःशब्देकपिलेकुष्ठभेदेनागुणिनि
त्रिषु ३३ **अरुणा**ऽतिविषाश्यामामंजिष्ठात्रिवृतासुच **अर
णि**र्वह्निमंथेनाद्वयोर्निर्मंथ्यदारुणि ३४ **अभीक्ष्णं** तुभृशेनि
त्यतद्युक्तक्रिययोस्त्रिषु **इंद्राणी** करणंस्त्रीणांपौलोमासिंधुवारयोः
३५ **ईरिणं** तूषरेशून्ये **पीक्षणं** दर्शनेदृशि **ऊषणं** मरिचेक्लीबं
कणायां**मूषणा**स्त्रियाम् ३६ **एषणी** व्रणमार्गानुसारिण्यांच
तुलाभिदि **करुण**स्तुरसेवृक्षेकृपायां**करुणा**मता ३७ **क**
**तृणं**तृणभित्पृश्न्योः **करणं** हेतुकर्मणोः वणिजादौहस्तलेप
नृत्यगीतप्रभेदयोः ३८ क्रियाभेदेंद्रियक्षेत्रकायसंवेशनेषुच का
यस्थेसाधनेक्लीबंपुंसिशूद्राविशोःसुते ३९ **कल्याण**मक्षपस्व
र्णमंगलेपिनपुंसकं **कंकणं** करभूषायांसूत्रमंडनयोरपि ४०
**करेणु**र्गजयोषायांस्त्रियांपुंसिमतंगजे **कार्मणं** मंत्रतंत्रादि
योजनेकर्मठेपिच ४१ **काकिणी**पणतुर्यांशेमानदंडेचदृश्यते
कृष्णलैकवराटयोःस्याद्द्यानस्यांशकेपिच ४२ **कारणं** कर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णेहेतुवधयोश्चनपुंसकं स्त्रीयातनायांकुर्वाणो भृत्यकार
कयोस्त्रिषु ४३ कृपाणः खड्गेच्छुरिकाकर्त्तयोरपियोषिति कृ
पणस्तुक्रमौपुंसिमंदकुत्सितयोस्त्रिषु ४४ क्षेपणं प्रेरणेनौका
दंडजालभिदोः स्त्रियां ग्रहणं स्वीकारादरकरोपरागोपलब्धि
वेदिषु ४५ स्याद्ग्रामणीः प्रधानेऽधिपतौत्रिषुनापितेपुंसि
ग्रामीणानीलिकायांस्त्रीग्रामोद्भूतेऽभिधेयवत् ४६ गोकर्णो
ऽश्वतरेसर्पसारंगेचगणांतरे अंगुष्ठानामिकोन्मानेगोकर्णीमू
र्विकौषधौ ४७ चरणोऽस्त्रीबह्वृचादौमूलेगोत्रेपदेपिच भ्र
मणे भक्षणेचापिनपुंसकउदाहृतः ४८ जरणं जीरकेऽजा
जीहिंगुसौवर्चलेपिच तरुणं कुब्जपुष्पेनारुबुकेपूनितुत्रिषु
४९ तरणि र्द्युमणौपुंसिकुमारीनौकयोः स्त्रियां दक्षिणो दक्षि
णोद्भूतसरलछंदवर्त्तिषु ५० आरामेत्रिषुयज्ञादिविधिदानेदिशि
स्त्रियाम् द्रविणं नद्वयोर्वित्तेकांचनेचपराक्रमे ५१ दारुणो
रसभेदेनात्रिषुतुस्याद्भयावहे द्रुघणो मुद्गरेपिस्यातद्रुहिणेचप
रश्वधे ५२ दुर्वर्णं त्रिष्वसद्वर्णेक्लीबमेलेयरूप्ययोः दौर्वाणं
मृष्टपर्णेस्याद्दूर्वायांस्वरसेपिच ५३ धर्मणस्तुपुमान्वृक्षभेदस
र्पप्रभेदयोः धरणं मानभेदेपिधारणे धरणी भुवि ५४ ध
र्षणंस्यात्परिभवेरतेऽसत्यांतुधर्षिणी धरुणः सम्मतेनीरेस्व
र्ल्लोकेपरमेष्ठिनि ५५ धारणी नाडिकायांस्याद्बुद्धोक्तमंत्रभि
द्यपि धारणांगेचयोगस्यनपुंसिस्याद्धूधारणे ५६ धिषणा
स्त्रिदशाचार्ये धिषणा धिपियोषिति निःश्रेणिरधिरोहिण्यांख
र्जूरीपादपेस्त्रियाम् ५७ निर्याणं वारणापांगदेशेमोक्षेध्वनिर्गमे
निर्माणं निर्मितौसारेसमंजसेनपुंसकं ५८ निर्वाण मस्तंगम
नेनिर्वृत्तौगजमज्जने संगमेप्यपवर्गेच प्रवणो नाचतुष्पथे ५९
क्रमनिम्नमहीभागोदरप्रव्हेषुचत्रिषु प्रघण स्ताम्रकुंभेस्याद
लिंदेलोहमुद्गरे ६० प्रमाणं नित्यमर्यादाशास्त्रेषुसत्यवादिनि

For Private and Personal Use Only

द्यूतायांचदैत्येचक्लीबैकत्वेप्रमातरि ६१ **फ्तोर्णं**धौतकौशे
येक्लीबंस्याच्छोणकेपुमान् **पक्षिणी**पूर्णिमायांस्याद्विहंगपाश
किनीभिदि ६२ आगामीवर्त्तमानाहर्युक्तरात्रावपिस्त्रियां **प्र**
**वेणिः**स्त्रीकुथावेण्योः **पुराणं**पंचलक्षणं ६३ पणेपुंसित्रिषु
प्रलेपूरणः पूरकेत्रिषु क्लीबंपिंडप्रभेदेचपूरणीशाल्मलिद्रुमे
६४ पटारंभकसूत्रेषुप्रोक्षणंसेचनेवधे **वरुण**स्तरुभेदेऽम्बु
पश्चिमाशापतावपि ६५ **वरुण**स्तुपुमान्तिक्तशाकप्राकारयो
रपि क्लीबंकन्यादिवरणेवेष्टनेस्त्रीनदीभिदि ६६ **वारणं**प्र
तिषेधेस्याद्वारणस्तुमतंगजे **ब्राह्मणं**ब्रह्मसंघातेवेदभागेन
पुंसकं ६७ भूमिदेवेतुपुल्लिंगःस्पृक्कापृक्कयोःस्त्रियाम् **वा**
**रुणी**गंडदूर्वायांप्रतीचीसुरयोरपि ६८ **भरणी**घोषकेऽक्षे
**भरणं**वेतनेभृतौ **श्रमणी**कारुंडिकायांक्रीडाद्यायामधीशितुः
६९ **भीषणो**रसेसल्लक्यांनागाढेदारुणेत्रिषु **मसृणो**ऽक
र्कशेस्निग्धेत्रिषूमायांतुयोषिति ७० **मत्कुणो**निर्विषाणेभेनिः
श्मश्रुपुरुषेपिच उद्दंशेनालिकेरेच**मार्गणो**याचकेशरे ७१
याञ्चान्वेषणयोःक्लीबं**यंत्रणं**रक्षणेस्मृतं बंधनेस्यान्नियमने
**रवणः**शब्दनेखरे ७२ **रमणं**पटोलमूलेनायंस्त्रीनाधवेस्म
रे **रोषणः**पारदेहेमघर्षणोपलयोःपुमान् ७३ क्रोधनेवाच्यलिं
गःस्या**द्रोहिणी**कंठरुग्भिदि तडित्कटुंभरासोमवल्केषुलो
हितागवोः ७४ **लवणं**सैंधवादौनासिंधुरक्षोभिदोरसे तद्यु
क्तेवाच्यलिंगःस्यान्नदीभेदद्विषोःस्त्रियाम् ७५ **लक्षणं**नाम्नि
चिन्हेचसारस्यांलक्षणाक्वचित् **लक्ष्मणा**त्वौषधीभेदेसारस्या
मपियोषिति ७६ रामभ्रातरिपुंसिस्यात्सश्रीकेचाभिधेयवत्
**विषाणी**क्षीरकाकोल्यांअजशृंग्यांचयोषिति ७७ कुष्ठनामौ
षधेक्लीबंपशुशृंगेभदंतयोः **विपणिः**पण्यवीथ्यांचभवेदाप
णपण्ययोः ७८ **शरणं**गृहरक्षित्रोर्वधरक्षणयोरपि श्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्णंचश्रुतौकर्णेनक्षत्रेननपुंसकं ७९ श्रमणोयतिभेदेनानिंद्य
जीविनितुत्रिषु स्त्रियांसुदर्शनामांस्योर्मुंडीरीशबरीभिदोः ८०
श्रावणोमासिपाषंडेद्ध्याल्यांश्रावणास्त्रियां शिंघाणंका
चपात्रेचलोहनासिकयोर्मले ८१ श्रीपर्णीकाश्मरीकुंभ्योः
क्लीबंपद्माग्निमंथयोः संकीर्णं निचितेपिस्यादशुद्धेचापिभे
द्यवत् ८२ सरणिःपंक्तौमार्गेचसारणोराक्षसांतरे रुग्भे
देनाप्रसारण्यांस्वल्पनद्यांचसारणी ८३ सुषेणःकरमर्दे
स्याद्विष्णुसुग्रीववैद्ययोः सुवर्णोनास्वर्णकर्षेसुवर्णान्नुम
स्वांतरे ८४ श्रीकृष्णागुरुणिक्लीबेकांचनेहरिचंदने सुपर्णः
स्वर्णचूडेचगरुडेकृतमालके ८५ सुपर्णाकमलिन्यांचवैन
तेयस्यमातरि हरेणुर्नासतीलेस्त्रीरेणुकाकुलयोषितोः ८६
हरणंयौतकादीनांद्रव्येभुजेहृतावपि हरिणःपुंसिसारंगे
विषदेत्वभिधेयवत् ८७ हरिणीहरितायांचनारीभिद्वृत्त
भेदयोः सुवर्णप्रतिमायांचहर्षणोऽक्षिरुगंतरे ८८ हर्षके
योगभेदेचश्राद्धदेवेपिचक्वचित् हिरण्यंरेतसिस्वर्णेवराटेचनपुं
सकम् ८९ ॥णचतुः॥ अंगारिणीहसंत्यांचभास्करस्य
क्तदिश्यपि अथर्वणिर्नाऽथर्वज्ञब्राह्मणेचपुरोधसि ९०
अतर्पणंप्रीणनेस्यान्मंगलालेपनेपिच आरोहणंस्यात्सो
पानेसमारोहेप्ररोहणे ९१ उत्क्षेपणंतुव्यजनेधान्यमर्दनव
स्तुनि स्यादुद्धरणमुद्धारवांतान्नोन्मूषलेष्वपि ९२ कार्षा
पणोःस्त्रीकार्षिकेपणषोडशकेपिच अथकामगुणोरागे
विषयाभोगयोरपि ९३ चीर्णपर्णंतुनिंबेपिखर्जूरीभूरुहेपु
मान् चूडामणिःशिरोरत्नेकाकचिञ्चाफलेपुमान् ९४
जुहुवाणोःपिचाध्वर्यावपिस्याज्जातवेदसि तंडुवीणःकीट
मात्रेबर्बरेतंडुलोदके ९५ त्रायमाणावार्षिकेस्त्रीरक्ष्यमाणे
ऽभिधेयवत् तैलपर्णीमलयजेश्रीवासेसिल्हकेपिच ९६

For Private and Personal Use Only

दाक्षायणीत्वपर्णायामश्विन्यादिषुतुस्त्रियां अथदेवमणि
र्भर्गेऽश्वावर्तेकौस्तुभेपिच ९७ नारायणोच्युतेभीरुगौर्योर्ना
रायणीमता अथोनिगरणंक्लीबंभोजनेस्याद्गलेपुमान् ९८
अथनिःसरणंमृत्युपायमोक्षेषुनिर्गमे स्यान्निस्तारणमुपाये
निस्तारेतरणेपिच ९९ निरूपणंस्यादालोकेविचारेचनिदर्शने
पर्वीणश्चपर्णस्यशिरायांसूतकेबले १०० पर्णचूर्णरसेपिस्या
त्पर्वीणंतुपर्वणि प्रवारणंनिषेधेस्यात्काम्यदानेचनद्वयोः
१ परीरणःस्यात्कमठेदंडेचपट्टशाटके परायणमभीष्टंस्या
त्तत्पराश्रययोरपि २ पर्वाणिःपुमान्धर्माध्यक्षवत्सरयोरपि
पारायणंसमासंगकार्त्स्न्येपारगतावपि ३ पीलुपर्णीबिंबिका
यांमूर्वायामोषधीभिदि अथपुष्करिणीचेभ्यांसरोजिन्यांजला
शये ४ मधुपर्णीतुगंभार्यांनीलिसंज्ञौषधावपि मीनीस्त्रीग
स्तुपल्लिगोदुर्दुरामेचखंजने १०५ रक्तरेणुस्तुसिंदूरपलाशको
रकेपुमान् रागचूर्णःपुमान्खदिरधावनेमकरध्वजे ६ रेरिहाण
स्तुपुंसिस्यान्महादेवेंबरेपिच लंबकर्णःस्मृतोकोठपादपेछगले
पिच ७ विदारणंविडंबेचभेदक्लीबंरणेद्वयोः अथवैतरणी
नद्यांप्रेतानांयातुमातरि ८ शरवाणिःशरमुखपापिष्टशरजीवि
नि पुमानथोशिखरिणीरसालावृत्तभेदयोः ९ नारीरत्नेमल्लि
कायांरोमावल्यामपिस्त्रियां अथसंमरणंक्लीबंजमसंबाधच
मूगतो १० घंटापथेचसंसारेरणारंभेचकुत्रचित् समीरणः
स्यात्पवनेपथिकेचफणिज्जके ११ हस्तिकर्णश्चोरुबूकेपलाश
गणभेदयोः ॥णपंच॥ अवग्रहणमित्येतत्प्रतिरोधेप्यना
दरे १२ अवतारणंभूतादिग्रहेवस्त्रांचलेर्चने प्रविदारण
माख्यातंसंपरायेऽवदारणे १३ परिभाषायांसनिंदोपालंभेनि
यमेपिच उत्कोमत्तवारणस्तुप्रक्लिन्नकटकुंजरे १४ क्लीबं
मासारवीथीनांकुंडरसस्तावपि मंडूकपर्णीमंजिष्ठाब्राह्म्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ण्योर्नातुशोणके १५ रोमहर्षणंरोमांचेनास्सूतेचविभीतके षा
तरायणउन्मत्तेनिष्प्रयोजनपूरुषे १६ कांडेचपरपत्रेचकूटेच
परसंक्रमे ॥ णषट् ॥ दोहदलक्षणभुक्तंवपःसंधौचगर्भे
च १७ यौवनलक्षणमख्यारव्यातंलावण्यकुचयोश्च ॥ ॥
॥इतिणांतवर्गः॥ तैकं॥ तश्चौरामृतपुच्छेषुक्रोडेम्लेच्छेचकु
त्रचित् अपुमांस्तरणेपुण्येकथितःशब्दवेदिभिः १ ॥ तद्वि॥
अस्तंक्षिप्तेप्यवसितेत्रिषुनापश्चिमाचले अंतंस्वरूपेनाशेना
नस्त्रीशेषेंऽतिकेत्रिषु २ आर्त्तिःपीडाधनुष्कोट्योःस्न्याप्तेलब्धे
स्वसत्तयोः आप्तिःस्त्रीयोगसंप्राप्त्योरितं स्मृतेगतेत्रिषु ३ इति
र्डिंबेप्रवासेतिरष्ट्यादिषट्सुचस्त्रियाम् उक्तमेकाक्षरछंदस्यु
क्तंस्याद्भाषितेत्रिषु ४ ऊतिःस्त्रीरक्षणेस्यूताऋतिःकल्याणव
र्त्मनोः जुगुप्सास्पर्द्धयोस्त्रीस्यादृतमुंछशिलेजले ५ सत्येदीप्तेपू
जितेस्या दृतुर्वर्षादिषट्सुच आर्तवेभास्विचपुमानेतःकर्बुरआ
गते ६ क्षत्ताशूद्राक्षत्रियजेप्रतीहारेचसारथौ भुजिस्यातन
येपिस्यान्नियुक्तवेधसोःपुमान् ७ कर्त्तातुकारकेवाच्यलिंगोनाप
रमेष्ठिनि क्रतुर्यज्ञेमुनौपुंसिकांतिःशोभेच्छयोःस्त्रियाम् ८ कां
तानार्याप्रियंगौस्त्रीशोभनेत्रिषुनाधवे लोहेचचंद्रसूर्यायःपया
यांतःशिलासुच ९ क्षिति र्निवासेमेदिन्यांकालभेदेक्षयेस्त्रिया
म् कीर्त्तिःप्रसादयशसोर्यौषित्कुंतौगवेधिकायांस्यात् १०
प्रासायुधेचकुंती गुग्गुलुपृथयोश्च शल्लक्यां कृतंयुगेऽलम
र्थेस्याद्विहितेहिंसितेत्रिषु ११ कृत्तं तुवेष्टितेछिन्नेकृतिःकारण
हिंसयोः कृत्तिश्चर्मत्वचोर्भूर्जेकृत्तिकायांहूयंस्त्रियाम् केतुर्नारु
कूपताकाऽविग्रहोत्पातेषुलक्ष्मणि गर्त्तस्त्रिगर्त्तभेदेस्याद्वटे
चकुकुंदरे १२ ग्रस्तं ग्रासीकृतेपिस्याल्लुप्तवर्णपदेपिच गतिः
स्त्रीमार्गदशयोर्ज्ञानियात्राभ्युपायपयोः १४ नाडीव्रणसरण्यां
चगतं विज्ञानयातयोः गातुर्नाकोकिलेभृंगेगंधर्वेत्रिषुरोषणे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१५ गीतिश्छंदसि गाने स्त्री गीतं शब्दितगानयोः गुप्तिः स्त्र्यव
करस्थाने कारागारे च रक्षणे १६ गुप्तं स्याद्रक्षिते गूढे घातः
कांडप्रहारयोः घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत् १७
चित्ते छन्ने त्रिषु चिता चित्यायां संहतौ स्त्रियाम् चितिश्चित्ते स्या
च्छंदयोः स्त्री जातं व्यक्तौघजन्मसु १८ क्लीबं त्रिलिंगमुत्पन्ने जा
तिः स्त्री गोत्रजन्मनोः अश्मंतिकामलक्योश्च सामान्यछंदसोरपि
१९ जाती फले च मालत्यां ज्ञातिस्तातसगोत्रयोः पुमानथ ततं
व्याप्ते विस्तृते च त्रिलिंगकं २० क्लीबं वीणादिवाद्ये स्यात्पुल्लिंग
स्तु समीरणे तातोनुकंप्ये जनके तिक्तो रससुगंधयोः २१ तिक्ता
तु कटुरोहिण्यां पर्पटे तु नपुंसकम् तूस्तं रेणौ च विख्यातं जटायां
च नपुंसकं २२ त्रेता युगेऽग्नित्रितये दत्तं विश्राणिते ऽर्चिते दं
तोऽद्रिकूटके कुंजे दशने ऽथौषधौ स्त्रियाम् २३ दांतस्तु दमि
तेपि स्यात्तपःक्लेशसहे त्रिषु दितिर्दैत्यजनन्यां च खंडनेपि च यो
षिति २४ दीप्तं निर्भासिते दग्धे ज्वलिते ऽथ द्रुतं त्रिषु शीघ्रे
विलीने विद्राणे द्युतिः स्त्री रश्मिशोभयोः २५ दृतिश्चर्मपुटे
मत्स्ये ना धातुर्नैद्रियेषु च शब्दयोनिमहाभूततद्गुणेषु रसादि
षु २६ मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिके स्त्रियां च धाता हिर
ण्यगर्भे ना पालके त्रिष्वथो धुतं २७ त्यक्ते विधूते धूतं तु कंपिते भ
र्त्सिते त्रिषु धूर्तं तु खंडलवणे धुस्तूरे ना विटे त्रिषु २८ धृतिर्नैष्ठे स्त्रि
यां तुष्टौ योगभिद्धैर्यधारणे नतं तगरपादयां स्यात्क्लीबं कुटिल नम्र
योः २९ त्रिषु नीतिर्नये पि स्यात्प्रापणेपि च योषिति पंक्तिः
स्त्री गौरवे पाके पत्तिर्नापदगे स्त्रियां ३० गतावेकरथैकेभत्र्य
श्वपंचपदातिके पंक्तिर्दशाक्षरं छंदो दशसंख्यालिषु स्त्रियाम्
३१ पतिर्धवे ना त्रिष्वीशे प्राप्तं लब्धे समंजसे पातो निपातने
त्राते त्रिषु प्राप्तिर्महोदये ३२ लाभेपि च स्त्रियां प्राप्तिः पूर्तिप्रा
देशयोः स्त्रियाम् प्रीतिर्ना ऽथ स्त्रियां पाने प्रीतं हृषितनर्मणोः ३३

पीतं पानेहरिद्रायांस्त्रियांगौरेऽभिधेयवत् प्रीति र्योगांतरेप्रे
म्णिस्मरपत्नीमुदोःस्त्रियाम् ३४ पुस्तं क्लीबेपुस्तकेचलेप्या
दिशिल्पकर्मणि प्लुतं तुरंगमगतौक्लीबंपुंसित्रिमात्रके ३५
पूतंत्रिषुपवित्रेचशीटितेबहुलीकृते पूर्त्तं त्रिषुपूरितेस्यात्क्ली
बंखातादिकर्मणि ३६ प्रोतं नपुंसकंवस्त्रेखचितेवाच्यलि
गकं प्रेतो भूतांतरेपुंसिमृतेस्याद्वाच्यलिंगकः ३७ पोतः
शिशौवहित्रेचगृहस्थानेचवाससि वृत्ति स्तुवरणेपिस्याद्वृ
ष्टेःपिचयोषिति ३८ भर्त्तास्वामिनिपुंसिस्यात्त्रिषुधातरिपोष्ट
रि भक्ति र्विभागेसेवायांस्त्रियांभ्रांति स्तुयोषिति ३९ मिथ्या
मतौचभ्रमणे भित्तिःकुड्यप्रदेशयोः भीति र्भयेस्त्रियांभीतं
भयेऽथभीयुतेत्रिषु ४० भूति र्भस्मनिसंपत्तौहस्तिशृंगारयोः
स्त्रियाम् भूतं क्ष्मादौपिशाचादौजंतौक्लीबंत्रिषूचिते ४१ प्रा
प्तेवृत्तेसमेसत्येदेवयोन्यंतरेतुना कुमारेपि भृतिःस्त्रीस्यान्मूल्ये
पिभरणेपिच ४२ मतंतुसन्मतेज्ञाते मतिःस्त्रीच्छादियोस्स्मृ
तौ मंतुःपुंस्यपराधेपिमनुष्येपिप्रजापतौ ४३ माता गोर्या
दिजननीगोब्राह्मण्यादिभूमिषु माति र्मानव्यवच्छेदे मुक्ति र्मो
क्षेचमोक्षणे ४४ मात्रादयःस्त्रियांमुक्तःप्राप्तमोक्षेचमोचिते
त्रिषुस्त्रीमौक्तिके मूर्त्तिःकायकाठिन्ययोःस्त्रियाम् ४५ मूर्त्तं
स्यात्त्रिषुमूर्छालेकठिनेमूर्तिमत्यपि मृतंतुयाचितेमृत्यौक्लीबंमृ
तुमतित्रिषु ४६ यतिःस्त्रीपादविच्छेदेनिकारयतिनोःपुमान्
यंता मेंठेचसूतेना युक्तिःस्त्रीन्याययोगयोः ४७ युतोयुक्ते
पृथग्भूतेक्लीबंहस्तेचतुष्टये रक्तो नुरक्तेनील्यादिरंजितेलोहिते
त्रिषु ४८ क्लीबंतुकुंकुमेताम्रेप्राचीनामलकेसृजि रतिः स्त्री
स्मरदारेनुरागेसुरतगुह्ययोः ४९ रत्नं वर्त्मनिनद्यांस्त्रीरतं
सुरतगुह्ययोः रिक्तं शून्येवने रीतिःस्त्रियांस्पंदप्रचारयोः ५०
पित्तलेलोहकिट्टेचलत्ताप्रियंगुशाकयोः रक्ताज्योतिष्मतीवल्ली

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लत्ताकस्तूरिकासु च ५१ माधवीदूर्वयोर्लिप्तं विलिप्तविष
दिग्धयोः भुक्ते लूतातूर्णनाभपिपीलिकागदांतरे ५२ वत्सा
तु जनके पुंसि वापकेप्यभिधेयवत् वक्ता तु पंडितेपि स्याद्वाग्मिन्य
प्यन्यलिंगकः ५३ व्यस्तं तु व्याकुले व्यासे व्यक्तः स्फुटमनीषि
णोः वस्तिर्द्वयोर्निरूहे नाभ्यधो भूम्नि दशासु च ५४ वर्त्ति भै
षजनिर्माणे नयनांजनलेखयोः गात्रानुलेपनीदीपदशादीपे
षु योषिति ५५ वार्ता तु वर्त्तने वार्तिगणे कृष्याद्युदंतयोः निः
सारारोग्ययोः क्लीबं वृत्तिर्मल्लीरुजोः स्त्रियां ५६ व्याप्तं ख्याते
समाक्रांते व्याप्तिर्व्यापनरंभयोः स्त्रियां वित्तिर्विचारे चला
भसंभावयोः स्त्रियां ५७ वित्तं क्लीबं धने वाच्यलिंगं ख्या
ते विचारिते वीतमसारगजे स्यादंकुशकर्मण्यसारतुरगेपि :
वीतिर्गतौ च दीप्तौ प्रजनाशनधा वनेषु स्त्री ५८ वृत्तिर्विव
रणाजीवकैशिक्यादिप्रवर्तने ५९ स्त्री वृतं प्रसवबंधे घ
टीधाराकुचाग्रयोः वृत्तोऽधीतेप्यतीते तिवर्तुलेपि वृते मृते ६०
दृढेऽन्यलिंगं वा क्लीबं छंदस्यारित्रवृत्तिषु शक्तिरस्त्रांतरे गौर्या
मुत्साहादौ बले स्त्रियां ६१ शस्तं क्षेमे प्रशस्ते च शांतिः स्त्री
मंगले शमे शास्ता समंतभद्रे ना शासने पुनरन्यवत् ६२ शां
तोऽभिषुक्तरसयोः पुंसि त्रिषु शमान्विते अव्ययं वारणे शांतं
शातं शितं च दुर्बले ६३ निशिते च शितिर्भूर्जे ना सितासित
योस्त्रिषु शीतं हिमगुणे क्लीबं शीतलालसयोस्त्रिषु ६४ वा
नीरे बहुवारे ना शुक्तं पूताम्लनिष्ठुरे श्रुतिः श्रोत्रे च तत्कर्म
ण्याम्नायवार्तयोः स्त्रियाम् ॥ ६५ शुक्तिः कपालशकले शंखे शं
खनखे पि च नख्यश्वावर्तदुर्नाममुक्तास्फोटेषु च स्त्रियां ६६
श्रुतमाकर्णिते शास्त्रे श्वेतो द्वीपाद्रिभेदयोः श्वेता वराटि
काकाष्ठपाटलाशंखिनीषु च ६७ क्लीबं रूप्येऽन्यवच्छुक्ले स
न्नाधो धीरशस्तयोः मान्ये सत्ये विद्यमाने त्रिषु साध्व्यमयोः स्त्रियां ६८

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नातिर्दानेऽवसानेस्त्रीस्वांतं चेतसिगह्वरे स्थितंप्रतिज्ञात
वतिचोर्ध्वनिश्चलयोस्त्रिषु ६९ स्थितिःस्त्रियामवस्थानेमर्यादा
यांचसीमनि सित मवसितेचबद्धेधवलेत्रिषुधवलायांस्त्री ७०
सीता लांगलपद्धतिवैदेहीस्वर्गगंगासु सुत स्तुपार्थिवेपुत्रं
स्त्र्यपत्येतुसुता स्मृता ७१ सुप्तिःस्पर्शाज्ञतानिद्राविश्रंभेशय
नेस्त्रियाम् सूत स्तुसारथौतस्त्रिक्षत्रियाद्ब्राह्मणीसुते ७२ वंदि
पारदयोःपुंसिप्रसूतेप्रेरितेत्रिषु स्यूतिःसीवनसंतत्योस्त्रियांस्यू
तःप्रसेवके ७३ नात्रिषूतेस्मृति र्धर्मशास्त्रस्मरणयोःस्त्रियां
सृतिःस्त्रीगमनेमार्गेसेतु र्नाऽलौकुमारके ७४ हस्तः करेकरि
करेसप्रकोष्ठकरेपिच ऋक्षेकेशात्परोप्राते हितं पथ्येगतेधृते
७५ हेतिःस्यादायुधज्वालासूर्यतेजःसुयोषिति ॥ तत्रि ॥
अमृतं यज्ञशेषेस्यात्पीयूषेसलिलेघृते ७६ अयाचितेचमोक्षे
चनाधन्वंतरिदेवयोः अमृता मागधीपथ्यागुडूच्यामलकीषुच
७७ अनृतं कृषावसत्येप्यजितो नाहरौत्रिषु अनिर्जितेचाच्युत
स्तुहरौपुंसित्रिषुस्थिरे ७८ अर्दितं याचितेपिस्याद्गतव्याधौच
हिंसिते अक्षतं नद्वयोःपंडेलाजेषुत्रिष्वहिंसिते ७९ यवेपि
क्वचिदव्यक्तो हरौस्मरहरेपुमान् परमात्ममहदाद्योःक्लीबं
स्यादस्फुटेत्रिषु ८० अनंतः केशवेशेषेपुमाननवधौत्रिषु
अनंता चविशल्यायांशारिवादूर्वयोरपि ८१ कणादुराल
भापथ्यापार्वत्यामलकीषुच विश्वंभरागुडूच्योःस्यादनंतंसु
रवर्त्मनि ८२ अभ्रांतमशुभेतुल्यांमरणोऽनवधावपि क्षे
त्रेप्यथाऽऽयतिःपुंसिहिमदीधितिकालयोः ८३ अर्हस्तु क्ष
पणेबुद्धेपुंसिमान्येऽन्यलिंगकः अर्हंतश्चापिसुगतक्षपणेपिच
दृश्यते ८४ अगस्तिः कुंभयोनौचवंकसेनतरौपुमान् अर्व
तीकुंभदास्यांचवडवायांचयोषिति ८५ अंगतिःपुंस्यग्निहो
तृब्रह्मवन्हिष्वथाऽदितिः भूदेवमात्रोरंहतिस्त्यागेरोगेप्युभे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रियौ ८६ आपातः पुंसि पतने तदात्वे च प्रकीर्तितः आघ्रा
तं शिंघिते क्रान्तेप्याख्यातं भाषिते तिङि ८७ आध्मातः श
ब्दिते दग्धे वातरुग्भेदसंयुते आप्लुतः स्नातके स्नाते ऽप्याहृतः
सादरेऽर्चिते ८८ आचितः शकटोन्मेये पलानामयुतद्वये पुल्लि
गः संगृहीते पिछन्नेपि स्यात्त्रिलिंगकः ८९ आहतं गुणिते चा
पि ताडिते च मृषार्थके स्यात्पुरातनवस्त्रेपि नववस्त्रे च नाऽनके
९० आनर्तो देशभेदेपि नृत्यस्थाने जले रणे आवर्तश्चिंतने वा
रिभ्रमे चावर्तने पुमान् ९१ आस्फोतं तु पुमानर्कपर्णे स्यात्को
विदारके आस्फोता गिरिकर्ण्यां च वनमल्ल्यां च योषिति ९२
आयस्तस्तेजिते क्षिप्ते क्लेशिते कुपिते हते आयतिस्तु स्त्रियां दै
र्घ्ये प्रभावागामिकालयोः ९३ आयत्तिस्तु स्त्रियां स्नेहे वशित्वे
वासवे बले आकृतिस्तु स्त्रियां रूपे सामान्यवपुषोरपि ९४
आसत्तिः संगमे लाभे स्त्रियामापत्तिरापदि प्रापणेपि च योषि
त्स्यादुदंतः साधुवार्तयोः ९५ उषितं व्युषिते दग्धेप्युदात्त
स्तु स्वरांतरे दयात्यागादिसंपन्ने काव्यालंकारकृत्ययोः ९६ उ
त्तप्तं शुष्कमांसेथ त्रिषु तप्ते परिप्लुते उचितं तु भवेन्यस्ते मिते ज्ञा
ते समंजसे ९७ उद्धूतं स्यात्त्रिषूत्क्षिप्ते परिभुक्तोज्झितेपि च उ
त्थितं स्यात्त्रिषूत्पन्ने प्रोद्यते वृद्धिमत्यपि ९८ उद्घातस्तु पुमा
न्स्यादुत्स्खलने समुपक्रमे पवनाभ्यासयोगस्य कालभेदे च कीर्ति
तः ९९ उत्तुंगे मुद्गरेपि स्यादुदितं तूक्त आगते उच्छ्रितं त्रिषु सं
जाते समुन्नद्धप्रवृद्धयोः १०० उन्मत्त उन्मादवति धूस्तूरमुचुकुं
दयोः उद्वांतो निर्मदगजे पुमानुद्गमिते त्रिषु १ एधतुः पुरुषे
ग्नौ ना कलितं विदिताप्तयोः कपोतः स्याच्चित्रकंठपारावतवि
हंगयोः २ आक्रंदितमाह्वाने रुदितेपि नपुंसकं क्षारितः
स्राविते क्षारे अभिशस्तेपि च त्रिषु ३ कापोता रुचके क्लीबे क
पोतो घंजनांतरे किरातो म्लेच्छभेदे स्याद्भूनिंबेऽल्पतनावपि ४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रियांचामरधारिण्यांकुट्टिनीदुर्गयोरपि कृतांतोयमसिद्धांतदै
वाकुशलकर्मसु ५ गर्जितं वारिवाहादिध्वनौनामत्तकुंजरे
ग्रंथितं गुंफितेक्वांतेहिंसितेचत्रिलिंगकम् ६ गभस्तिःकिरणे
सूर्येनास्वाहायांतुयोषिति गभ्युतिःस्त्रीस्वर्णलतयोर्गोपतिःशि
वषंढयोः ७ नृपभास्करयोःपुंसिचेष्टितं गतिचेष्टयोः जगत्
स्यात्पिष्टपेक्लीबंवायौनाजंगमेत्रिषु ८ जगतीभुवनेक्ष्मायां
छंदोभेदेजनेपिच जयंतोरुद्रभिद्गौर्यांरिंद्रपुत्रीपताकयोः ९
पुमानैंद्रौहरेभीमेज्वलितंदग्धउज्वले जामातादुहितुःपत्यौ
सूर्यावर्तेधवेपुमान् १० जीमूतःद्रौधृतिकरेदेवताडेपयोधरे
जीवातुरस्त्रियांभक्तेजीवितेजीवनौषधे ११ जीवंतीजीवनी
शम्योर्गुडूचीवृंदयोरपि जृंभितं करणेस्त्रीणामीहास्फोटितयो
रपि १२ त्वरितं प्रजवेशीघ्रेत्रिगर्तोगणितांतरे देशेपिनापु
त्रिकाकामुकांगनयोःस्त्रियां १३ तृणता धनुषितृणत्वे दं
शितमपिजातदंसितेपिस्यात् कवचाचितेद्विजातिर्विप्रांडज
योश्चपुल्लिंगः १४ दुर्जातं व्यसनेक्लीबेसम्यग्जातेऽन्यलिंगकं
दुर्गति र्नरकेनैस्व्येस्त्री दृष्टांतउदाहृतौ १५ शास्त्रेचमरणे
धीमान्पंडितेचबृहस्पतौ निर्ऋतिःस्यादलक्ष्म्यांस्त्रीदिशांपा
लांतरेपुमान् १६ निकृतं विप्रलंभेस्यान्नीचेविप्रकृतेपिच
निर्मुक्तस्त्यक्तसंगेस्यान्मुक्तकंचुकभोगिनी १७ निरस्तत्रिषु
निष्ठ्यूतेप्रेषितेशीघ्रितोदिते संत्यक्तेचप्रतिहतेनिमित्तंहेतुलक्ष्मणोः १८ नि
वातोदृढसन्नाहेवातशून्येपिचाश्रये निशांतंत्रिषुशांतेस्यात्क्लीबं
तुभवनोषसोः १९ निकृतिर्भर्त्सनेक्षेपेशठेशाठ्येपिचस्त्रियां निर्वृ
त्तिःसुस्थितावस्तंगमनेचसुखेस्त्रियां २० नियतिर्नियमेदैवेस्त्री
पतनूपातुगेखगे प्रहतंविततेक्षुण्णेपर्यस्तःपतितेहते २१ प्र
भूतमुद्गतेप्राज्येपंडितःसिल्हकेकवौ पलितंशैलजेतापे
केशपाकेचकर्दमे २२ प्रसृतःसुप्रसारेस्याद्विनीतेवेगितेत्रिषु अर्जुनेरे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुपुल्लिंगोजंघायांप्रसृतामता २३ प्रसूतं कुसुमेक्लीबंत्रि
षुसंजातसूतयोः प्रणीतः संस्कृताग्नौनायज्ञपात्रांतरेस्त्रियां
२४ त्रिषुक्षिप्तोपसंपन्नविहितेषुप्रवेशिते प्रतीतःसादरेज्ञाते
हृष्टप्रख्यातयोस्त्रिषु २५ प्रमीतं वाच्यलिंगंस्यात्प्रोक्षितेपि
मृतेपिच परेतो वाच्यलिंगःस्यान्मृतेभूतांतरेपुमान् २६ प
र्वतः पादपेपुंसिशाकमत्स्यप्रभेदयोः देवमुन्यंतरेशैले प्रपा
तो निर्झरे तटे २७ पर्याप्तंतुयथेष्टंस्यात्तृप्तौशक्तेनिवारणे पंचता
पंचभावेस्यान्मरणेपिचयोषिति २८ पक्षतिश्चभवेत्पक्षमूले
चप्रतिपत्तिथौ प्रसूतिरुद्भवेपिस्यात्तनयेदुहितर्यपि २९ प्रत
ति विस्तृतौवल्ल्यांपद्धतिःपंक्तिवर्त्मनोः प्रवृत्तिस्तुप्रवाहेस्या
दुदंतेचप्रवर्त्तने ३० आवंत्यादौचपर्याप्तिःप्रकामप्राप्तिरक्षणे
प्रकृतिर्गुणसाम्येस्यादमात्यादिस्वभावयोः ३१ योनौलिंगे
पौरवर्गेऽमीपक्षत्यादयःस्त्रियां पार्वती सल्लकीदुर्गागोपालु
त्रिकासुच ३२ प्रार्थितंयाचितेशत्रुसंरुद्धेभिहतेत्रिषु पि
त्सन्विहंगमेपुंसिपतनेक्लीबमन्स्त्रिषु ३३ पिशितं मांसेमांस्या
स्त्रीपिंडितं गुणितेघने पीडितंकरणेस्त्रीणांयंत्रितेबाधिते
पिच ३४ पुटितंस्याद्द्विपुटेपाटितस्यूतयोरपि पृषन्मृगेपु
मान्बिंदौनद्वयोःपृषतोपिना ३५ अनयोश्चत्रिषुश्वेतबिंदुयु
तेप्युनाविमौ प्रोक्षितंनिहतेसिक्ते बृहतीवसनांतरे ३६ छं
दोभित्क्षुद्रवार्ताकीवारिधानीषुवाचिच कंटकारीमहत्योश्च
भवद्बृषन्स्ततोस्त्रिषु ३७ स्त्रीबाणभेदेभरतोनाट्यशास्त्र
मुनौनटे रामानुजेचदौष्यंतौभास्वान्भास्वरसूर्ययोः ३८
भारतंग्रंथभेदेस्याद्वर्षभेदेऽथभारती वचनेचसरस्वत्यांप
क्षिवृत्तिप्रभेदयोः ३९ भासंतःसुंदराकारेत्रिषुनाभासपक्षि
णि भावितंवासितेप्राप्तेभूभृन्नाद्रौमहीपतौ ४० महती
वल्लकीभेदेरान्येस्यात्तुनपुंसकं तत्त्वभेदेपुमान्बृहद्वाच्यव

For Private and Personal Use Only

न्मथितंपुनः ४१ क्लीबंनिर्जलघोलेस्यात्त्रिष्वालोडितघृष्टयोः
मरुद्रुवेसमीरेनाग्रंथिपर्णेनपुंसकम् ४२ मुषितंहृतखंडि
तयोर्मूर्छितमपिसोच्छ्रयेचमूढेच रजतंत्रिषुशुक्लेस्यात्क्ली
बंहारेचदुर्वर्णे ४३ रमतिर्नायकेनाकेपुंसिस्याद्रसितंपुनः
रुतस्तनितयोःक्लीबंस्वर्णादिखचितेत्रिषु ४४ रेवतीहलिप
त्न्यांस्यात्ताराभिन्मातृभेदयोः रैवतस्तुसुवर्णालेशैलभेदेच
शंकरे ४५ रोहितंकुंकुमेरक्तेऋजुशक्रशरासने पुंसिस्या
न्मीनमृगयोर्भेदेरोहितकद्रुमे ४६ रोहिन्मृग्यांलताभेदेस्त्री
नार्केलललितंत्रिषु ललितेचशितेपिस्याद्धारभेदेतुनद्वयोः ४७
लोहितंरक्तगोशीर्षेकुंकुमेरक्तचंदने पुमान्नदांतरेभौमेवर्णेच
त्रिषुतद्वति ४८ वर्द्धितंप्रसितेछिन्नेपूरितेवर्द्धतिर्गवि सन्धिपुं
सिवहतुःपथिकेवृषभेपुमान् ४९ वनिताजातरागस्त्रीस्त्रि
योस्त्रिषुचयाचिते सेवितेवापितंबीजाकृतमुंडितयोस्त्रिषु ५०
वसतिःस्यात्स्त्रियांवासेयामिन्यांचनिकेतने व्यायतंव्यापृते
दीर्घेदृढेचातिशयेऽन्यवत् ५१ व्याघातोयोगभेदेस्यादंतरायप्र
हारयोः वासिताकरणीनार्योर्वासितंभाविते रुते ५२ वासंती
माधवीयूथ्योरुष्ट्रेनावहितेत्रिषु विविक्तंत्रिष्वसंपृक्तेरहःपू
तविवेक्तिषु ५३ वसुनंदेनाविहस्तःपंडितेव्याकुलेत्रिषु विनीतः
सुवहाश्वेस्याद्वणिज्यपिपुमांस्त्रिषु ५४ जितेंद्रियेऽपनीतेचनि
भृतेविनयान्विते विश्वस्तोजातविश्वासेविश्वस्ताविधवस्त्रिया
म् ५५ विद्युतद्विरितसंध्यायांस्त्रियांत्रिषुतुनिष्प्रभे विवृता
क्षुद्ररुग्भेदेविस्तृतेत्वभिधेयवत् ५६ विनेताःदेशकेराज्ञेना
विधातातुवेधसि स्मरेना विनता तार्क्ष्यजनन्यांपटकाभिदि
५७ विनतःप्रणतेभुग्नेशिक्षितेचाभिधेयवत् विकृतंत्रिषु
बीभत्सरोगितेसंस्कृतेपिच ५८ विच्छित्तिरंगरागेविच्छेदेहार
भेदेस्त्री विदितंबुद्धिलार्थितयोर्विपश्चिरपियातनापदोर्योषित्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५९ वृत्तांतः प्रक्रियायांस्यात्कार्त्स्न्येवार्त्ताप्रभेदयोः प्रस्तावेवेष्टि
तं हल्लीसकेकरणांतरे ६० वेल्लितं गमनेक्लीबंकुटिलेविधु
तेत्रिषु विवर्त्तः समुदायेस्यादपवर्तननृत्ययोः ६१ शकुंतः
कीटभेदेस्याद्भासपक्षिविहंगयोः श्रीमांस्तिलकवृक्षेनामनोज्ञ
तानकत्रिषु ६२ श्रीपतिःपुंसिपृथिवीनाथेचमधुसूदने शु
द्धांतोंतःपुरेस्माभृत्रहःकक्षांतरेपिच ६३ स्रवंती तुतरंगि
ण्यांगुल्मस्यानौषधीभिदोः संवर्तःप्रलयेमुन्यंतरेकर्षफलेपिच
६४ स्खलितंचलितेभ्रेषेसंहतं संगतेदृढे संस्कृतःकृत्रिमे
शस्तेभूषितेप्यन्यलिंगकः ६५ क्लीबंतुलक्षणोपेतेस्थपतिःकं
चुकिन्यपि जीवेष्टियाजकेशिल्पिभेदेनासत्तमेत्रिषु ६६ संघा
तःपुंसिघातेचसंहतौनरकांतरे संवित्तिःप्रतिपत्तौस्यादविवादेज
नस्यच ६७ संततिःस्यात्ततौगोत्रेपारंपर्येपुत्रपौत्राणाम् संग
तिः संगमेज्ञानेसन्नतिःप्रणतौध्वनौ ६८ समितिःसंपराये
स्यात्सभायांसंगमेपिच समाप्तिरवसानेस्यात्समर्थनेथसंमतिः
६९ अभिलाषेप्यनुज्ञायांसंवित्स्याद्यास्तुयोषिति स्थापितंनि
श्चितेन्यस्तेस्तिमितोचंचलार्द्रयोः ७० सिकतास्त्रीसिकतिले
वालुकायांतुभूमनि सुरतंस्यान्निधुवनेदेवत्वेसुरतास्मृता ७१
सुकृतं तुशुभेपुण्येक्लीबंसुविहितेत्रिषु सुव्रता सुखसंदोह्याशो
भनव्रतयोरपि ७२ सुनीतिःशोभननयेध्रुवमातरियोषिति सूनृ
तंमंगलेपिस्यात्प्रियसत्येवचस्यपि ७३ हरिद्दिशिस्त्रियांपुंसि
हयवर्णविशेषयोः अस्त्रियांस्यात्तृणेचाथहर्मितंक्षिप्तदग्धयोः
७४ हरितास्त्रीचदूर्वायांहरिहर्णयुतेन्यवत् हस्तेस्यंगारधा
न्यांचमल्लिकाशाकिनीभिदोः ७५ हारीतः पक्षिभेदेस्यान्मुनिभे
देचकैतवे हृषितं विस्मितेप्रीतेप्रहतेहृष्टरोमनि ७६ ॥तचतुः
॥अवसितमृद्धेज्ञातेप्यवसानगतेचवाच्यलिंगंस्यात् अर्थपतिः
पुल्लिंगोधनादिनाथेचनरनाथे ७७ अवदातःसितेगौरेविशुद्धे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्यन्यलिंगकः अवगीतं तुनिर्वादेत्वस्तगर्हितयोरपि ७८ अंत
र्गतं विस्मृतेस्यान्मध्यप्राप्तेचवाच्यवत् अंगारितं तुदग्धेस्यात्प
लाशकलिकोद्गमे ७९ हसंत्यांचलतामात्रेनदीभेदेचयोषिति।
अपावृतस्तुपिहितेस्वतंत्रेपिचवाच्यवत् ८० अत्याहितं
महाभीतौजीवानपेक्षकर्मणि अभिनीतंत्रिषुन्याय्येसंस्कृता
मर्षिणोरपि ८१ अभिजातःकुलीनेस्यात्न्याय्यपंडितयोस्त्रिषु
अभियुक्तःपरैरुद्धेतत्परेप्यभिधेयवत् ८२ अतिमुक्तस्तुनिः
संगेवासंत्यांतिनिशेपिच अवध्वस्तःपरित्यक्तेनिंदितेप्यवचूर्णिते
८३ अधिक्षिप्तःप्रणिहितेकुत्सितेभर्त्सितेत्रिषु अंशुमान् भा
स्करेशालपर्ण्यामंशुमती स्मृता ८४ भवेदपचितिःपूजा
व्ययनिष्कृतिहानिषु अथानुमति रूनेंदुपूर्णिमानुज्ञयोरपि
८५ अभिशस्तिःप्रार्थनापवादयोश्चत्रपस्त्रियां आयुष्मान्यो
गभेदेनावाच्यवच्चिरजीविनि ८६ उपाहितोऽनलोत्पातेपु
मानारोपितेत्रिषु उपाकृतोऽध्वरहतपशौनोपद्रुतेत्रिषु ८७ उ
दास्थितःप्रतीहारेप्रव्रज्यावसितेचरे स्यादुल्लिखितमुत्कीर्णेत
नूकृतेचवाच्यवत् ८८ उद्ग्राहितमुदीर्णेस्यादुद्ग्राहितयोः
स्त्रिषु भवेदुपचितं दग्धेसमृद्धेवाच्यलिंगकं ८९ उज्जृंभि
तं त्रिषूत्फुल्लेचेष्टायांतुनपुंसकं उपरक्तोव्यसनार्तेराहुग्रस्तें
दुसूर्ययोः ९० उपसत्तिःसंगमात्रेसेवायामपियोषिति ऋष्यप्रो
क्ताशतावर्यतिबलाशूकशिंबिषु ९१ ऐरावतोऽभ्रमातंगेना
रंगेलकुचद्रुमे नागभेदेचपुंसिस्याद्विद्युत्तद्भेदयोःस्त्रियां ९२
नपुंसकंमहेंद्रस्यऋजुदीर्घशरासने कलधौतं सुवर्णेस्याद्र
जतेचनपुंसकं ९३ भवेत्कुहरितं क्लीबंपिकालापेरतध्व
नौ कुमुद्वान्कुमुदप्रायदेशेस्याद्वाच्यलिंगकः ९४ कुमुद्व
ती कुमुदिन्यांकुशपल्यांचयोषिति कृष्णवृंता पाटलायांमाष
पर्ण्यांचयोषिति ९५ अथगंधवती पृथ्वीपुरीभिद्यासमा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तृषु सुरायांचगरुत्मांश्चपक्षिमात्रेखगाधिपे ९६ भवेद्गृह
पतिःपुंसिगृहस्थेपिचमंत्रिणि चंद्रकांतस्तुपुंसिस्यान्मणि
भेदेचकैतवे ९७ चर्मण्वतीनदीभेदेकदलीपादपेस्त्रियाम्
चित्रगुप्तस्तुपुंसिस्याद्यमेतस्यचलेखके ९८ दिवाभीतःकुं
भिलेस्यादुलूकेकुमुदाकरे दिवाकीर्तिस्तुपुंसिस्यान्नापितांताव
सायिनोः ९९ द्वीपवान्सिंधुनदयोर्द्वीपवत्यापगाभुवोः दृष
द्वतीनदीभेदेकात्यायन्यामपिस्त्रियां २०० स्याद्धूमकेतु
रुत्पातभेदेवैश्वानरेपुमान् नंद्यावर्तःपुमान्वेश्मप्रभेदेभगवद्द्रुमे
१ नदीकांतःसमुद्रेस्याद्विज्जलेसिंदुवारके नदीकांतास्त्रियां
जम्बांकाकजंघौषधावपि २ नागदंतोहिपरदेगृहान्निर्गतदा
रुणि नागदंतीतुकुंभायांश्रीहस्तिन्यामपिस्त्रियाम् ३ निष्का
शितो निर्गमितेऽप्याहितेऽधिकृतेपिच अथनिस्तुषितंत्यक्ते
त्वग्विहीनेलघूकृते ४ निराकृतिरनाकारेऽस्वाध्यायेवारणेत्रि
षु परिगतेत्रिषुप्राप्तेविस्मृतज्ञानचेष्टिते २०५ अथप्राणिहितं
न्यस्तेप्राप्तेपिचसमाहिते अथपल्लवितंलाक्षारक्तेसपल्लवेतते
६ भवेत्प्रणिहितंद्विष्टेप्रतिस्खलितबद्धयोः प्रतिक्षिप्तंवारिते
स्यात्प्रेषितेपंचकंत्रिषु ७ परिवर्तोविनियमेकूर्मराजेप्रवर्तने
परिस्रुतास्त्रीवारुण्यांस्यन्नेस्याद्भिधेयवत् ८ प्रधूपि
ताक्लेशितायांसूर्यगंतव्यदिश्यपि पंचगुप्तस्तुचार्वाकदर्शने
कमठेपुमान् ९ प्रजापतिश्चदक्षादौमहीपालेविधातरि प्रति
पत्तिःप्रवृत्तौचप्रागल्भ्येगौरवेपिच १० संप्राप्तौचप्रबोधेचपद
प्राप्तौचयोषिति अथप्रव्रजितामांसीमुंडीरीतापसीषुच ११
प्रतिकृतिरथार्चायांप्रतिनिधिप्रतीकारयोश्चस्त्री पाशुपतो
बकपुष्पेस्यात्पशुपत्यधिदैवतेचलङ्कते १२ पारिजातःसुर
तरौपारिभद्रतरावपि पारावतीगोपगीतेनदीभिल्लवल्लीफले
१३ पारावतःकलरवेतथामर्कटतिंदुके पुष्पदंतस्तुदिङ्नागभे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देविद्याधरांतरे १४ पुरस्कृतोभिशस्तारिग्रस्ताग्रेकृतपूजिते भ
गवन्माजिनेगौर्यांस्त्रियांपूज्येतुवाच्यवत् १५ अथभोगवती
नागपुरीनद्योरहौपुमान् रगमातातुकुट्टिन्यांवृद्धसरोगांतरेस्त्रि
यां १६ लक्ष्मीपतिःपुमान्वासुदेवेनरपतावपि व्यतीपातोम
होत्पातेयोगभेदापयोनयोः १७ वनस्पतिर्नाद्रुमात्रेविनापु
ष्पफलद्रुमे विनिपातोनिपातेस्याद्दैवादिव्यसनेपुमान् १८ वि
जृंभितंतुचेष्टायांक्लीबंत्रिषुविकस्वरे विवस्वान्विबुधेसूर्येत
न्नगर्यांविवस्वती १९ वैजयंतोगृहेशक्रध्वजप्रासादयोःपु
मान् वैजयंतीपताकायांजयंतीपादपेपुमान् २० भवेच्छत
धृतिःपुंसिशक्रेचपरमेष्ठिनि शुभ्रदंतीसुदंत्यांस्यात्पुष्पदंतेभ
योषिति २१ समुद्धृतंसमुत्कीर्णेप्यपनीतेचवाच्यवत् सद्
गतिर्नाकजातनिर्वाणेषुसदीश्वरे २२ सरस्वांश्चनदेवाब्धौ
नान्यवद्रसिकेस्त्रियां वाणीस्त्रीरत्नवाग्देवीगोनदीषुनदीभिदि
२३ मनुपत्न्यामपिसत्यवतीव्यासस्यमातरि नारदर्षीकयोः
पत्न्यांस्त्रियांपुंसिनृपांतरे २४ समुद्रांतातुकार्पासीपृक्कादुरा
लभासुच समाहितःसमाधिस्थेप्युक्तसिद्धांतआहिते २५
निर्विवादीकृतेपिस्यात्प्रतिज्ञातेचवाच्यवत् समाघातोवधेयुद्धे
संख्यावान्पंडितेपुमान् २६ संख्यापुस्तेऽन्यलिंगोऽथसुधाभृ
तिःपुमान्मखे चंद्रेसुभाषितोबुद्धेपुमान्सूक्तेनपुंसकं २७ सू
र्यभक्तस्तुबंधूकेपुंसित्रिष्वर्कपूजके सेनापतिःकार्तिकेयेप्य
नीकाधिपतौपुमान् २८ हिमारातिःपुमानीतिहोत्रेकिरणमालि
नि हैमवत्यभयास्वर्णक्षीर्योःश्वेतवचामयोः २२९ ॥ तपंच
॥ अवलोकितोनालोकनाथेत्रिषुनिरीक्षिते अपराजितईशा
नेरुद्रांतरेनाजितेत्रिषु ३० गिरिकर्णीजयादुर्गाशनपर्णीषुयो
षिति उपधूपितआसन्नमरणेपरिधूपिते ३१ स्याद्गणाधिपतिः
पुंसिशंकरेपिगजानने भवेत्स्यपतिषन् पित्तोत्रिषुपुंसिविहंग

मे ३२ पृथिवीपतिस्तु भूपाले ऋषभाख्यौषधौ पुमान् मूर्धाभि
षिक्तो भूपाले मंत्रिणि क्षत्रियेपि च ३३ यादसांपतिरंभोधौ प
श्चिमाशापतावपि वसंतदूतश्चैत्रे स्यात्पिकपंचमरागयोः॥
३४ वसंतदूती पाटल्यामभियुक्ते च योषिति॥ तषट्॥ अर्धपा
रावतश्चित्रकंठे तित्तिरिपक्षिणि ३५॥ तसप्त॥ समुद्रनव
नीतं स्यात्क्लीबं पीयूषचंद्रयोः॥ इति तांतवर्गः॥ थैकं॥ थं
रक्षणे मंगले च साध्वसे च नपुंसकं शिलोच्चये पुमानेव कचित्तु भ
यरक्षके १ ॥ थद्वि॥ अर्थो विषयार्थनयोर्धनकारणवस्तुषु
अभिधेये च शब्दानां निवृत्तौ च प्रयोजने २ आस्था त्वालंबना
स्थानयत्नापेक्षासु योषिति कंथा मृन्मयभित्तौ च तथा प्राकरणां
तरे ३ क्वथः स्यादतिदुःखेपि निष्पाकेपि द्रवस्य च कुथः स्त्री
पुंसयोर्वर्णकंबले पुंसि बर्हिषि ४ कोथो नानेत्ररोगस्य भेदे च
शठिते त्रिषु ग्रंथो ग्रथनाधनयोः स्याच्छ्लोकाक्षरसंख्ययोः
५ ग्रंथिस्तु ग्रंथिपर्णे ना बंधे रुग्भेदपर्वणोः गाथा श्लोके सं
स्कृतान्यभाषायां गेयवृत्तयोः ६ तीर्थं शास्त्राध्वरक्षेत्रोपाय
नारीरजःसु च अवतारर्षिजुष्टांबुपात्रोपाध्यायमंत्रिषु ७ तु
त्थमंजनभेदे स्यान्नीलसस्यमैलयोः स्त्रियाम् दुःस्थः स्याद्दुर्ग
ते मूर्खे दुःखेन तिष्ठति त्रिषु ८ प्रस्थोऽस्त्रियां मानभेदे सानावुन्नि
तवस्तुनि पाथोऽर्केऽग्नौ जले क्लीबं पृथुः स्यान्महति त्रिषु ९
त्वक्पर्ण्यां कृष्णजीरेऽस्त्री पुमानग्नौ नृपांतरे प्रोथोऽस्त्री हय
घोणायां नाकट्यामध्वगे त्रिषु १० मंथः स्यात्पुंसि मंथाने सा
क्तवे च दिवाकरे यूथं तिर्यक्समूहेऽस्त्री पुष्पभेदे च योषिति ११
रथः पुमानवयवे स्यंदने वेतसेपि च वीथी पंक्तौ गृहांगे च रूपकां
तरवर्त्मनोः १२ संस्थश्चरेऽवस्थिते स्त्री स्थितौ सादृश्यनाशयोः
सार्थो वणिक्समूहे स्यादपि संघातमात्रके १३ सिक्थो भक्त
पुलाके ना मधूच्छिष्टे नपुंसकं ॥ थत्रिः॥ अतिथिः कुशपु

त्रेस्यात्पुमानागंतुकेत्रिषु १४ अश्वत्थःपिप्पलद्रौस्यादश्वत्था
पूर्णिमातिथौ अव्यथोनिर्व्यथेसर्पेचारटीपथ्ययोःस्त्रियां १५
उन्माथःकूटयंत्रेस्यान्मारणेघातकेपुमान् उपस्थःशेफशिश्ने
ऽङ्केतथामदनमंदिरे १६ उद्रथो रथकीलेस्यात्ताम्रचूडाख्य
पक्षिणि क्षवथुर्नासुतेकासेकायस्थःपरमात्मनि १७ नर
जातिविशेषेनाहरीतक्यांतुयोषिति कापथःकुत्सितपथेउशी
रेक्लीबमिष्यते १८ गोग्रंथिर्नाकरीषेस्याद्गोष्ठगोजिह्विकौष
धौ दमथस्तुपुमान्दंडेदमेचपरिकीर्तितः १९ निशीथस्तु
पुमानर्धरात्रेस्याद्रात्रिमात्रके निर्ग्रंथोनग्नकेपिस्यान्निःस्वबा
लिशयोरपि २० प्रमथाःस्याद्धरीतक्यांहरपारिषदेपुमान्
वरूथोरथगुप्तौस्यात्वरूथंचर्मवेश्मनोः २१ मन्मथः
कामचिंतायांकपित्थेकुसुमायुधे वयस्यातुस्त्रियांब्राह्मीगु
डूच्यामलकीषुच २२ सूक्ष्मैलायांचकाकोल्यांपथ्यालीतरु
णेत्रिषु वमथुःपुंसिवमनेगजस्यकरशीकरे २३ विदथो
योगिकृतिनोः शमथःशांतिमंत्रिणोः षड्ग्रंथातुवचायां
स्त्रीस्यात्करंजांतरेपुमान् २४ समर्थस्तुहितेशक्तेसंबद्धे
प्यन्यलिंगकः सिद्धार्थस्तुपुमान्शाक्यसिंहेचसितसर्षपे २५
॥ थचतुः ॥ अनीकस्थोरणगतेहस्तिशिक्षाविचक्षणे रा
जरक्षिणिचिन्हेचवीरमर्दनकेपिच २६ भवेदितिकथापार्थ
वाच्यअङ्ग्रनष्टयोः चतुष्पथंचतुर्मार्गेसंगमेब्राह्मणेपिना
२७ अथचित्ररथःसूर्यगंधर्वांतरयोःपुमान् दशमीस्थो
नष्टवीर्येस्थविरेप्यन्यलिंगकः २८ प्राणनाथोयमेनास्यादिष्ट
प्राणाधिपेमतः वानप्रस्थोमधूकेपिस्यात्तृतीयाश्रयेपुमान् २९
भवेदुदरथिःपुंसिसमुद्रेचविपन्मनो ॥ इतिथांतवर्गः॥
॥९१४ ॥ दैके॥ दःपुमानचलेदत्तेस्त्रियांशोधनदानयोः छे
दोपतापरक्षासुपुमांस्तुदातरिस्मृतः १ दद्विः॥ अब्दःसंवत्स

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रेवारिवाहमुस्तकयोः पुमान् कंदोस्त्रीसूरणेशस्यमूलेजलधरेपुमा
न् २ अंदूः स्त्रियांस्यान्निगडेप्यभेदेभूषणस्यच कुंदोमाघ्येऽस्त्री
मुकुंदभ्रमिनिध्यंतरेषुना ३ क्षोदःस्यात्संसिरजसिपेषणेचप्रकी
र्तितः गदो भ्रातरि विष्णोःस्यादामयेनायुधेगदा ॥ ४ ॥छदः प
लाशेगरुतिग्रंथिपर्णतमालयोः छंदोवशेप्यभिप्रायेधीदापुंस्त्रीमनी
षयोः ५ नंदि र्धूतांगआनंदेऽस्त्रीनंदिकेश्वरेपुमान् नदी सरि
ति शोणादौना नंदा स्यादलिंजरे ६ गौर्यांतिथिविशेषेस्त्रीनि
धिराजभिदोःपुमान् निंदा स्यादपवादेपिकुत्सायामपियोषिति ७
पदं शब्देचवाक्येचव्यवसायप्रदेशयोः पादतच्चिन्हयोःस्थानत्रा
णयोरंकवस्तुनोः ८ श्लोकपादेपिचक्लीबंपुल्लिंगःकिरणेपुनः पा
दो बुध्नेतुरीयांशेशैलप्रत्यंतपर्वते ९ चरणेचमयूखेच वंदा लतां
तरेस्मृता भिक्षुक्यामपिबंधांच विंदु र्दंतक्षतांतरे १० भ्रुवोर्मध्ये
रूपकार्यप्रकृतौपृषतेपुमान् वेदितर्यन्यलिंगःस्यात् भद्रं क ल्या
णशर्मणोः ११ भेदो द्वैधेविशेषेस्यात् उपजापेविदारणे मदोरेत
सिकस्तूर्यांगर्वेहर्षेभदानयोः १२ मंदो ऽतीक्ष्णेचमूर्खेचस्वैरेभा
ग्यरोगिणोः अल्पेचत्रिषुपुंसिस्याद्धस्तिजात्यंतरेशनौ १३ मृ
दुः स्यात्कोमलेऽतीक्ष्णेरदो दंशेविलेखने विदा ज्ञानेचनिर्दिष्टामनी
षायांचयोषिति १४ वेदः श्रुतौचवृत्तेच वेदिः स्यात्पंडितेपुमान्
स्त्रियामंगुलिमुद्रायांस्यात्परिष्कृतभूतले १५ शादःस्यात्कर्दमे
षष्पेस्वादु मिष्टमनोज्ञयोः सूद स्तुकथितःसूपकारेचव्यंजनांत
रे १६ स्वेद स्तुस्वेदनेघर्मे हृत क्लीबंतुचकितयोः॥ दत्रिः ॥अं
गदः कपिभेदेनाकेयूरे तुनपुंसकं ७ अंगदा याम्यदिग्दंतिहस्ति
न्यामपियोषिति अर्द्धेंदु रर्द्धचंद्रेस्या द्गलहस्तनखांकयोः १८ अ
रिंदुः स्यादतिप्रौढस्त्रीयोन्यंगुलियोजने अर्बुदो मांसकीलेस्या
त्सुरूपदशकोटिषु १९ महीधरविशेषेना आस्पदंपदकृत्ययोः
आसंदोवासुदेवेस्यात्सत्रद्रुमभेदेचयोषिति २० आक्रंदःक्रंदनेन्हा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेमिश्चदारुणयुद्धयोः आतर्येपिचपुंसिस्यादामोदोगंधहर्षयोः ५
२१ ककुद्स्त्रीककुदोप्यस्त्रीरृषांकेराजलांछने ब्रूणदोगणकेरु
श्रीक्षणदाक्षणदंजले २२ कपर्दःखंडपरशोर्जटाजूटेवराटके क
पोंदुरुत्सिलिकायांकर्णपाल्यामपिस्त्रियां २३ क्रव्यादक्षसिपुंसि
स्यान्मांसाशिन्यन्यलिंगकः कामदाकामधेनौस्त्रीकामदातरिवाच्यव
त् २४ कुमुदन्त्रिषुस्यात्कृपणेकैरवेतुनपुंसकं कुमुदंकैरवेरक्तप
द्मेस्त्रीकुंभिकौषधौ २५ गंभायांपुंसिदिङ्नागनागशाखामृगांतरे
कुसीदंजीवनेवृद्ध्याक्लीबंत्रिषुकुसीदके २६ कौमुदःस्यात्कार्तिके
तुचंद्रिकायांतुकौमुदी गोष्पदंगोपदम्भश्रेगवांचगतिगोचरे २७ गो
विंदोवासुदेवेस्याद्गवाध्यक्षेबृहस्पतौ गोनर्दमपिकैवर्तीमुस्तके
पुंसिसारसे २८ जलदोमुस्तकेमेघेजीवदोवैद्यविद्विषोः दर
द्स्त्रियांप्लवेपिस्यात्कारंडेचविहंगमे २९ तोयदोमुस्तकेमेघेपुमा
नाज्येनपुंसकं दरद्स्त्रियांप्रपातेपिस्यात्कारंडेचविहंगमे ३०
दारदोविषभेदेस्यात्पारदेहिंगुलेपुमान् दायादस्तुभवेत्पुंसिसपिं
डेतनयेपिच ३१ दृषद्निष्पेषणशिलापट्टप्रस्तरयोःपुमान् ध
नदस्तुकुबेरेस्यात्पुल्लिंगोदातरित्रिषु ३२ नलदंस्यात्पुष्परसोशी
रमांसीषुनद्ध्योः नर्मदःकेलिसचिवेनर्मदासरिदंतरे ३३ निर्वा
दःस्याल्लोकवादेपरिनिष्ठितवादयोः निषादःस्वरभेदेस्याच्चंडालेधीव
रांतरे ३४ प्रमदःसंमदेमत्तेस्त्रियामुत्तमयोषिति प्रसादोनुग्र
हेकाव्यगुणस्वास्थ्यप्रसत्तिषु ३५ प्रणादस्तुपुमांस्तारशब्देचश्रव
णामये प्रसादोदेवनृपयोर्गृहेःप्रवरदास्त्रियां ३६ कन्यायांवाच्य
लिंगस्तुप्रसन्नेचसमर्द्धके भसद्स्त्रीभास्वरेयोनौमर्यादासीम
निस्थितौ ३७ माकदःसहकारेस्त्रीधात्रीमगरभेदयोः मुकुंदो
निधिभिद्धुस्तुरत्नभेदेचकुंदुरौ ३८ मेनादस्तुपुमान्केकिमार्जार
छगलेषुच विशदःपांडवेरक्तेशरद्स्त्रीवत्सरेभृतौ ३९ शारदो
ऽब्देस्त्रियांतोयपिप्पलीसप्तपर्णयोः सस्येक्लीबंशरज्जातनूतनाम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिभेत्रिषु ४० षड्बिंदुस्यात्कीटभेदपुंडरीकाक्ष्यपोःपुमान् संपत
भूतौगुणोत्कर्षेहारभेदेपिचस्त्रियां ४१ संविद्स्त्रियामतिज्ञायामा
चारज्ञानसंगरे संभाषणेक्रियाकारेसकेतोनाम्नितोषणे ४२ संभे
दःस्फुटनेसंगेसुनेद्यारोचनोमयोः ॥ दचतुः ॥ अभिष्यंदोतिवृ
द्धौस्यादास्त्रावेक्षिगदेपिच ४३ अष्टापदोस्त्रीकनकेशारिणां
फलकेपिच अष्टापदीचंद्रमल्ल्यांशरभेमर्कटेपुमान् ४४ अव
वादस्तुनिंदायामाज्ञाविस्रंभयोरपि अभिमर्दस्तुपुंसिस्याद्वम
र्देसंपरायेच ४५ एकपदंतत्कालेनपुंसकंवर्त्मनिस्त्रीस्यात् क
टुकंदःपुमानशिग्रौमृंगबेरससोनयोः ४६ कुरुविंदरत्नभेदे
मुस्ताकुल्माषयोःपुमान् अथकोकनदंरक्तकुमुदेरक्तपंकजे ४७
चतुष्पदीतुपद्येनापशौचकरणांतरे भवेज्जनपदोजानपदोपि
जनदेशयोः ४८ नमोनुदग्नीहूर्केना प्रतिपद्स्त्रीतिथौमतौ
परिवादोपवादेस्याद्वीणावादनवस्तुनि ४९ प्रियंवदःखेचरेना
प्रियवाचितुवाच्यवत् पीठमर्दोतिधृष्टेस्यान्नायकस्यप्रियेपिच
५० पुटभेदोनदीवक्रेपत्तनातोद्ययोरपि महानादःकुंजरेस्याद्रु
षुकान्देमहास्वने ५१ मुचुकुंदोवृक्षभेदेमांधातृतनयेपिच मे
घनादस्तुवरुणेतनयेरावणस्यच ५२ विशारदःपंडितेचधृष्टे
विष्णुपदंतुखे क्षीरोदेषस्त्रियांगंगारविसंक्रांतिभेदयोः ५३ शश
शबिंदुःपुमान्वासुदेवेराजांतरेपिच शतानंदोमुनेर्भेदेदेवकीनं
दनेपिच ५४ शतह्रदास्त्रियांवज्रेसौदामिन्यांचकीर्तिता सम
यादःसमीपेनामर्यादासहितेत्रिषु ५५॥ दपंच॥भवेदुपनिष
दुर्वेदांतविजनेस्त्रियां सहस्रपादःकारंडेमार्तंडेयज्ञपूरुषे
५६॥इतिदांतवर्गः॥धैकं॥धोनाधर्मेकुबेरेचक्लीबंतुवसुनि
स्मृतं धीधाःब्रह्मणिख्यातोधातुःस्याद्गारकेपिच धीर्ज्ञानेशा
नभेदेपिधूःस्मृताधूननेस्त्रियां ॥धद्विः॥अर्द्धसमासेखंडेना
१ब्धिर्नासरसिवारिधौ २ अंधःस्यात्तिमिरेक्लीबंचसुहीने१

भिधेयवत् आधिः पुमांश्चित्तपीडाप्रत्याशाबंधकेषुच ३ व्यसने
चाप्यधिष्ठाने वृद्धमातपद्रीप्रयोः ऋद्धं संपन्नधान्येचसुसमृद्धेच
वाच्यवत् ४ ऋद्धिः स्त्रियोषधीभेदे समृद्धावपियोषिति गंधः
प्रतिवेश्यामोदलेशसंबंधगंधके ५ गाधः स्नानेचलिप्सायांगोधात
लनिहाकयोः दधि क्षीरोत्तरावस्थाभावेस्त्रीवाससर्जयोः ६ दग्धं
पुष्टेऽन्यलिंगंस्यात्स्थितार्कदिशिचस्त्रियां दिग्धोविषाक्तबाणेस्या
त्पुंसिलिप्तेऽन्यलिंगकः ७ दुग्धं प्रपूरितेक्षीरे दुग्धीक्षीराविकौषधौ
दोग्धार्थोपजीविकवैवत्सगोपालयोः पुमान् ८ धद्धो बद्धेतथाहते
बंध आधौचबंधने बंधुस्त्यात्पुंसिबंधूकेमित्रेभ्रातरिबांधवे ९ बा
धादुःखेनिषेधेचबुधः सौम्येचपंडिते बुद्धोजिनेलब्धपर्णेपुंसिस्या
द्बुधितेऽन्यवत् १० बोधिः पुंसिसमाधेश्चभेदेपिप्पलपादपे मधुपु
ष्परसेक्षौद्रेमद्येनातुमधुद्रुमे ११ वसंतदैत्यभिच्चैत्रेस्याज्जीवंत्यांतु
योषिति सिद्धं चित्ताभिसंक्षेपेक्लीबमालस्यवित्तयोः १२ मुग्धस्तुसुं
दरेमूढेनेधाबुद्धौहृतेपुमान् राधो मासांतरेराधा चित्रभेदेचधन्वि
नां १३ गोपीविशाखामलकीविष्णुक्रांतासुविद्युति लुब्धआकांक्षि
णिव्याधेवधूः स्त्रीशारिवौषधौ १४ स्नुषाशठीनवोढासुभार्यापृक्कांग
नासुच व्याधिःकुष्ठेचरोगेनाव्याधोमृगयुदुष्टयोः १५॥ ताराम येखेच
विधुर्नाकर्पूरेदुहारिषु विद्धं स्याद्धिपितेक्षिप्तेसदृशेबाधितेत्रिषु १६
विधिर्नानियतौकालेविधानेपरमेष्ठिनि विधा गजासनेर्द्धौप्रकारे
वेतनेविधौ १७ वृद्धोजीर्णेप्रवृद्धेद्वेन्निषुक्लीबंतुशैलजे वृद्धिस्तुव
र्द्धनेयोगेप्यष्टवर्गौषधांतरे १८ कालांतरेचाभ्युदयेसमृद्धावपियोषि
तिश्रद्धा ऽऽदरेचकांक्षायांश्राद्धं श्रद्धान्वितेत्रिषु १९ हव्यकव्यवि
धौक्लीबंशुद्धं स्यात्त्रिषुकेवले निर्दोषेचपवित्रेचसंधा स्थितिप्रति
ज्ञयोः २० स्पर्द्धासंघर्षणेपिस्यात्साम्येक्रमसमुन्नतौ संधिः पुमा
न्सुरुंगायांभगे संघट्टनेपिच २१ रूपकानांमुखाद्यंगेसावकाशेपि
कीर्तितः स्कंधः स्यान्नृपतावंसेसंपरायसमूहयोः २२ कायेतरुप्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कांडेच भद्रादौ छंदसोभिदि साधुर्वार्धुषिकेचारौ सज्जनेचाभिधेयव
त् २३ सिद्धोनाम्या सादौ भेदे योगस्य देवयोनेश्च त्रिषु निष्पन्ने स्निग्धं
स्नेहयुतेच कूणेपिस्यात् २४ सिंधुर्वमथुदेशाब्धिनदे ना सरिति स्त्रि
यां सिद्धिः स्त्री योगनिष्पत्तिपादुकांतर्द्धिवृद्धिषु २५ सुधा स्त्री लेपने
मूर्व्यां स्नुह्यां गंगेष्टकामृते ॥ धत्रिः ॥ अवधिस्त्ववधाने स्यात्सीम्नि का
ले बिले पुमान् २६ अगाधमतलस्पर्शे त्रिषु श्वभ्रे नपुंसकं अनद्धं
मुरजादौ च क्लीबं स्यात्संदिते त्रिषु २७ आविद्धो वाच्यलिंगः स्यात्कु
टिले च पराहते आबद्धो दृढबंधे स्यात्प्रेमालंकारयोर्द्वयोः २८ उत्से
धस्तूच्छ्रयेनस्त्री क्लीबं सन्नहनेपि च उपाधिर्धर्मचिंतायां कुटुंबव्या
पृते छले २९ विशेषणे पुंस्युपधिः पुंसि व्याजरथांगयोः कबंधोऽस्त्री
क्रियायुक्तव्यापमूर्धकलेवरे ३० क्लीबं जले पुंस्युदरे बाहुरक्षोविशेष
योः दुर्विधो वाच्यलिंगः स्याद्दुर्गतेपि खलेपि च ३१ न्यग्रोधस्तु पुमा
न्व्यामवटयोश्च शमीतरौ न्यग्रोधी तूपचित्रायां निरोधो नाशरोधयोः
३२ निषधः कठिने देशतद्राजे पर्वतांतरे परिधिर्यज्ञियद्रुशाखा
यामुपसूर्यके ३३ प्रसिद्धो भूषिते ख्याते प्रणिधिर्नाऽनुचरे चरे मा
गधी स्त्री कणा यूथ्योर्वाच्यवन्मागधोद्भवे ३४ पुंसि वैश्यात्सत्त्रिया
जे शुक्लजीरकवंदिनोः विवधो वीवधश्चापि पर्याहारेऽध्वभावयोः ३५
विश्रब्धोऽनुद्धटेपि स्याद्गाढविश्वस्तयोस्त्रिषु विबुधो ना सुरे वीरुल्ल
ताविटपयोः स्त्रियां ३६ सन्नद्धो वर्मिते व्यूढे संबाधः संकटे भगे
सन्निधिः सन्निधानेपि पुमानिंद्रियगोचरे ३७ संसिद्धिः प्रकृतौ सिद्धौ
मदोद्यायामपि स्त्रियां संबोधो बोधने क्षेपे समाधिर्नाः समर्थने ३८
ध्याने नीवाकनियमे काव्यस्य च गुणांतरे ॥ धचतुः ॥ अवरोधस्ति
रोधाने राजदारेषु तद्गृहे ३९ अवष्टब्धो विदूरे स्यादाक्रांते चावलंबि
ते अनुबंधस्तु बंधे स्याद्दोषोत्पादे विनश्वरे ४० मुख्यानुयायिबाले
च प्रकृतस्यानिवर्तने अनुबंधी तु हिक्कायां तृष्णायामपि योषिति
४१ आनद्धं उपाङ्गाग्रे पुंसि वा बंधनेऽन्यवत् आशाबंधः समा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्वासेपुंसिमर्कटजालके ४२ दुष्टगंधःसुगंधोस्यात्त्रिषुक्लीबंतुवालु
के दुस्सुगंधाकोकिलाक्षेस्यात्काशेचगोक्षुरे ४३ उपलब्धिर्मतौ
प्राप्तावपिज्ञानेचयोषिति उग्रगंधाजमोदायांवचायांचिक्किकेऽपधौ ४४ का
लस्कंधस्तमालेस्यात्तिंदुकेजीवकद्रुमे तीक्ष्णगंधावचाराजिकयोः
शोभांजनेपुमान् ४५ तृणगोधाचित्रकोलेकृकलासेपियोषिति पा
रिव्याधस्तुपुंसिस्याद्धूतसेचद्रुमोत्पले ४६ ब्रह्मबंधुरधिक्षिप्तेनि
र्देशेब्राह्मणस्यना महौषधंतुशुंठ्यांस्याद्विषायांलशुनेपिच ४७
समुन्नद्धःसमुद्भूतेपंडितंमन्यगर्विते॥ धपंच॥ योजनगंधाकस्तू
र्यांसीतायांव्यासमातरि ४८ ॥ इतिधांतवर्गः॥ नैकम् ॥ नःपु
मान्सुगतेबंधेहिरंडेप्रस्तुतेपिच॥ नद्विः॥ अग्निर्वैश्वानरेपिस्याच्चि
त्रकाख्यौषधौपुमान् १ अन्नंभक्तेचभुक्तेस्याद्दिनःपत्यौनृपार्कयोः
उन्नंक्लिन्नेचसुरतेकृत्स्नंसर्वांबुकुक्षिषु २ घनंस्यात्कांस्यताला
दिवाद्यमध्यमनृत्ययोः नामुस्ताब्दौघदार्ढ्येषुविस्तारेलोहमुद्गरे॥
३ त्रिषुसांद्रेदृढेचाथचिन्हंलक्ष्मपताकयोः चीनोदेशांशुकव्रीहि
भेदेतंतौमृगांतरे ४ छन्नंतुरहसिक्लीबंछादितेवाच्यलिंगवत्॥
छिन्नंकृत्तेत्रिलिंगंस्याद्गुडूच्यामपियोषिति ५ जनोलोकेमहर्लो
कात्परलोकेचपामरे जनीसीमंतिनीवध्वोरुत्पत्तावोषधीभिदि
६ जन्हुःस्यात्पुंसिराजर्षिभेदेचमधुसूदने ज्यानिर्जीर्णेचहानौच
तटिन्यामपियोषिति ७ जिनोर्हतिचबुद्धेचपुंसिस्याज्जित्वरेत्रिषु
ज्योत्स्नाचंद्रातपेपिस्याज्ज्योत्स्नायुक्तनिशिस्मृता ८ ज्योत्स्नीपटो
लिकायांस्याज्ज्योत्स्नायुक्तनिशिस्त्रियां तनुःकायेत्वचिस्त्रीस्यात्त्रि
ष्वल्पेविरलेकृशे ९ दानंगजमदेत्यागेपालनच्छेदशुद्धिषु दानुर्दा
तरिविक्रांतेदीनाखनीमूषिकेस्त्रियां १० वाच्यवद्दुर्गतेभीतेद्युम्नं
वित्तेबलेपिच धनुःपुमान्प्रियालद्रौराशिभेदेशरासने ११ धनंतु
गोधनेवित्ते धानाभृष्टयवेपिच धान्याकेभिनवोद्भिन्ने धेनी नद्यां
नदेपुमान् १२ नग्नोवंदिक्षपणयोःपुंसित्रिषुविवाससि न्यूनंग

For Private and Personal Use Only

त्रीणयोःपानंपीतिभाजनरक्षणे १३ भानुर्नाकिरणेसूर्येभिन्नः
स्यात्त्रिषुदारिते संगतेऽन्यत्रफुल्लेचमानं चित्तोन्नतौग्रहे १४
क्लीबंप्रमाणेप्रस्थादौमीनोराश्यंतरेझषे मुनिःपुंसिवसिष्ठादौवंक
सेनतरौजिने १५ मृत्स्नामत्स्नानुवर्णोःस्त्रीयानंस्याद्वाहनेगतौ॥
योनिःस्त्रीपुंसयोःस्यादाकरेस्मरमंदिरे १६ रत्नं स्वजातिश्रेष्ठे
पिमणावपिनपुंसकं रास्नाचस्याद्भुजंगाख्यांएलापर्ण्यामपिस्त्रि
याम् १७ लग्नं राश्युदयेक्लीबंसक्तलज्जितयोस्त्रिषु वस्नस्त्व
विक्रयेपुंसिवेतनेस्यान्नपुंसकं १८ वनंनपुंसकंनीरेनिवासाल
यकानने वन्हि वैश्वानरेऽपिस्याच्चित्रकाख्यौषधौपुमान् १९ वा
नंशुष्कफलेशुष्कस्यूतिकर्मकटेगतौ विघ्नंविचारितेलब्धेबुध्नो
नामूलरुद्रयोः २० श्वापुमान्कुक्कुरेख्यातःस्थानभेदेचवास्तुनः॥
शीनोमूर्खेचाजगरेश्येनःपक्षिणिपांडुरे २१ स्वप्नःस्वापेप्रसुप्त
स्यविज्ञानेदर्शनेपुमान् सानुरस्त्रीवनेप्रस्थेवात्याभार्गाग्रकोवि
दे २२ स्थानंसादृश्येऽवकाशेस्थितौवृद्धिक्षयेतरे स्यानंस्निग्धेप्र
तिध्वानेघनत्वालस्ययोरपि २३ स्नानं स्नानीयेऽभिषवे सूनंप्र
सवपुष्पयोः सूनापुत्र्यांवधस्थानेगलशुंडिकयोःस्त्रियां २४
सूनुःपुत्रेऽनुजेऽर्केनासूनुःकिरणसूर्ययोः हनुर्हट्टविलासिन्यां
सूनावस्त्रेगदेस्त्रियां २५ द्वयोःकपालावयवेहीनंगर्ह्योनयोस्त्रि
षु ॥नत्रिः॥अंजनंकज्जलेचाक्तौसौवीरेचरसांजने २६ पुंसि
ज्येष्ठादिग्गजयोरंजनावानरीभिदि अंजनीलेप्यनार्यांचावश्री
तौचरक्षणे २७ अयनंपथिभानोरप्युदग्दक्षिणतोगतौ अपानं
तुगुदेक्लीबंपुंसिस्यात्तस्यमारुते २८ असनंक्षेपणेक्लीबंपुंसिस्या
ज्जीवकद्रुमे अंगनंप्रांगतेयानेकामिन्यामंगनामता २९ अर्जुनः
ककुभेपार्थेकार्तवीर्यमयूरयोः मातुरेकसुतेपिस्यात्पुल्लिंगोधव
लेऽन्यवत् ३० नपुंसकंतृणेनेत्रगदेचाप्यर्जुनीगवी उषायांबा
हुदानद्यांकुट्टिन्यामपिचक्वचित् ३१ अम्लानोमहासहायांनान्य

लिंगस्तुनिर्मले अशोघ्नी तालमूल्यांस्यादर्शोघ्नः सूरणेपिच ३२
असिक्नी स्यादवृद्धांतःपुरप्रेष्यानदीभिदोः अशनिः स्त्रीपुंसयोः
स्याच्चंचलायांपवावपि ३३ अरत्निर्नासप्रकोष्ठततांगुलिकरेपिच
कफोणावप्यथाली स्याद्वृश्चिके भ्रमरेपुमान् ३४ अर्थी पुमान्याच
केस्यात्सेवकेचविवादिनि अध्वानः पथिसंस्थानेस्यादवस्कंदकाल
योः ३५ अर्वातुरंगमेपुंसिकुत्सितेवाच्यलिंगकः आसनंद्विरद
स्कंधेपीठेयात्रानिवर्तने ३६ आसनीविपणौस्त्रियामासनोनातु
जीरके आदानंग्रहणेपिस्यादलंकारेचवाजिनाम् ३७ आपन्नः
सविपत्तौचप्राप्तेवाच्यवदीरितः आत्मापुंसिस्वभावेपिप्रयत्नमनसो
रपि ३८ धृतावपिमनीषायांशरीरब्रह्मणोरपि आलानंकरिणांबं
धस्तंभेरज्जौचनस्त्रियां ३९ ईशानंज्योतिषिक्लीबंपुल्लिंगःस्यात्त्रि
लोचने उत्तानमगभीरस्यादूर्ध्वास्यशयितेत्रिषु ४० उत्थानमुद्य
मेतंत्रेपौरुषेपुस्तकेरणे प्रांगणोद्गमहर्षेषुमलरोगेपिनद्वयोः ४१
उद्यानंस्यान्निःसरणेवनभेदेप्रयोजने उदानोप्युदरावर्तेवायुभेदे
भुजंगमे ४२ उद्घानमुद्गतेवाच्यलिंगंचुल्यांनपुंसकम्॥ ओदनंन
स्त्रियांभक्तेबलायामोदनीस्त्रियां ४३ कमनःकामुकेकामेऽभि
रूपेऽशोकपादपे कंपनंनद्वयोःसंपेकंप्रेस्यादभिधेयवत् ४४ क
ठिनमपिनिष्ठुरेस्यात्स्तब्धेपित्रिषुनपुंसकंस्थाल्यां कठिनीखटि
कायामपिकठिनागुडशर्करायांच ४५ क्रंदनंरोदनेपिस्यादा
ह्वानेप्यथकल्पना करिणःसज्जनायांस्त्रीक्लीबंतुमोचकल्पने ४६
कर्त्तनंनद्वयोश्छेदेनारीणांसूत्रनिर्मितौ कर्मास्त्री व्याप्यक्रिययोः
कदनंमर्दपापयोः ४७ कांचनःकांचनारेस्याच्चंपकेनागकेसरेउ
दुंबरेचधत्तूरेहरिद्रायांचकांचनी ४८ क्लीबंबद्धाकेसरेहेम्निकालि
नीभीरुवद्योः कामीतुकामुकेचक्रवाकेपारावतेपिच ४९ कानी
नःकन्यकाजाततनयेव्यासकर्णयोः काकिनीपणपादेपिमानपा
दवराटके ५० काननंविपिनेगेहेपरमेष्ठिमुखेपिच कुद्दनंमृत्तिका

भांडविशेषेकाचभाजने ५१ कुहनादंभचर्यायामीर्ष्यालौकुहनंत्रि
षु कृतीस्यात्संडितेयोग्येकेतनंतुनिमंत्रणे ५२ गृहेकेतौचकृत्ये
थकेशीकेशवतित्रिषु दैत्येनाचौरपुष्प्यांस्त्रीकौलीनंगुह्यजन्य
योः ५३ कुकर्मणिकुलीनत्वेयुद्धेपश्वहिपक्षिणां कौपीनंस्याद
कार्येचचीरगुह्यप्रदेशयोः ५४ खलिनीखलवृंदेस्यान्नालपर्ण्या
मपिस्त्रियां खंजनंखंजरीटेस्त्रीसर्षप्यांखंजनंगतौ ५५ खड्गी
नागंडकेमंजुघोषेखड्गधरेत्रिषु गर्जनंनिनदेकोपेगाहनंकलिले
त्रिषु ५६ नपुंसकंगाल्हरेस्याद्दुःखकाननयोरपि गंधनमुत्साहे
स्यात्प्रकाशनेसूचनेपिहिंसायां ५७ ग्रामीणःमुनिःकाकेपुंसित्रिषु
संभृतेग्रामैः ग्रावातुप्रस्तरेपृथ्वीधरेपुंस्यथगृंजनम् ५८ विषद
ग्धपशोर्मांसेक्लीबंपुंसिरसोनके गोस्तनोहारभेदेनाद्राक्षायांगो
स्तनीस्त्रियाम् ५९ गोमीशृगालेपुंसिस्यात्त्रिषुगोमत्युपासके॥
घटनाचलनाहस्त्योश्चंदनीतुनदीभिदि ६० चंदनोऽस्त्रीमल
यजेभद्रकाल्यांनपुंसकं चलनंभ्रमणेकंप्येतुनात्रिलिंगक
म् ६१ चलनीवस्त्रयोधिन्यांवारिभेदेपिचक्वचित् चक्रीजालि
कमित्कोकुलालाजादिसूचके ६२ चर्मीफलकपाणौस्याद्भूर्जे
भृंगरिटावपि चर्मकृतौचफलके चेतनासंविदिस्त्रियाम् ६३ चा
च्यवत्प्राणयुक्तेऽथ छद्म व्याजापदेशयोः छर्दनंवमनेक्लीबं
निंबालंबुषयोःपुमान् ६४ छदनंछदनेपक्षेपिधाने छेदनं भि
दि कर्तनेजगनुःपुंसिजंतौवैश्वानरेपिच ६५ जवनंतुस्यदेवे
गिहयेनावेगिनित्रिषु जननीतुदयामात्रोर्जननंवंशजन्मनो
६६ जघनंस्यात्तुरंगादिसन्नाहेविजयेऽपिच जघनंचस्त्रियाः
श्रोणिपुरोभागेकटावपि ६७ ज्ञानीस्यात्पुंसिदैवज्ञेज्ञानयुक्ते
न्यलिंगकः जीवनंवर्त्तनेनीरप्राणधारणयोरपि ६८ जीवनी
जीवनाचापिजीवंतीभेदयोःक्रमात् तपनोरुष्करेपिस्याद्भा
स्करेनिरयांतरे ६९ तलूनःपवनेयूनियुवत्यांतलुनीस्मृता॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तलिने विरलेस्तोके स्वच्छेपि वाच्यलिंगकं ७० तमोघ्नः सूर्यवन्ह्यो
र्बुद्धशंकरविष्णुषु स्यागी दातरि शूरेऽथ तेवनं केलिकानने ७१
क्रीडायां तेमनं त्वार्द्रीकरणे व्यंजनेपि च ॥ तेजनः पुंसि वंशे स्या
त्तेजनी तृणपूलके ७२ तोदनं व्यथने तोत्रे दंशनं दंशवर्मणोः
॥ दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिषु ७३ शास्त्रदर्पणयोश्चा
थ दमनः पुष्पधीरयोः दशनः शिखरे दंते कवचे तु नपुंसकं ७४
दहनश्चित्रके भल्लातकेऽग्नौ दुष्टचेष्टिते दशानं ज्योतिषि क्लीबं
पुल्लिंगः स्याद्विरोचने ७५ देवनं व्यवहारे स्याज्जिगीषाक्रीड
योरपि देवनोऽक्षेषु पुंसि स्याद्ध्वजी तु पृथिवीधरे ७६ रथब्रा
ह्मणयोश्चापि भुजंगमतुरंगयोः धन्वी धनुर्धरेपि स्यादर्हुणे
ककुभद्रुमे ७७ धन्वा तु मरुदेशे ना क्लीबं चापे स्थलेपि च धम
नोऽनलेऽनले भस्त्राऽऽध्मापकः क्रूरयोस्त्रिषु ७८ धमनी तु शिरा
हट्टविलासिन्योश्च योषिति धावनं गमने शुद्धौ पृश्निपर्ण्यां तु
धावनी ७९ धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः नंदनं
वासवोद्याने नंदनो हर्षके सुते ८० नंदी हरप्रतीहारे गर्दभां
डे वनद्रुमे नंदिन्यु मायां गंगायां ननांदृधेनुभेदयोः १ नलि
नी पद्मिनी व्योमनिम्नगा कमलाकरे नपुंसकं नीलिकायां न पुं
सि सरसीरुहे ८२ निदानं कारणे वत्सदामादिकारणक्षये
निधनं स्यात्कुले नाशे ऽथ नंदारणे रणे ८३ पवनं कुंभका
रस्य पाकस्थाने नपुंसकं निष्पावमारुतौ पुंसि प्रज्ञानं बुद्धि
चिन्हयोः ८४ प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि प्र
ज्ञायामपि च क्लीबमेकत्वे तूत्तमे सदा ८५ पद्मिनी पद्मसंघा
ते स्त्री विशेषे सरोरुहे प्रसन्ना स्त्री सुरायां स्यात्स्वच्छसंतुष्ट
योस्त्रिषु ८६ प्रसूनो वाच्यवज्जाते क्लीबं तु फलपुष्पयोः प
श्रीश्यने पत्ररथे कांडदूरथिकादिषु ८७ पर्व क्लीबं महे ग्रंथौ
प्रस्तावे लक्षणांतरे दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि ८८

For Private and Personal Use Only

सूक्ष्मसूत्रादिसूक्ष्मांशेकिंजल्केनेत्रलोमनि पाठिनोमीनभेदे
स्यात्पाठकेगुग्गुलद्रुमे ८९ पावनं तुजलेकृच्छ्रेनाप्यासेपावके
पिच पाचनं दशमूल्यादौमायश्चित्तेचनानले ९० वाच्यवत्पा
चयितरि हरीतक्यांतुयोषिति पाक्षी व्याधेचवरुणेपिशुनं कुंकुमे
पिच ९१ कपिवक्रेचकालेनासूचकक्रूरयोस्त्रिषु पृक्कायांपिशुना
स्त्रीस्यात्पीतनं पीतदारुणि ९२ कुंकुमेहरितालेचपुमानाम्रातके
मतः पूतनातुहरीतक्यांदानवीरोगभेदयोः ९३ पृतना तुस्त्रियां
सेनामात्रसेनाविशेषयोः प्रेत्वानावासवेवातेप्रेमा स्त्रीस्नेहहर्षयोः
९४ फलिन्यग्निशिखायांस्त्रीफलिन्याफलिनेत्रिषु फाल्गुनस्तुगु
डाकेशेनदीजार्जुनभूरुहे ९५ तपस्यसञ्ज्ञेमासेतत्पूर्णिमायांतु
फाल्गुनी ब्रह्म तत्त्वतपोवेदेनद्वयोःपुंसिवेधसि ९६ ऋत्विग्यो
गभिदोर्विप्रेबंधनं वधबंधयोः बेदनीनतिजीवातुकदीमाचल
कर्मसु ९७ वाहिनीस्यात्तरंगिण्यांसेनासैन्यप्रभेदयोः साधिनी
नर्तकीमत्ताविदग्ध वनितासुच ९८ बुधानस्तुगुरौविज्ञेबोध
नंगंधदीपने बोधिनीबोधिपिप्पल्योर्भर्म स्यात्कांचनेभृतौ ९९
भंडनंकवचेयुद्धेखलीकारेपिनद्वयोः भट्टिनीद्विजभार्यायांनाट्यो
क्त्यांराजयोषिति १०० भवनं स्याद्गृहेभावे भाजनंयोग्यपात्रयोः
॥भावना तुनाध्यानेपर्यालोचेधिवासने १ भुवनं विष्टपेपिस्या
त्सलिलेगगनेजले भोगीभुजंगमेपिस्याद्ग्रामपान्नेनृपेपुमान् २ वि
हायमहिषीमन्यराजयोषितिभोगिनी मदनःस्मरवसंतद्रुमिक्रू
रसिकूपके ३ मलनःपटवासेनामर्दनंतुनपुंसकं मलिनं दूषितेकृ
ष्णेऽकृतुमत्यांतुयोषिति ४ मंडनंभूषणेक्लीबंस्यात्त्रिषुअलंकरिष्णु
नि मार्जनंनद्वयोर्मार्ष्टौपुंसिस्याल्लोध्रशाखिनि ५ मालिनीमातृ
कावृत्तभिदोर्मालिकयोषिति गौरीचंपानगर्योश्चमंदाकिन्यांनदीभि
दि ६ मानिनी तुस्त्रियांफल्यांमानीमानवतित्रिषु मिथुनंतुद
योराशिभेदस्त्रीपुंसियुग्मके ७ मुंडनं वपनेत्राणेमर्दनं मृत्रशि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्नयोः मैथुनं सुरतेपिस्यात्संगतेपिनपुंसकं ८ यमनंबंधनेचोप
रतौक्लीबंयमेपुमान् यवनोदेशभेदेनावेगिवेगाधिकाश्वयोः ९ या
वान्नौषधिभेदेस्त्रीवाच्यवद्वैगिनिस्मृता यापनं वर्त्तनेकालक्षेपे
निरसनेपिच १० युवास्यात्तरुणेश्रेष्ठेनिसर्गबलशालिनि युंजानः
सरथौविप्रेयोजनं परमात्मनि ११ चतुःक्रोश्यांचयोगेऽथरसनं
स्वदनेध्वनौ जिव्हायांतुनपुंसिस्याद्रास्नायां रसना स्त्रियाम् १२
रंजनोरागजननेरंजनं रक्तचंदने शुंडारोचनिकानीलीमंजिष्ठासु
चरंजनी १३ रजनीनीलिनीरात्रिहरिद्राजतुकासुच राधनंसाध
नेप्राप्तौराधनाभाषणेस्त्रियाम् १४ राजाप्रभौचनृपतौक्षत्रियेर
जनीपतौ यक्षेशक्रेचपुंसिस्याद्रागीरक्तेपिकामुके १५ रेचनीत्रि
वृतादंत्योरोचनीकर्कशेस्त्रियाम् रोचनारक्तकल्हारेगोपित्तवरयो
षितोः १६ रोचनःकूटशाल्मल्यांपुंसिस्याद्रोचकेत्रिषु रोदनं क्रंद
नेस्त्रेपिदुरालभौषधौस्त्रियाम् १७ रोहीरोहितकेऽश्वत्थवटपादप
योःपुमान् लंघनंतूपवासे स्यात्क्रमणेप्लवनेऽपिच १८ ललना
कामिनीनारीभेदजिव्हासुयोषिति लक्ष्मचिन्हेप्रधानेचलांछनं
मानचिन्हयोः १९ खेलनं छर्दनेभूर्जेलिपिन्यासेऽथवर्जनम् हिं
सात्यागयोर्वपनं बीजाधानेचमुंडने २० वसनं छादनेवस्त्रेव
मनं छर्दनेऽर्दने वर्द्धनंवृद्धिवर्द्धिष्णुछेदेपस्यांतुवर्द्धिनी २१ व्यं
जनंतेमनेचिन्हेश्मश्रुण्यवयवेऽपिच व्यसनं त्वशुभेसक्तौपानस्त्री
मृगयादिषु २२ दैवानिष्टफलेपापेविपत्तौनिष्फलोद्यमे वर्तनोवाम
नेक्लीबंवृत्तौस्त्रीप्रेषणाध्वनोः २३ नपुंसितूलनालायांनर्कुपीठेचजी
वने वर्त्तिष्णौत्रिषुवज्री तुकुक्कुटेवाधिपे पुमान् २४ वचक्नुस्तुपु
मान्विप्रेवावदूकेऽभिधेयवत् वर्णीस्याल्लेखकेचित्रकरेपिब्रह्मचा
रिणि २५ वर्ष्मदेहप्रमाणातिसुंदराकृतिषुस्मृतम् वर्त्मनेत्रछदे
मार्गेबाजीबाणाश्वपक्षिषु २६ वामनोप्यस्त्रिखर्वेचत्रिषुपुंसितुदि
ग्गजे हरावंकोटवृक्षेऽथवासनंधूपनेपिच २७ वाटधान्येचवस्त्रे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चप्रत्याशाज्ञानयोस्त्रियाम् वाग्मीपटौसुराचार्येविज्ञानंज्ञानक
र्मणो २८ वितुन्नंसुनिषण्णेचशैवालेचनपुंसकं विमानोव्यो
मयानेचसार्वभौमगृहेपिच २९ घोटकेयानपात्रेचपुंनपुंसकयोर्म
तः वितानोयज्ञउल्लोचेविस्तारेपुंन्नपुंसकं ३० क्लीबवृत्तविशेषेस्या
त्त्रिलिंगोमत्ततुच्छयोः विक्रिबोजरसाजीर्णेशीर्णेचार्द्रेचवाच्यवत्
३१ विपन्नं विपदाक्रांतेत्रिषुपुंसिभुजंगमे विच्छिन्नंचसमालब्धो
विभक्तेप्यभिधेयवत् ३२ विलग्नं नस्त्रियांमध्येत्रिषुस्याल्लग्न
मात्रके विषघ्न स्तुशिरीषेनागुडूचीस्त्रिरतोःस्त्रियां ३३ व्युत्था
नं स्वातंत्र्यकृत्येविरोधाचरणेपिच वृजिनं कल्मषेक्लीबंकेशेनाकु
टिलेत्रिषु ३४ वृषाकर्णेमहेंद्रेनावेदना ज्ञानदुःखयोः वेष्टनं
कर्णशष्कुल्यामुष्णीषेमुकुटेवृतौ ३५ व्योम वारिणिचाकाशेभा
स्कृरस्यार्चनाश्रये शकुनः पुंसिविहगेसौबलेकरणांतरे ३६ श
यनं सुरतेनिद्राशय्ययोश्चनपुंसकं शमनं शांतिवधयोःशमनः
श्राद्धदेवते ३७ श्वसनं स्वसितेपुंसिमारुतेमदनद्रुमे॥ शकुन
स्तुपुमान्पक्षिमात्रपक्षिविशेषयोः ३८ शुभशंसिनिमित्तेचशाकु
नंस्यान्नपुंसकं शंकिनीश्वेतचुक्रायांचोरपुष्प्यांवधूभिदि ३९
शंखी हरौसमुद्रेनाशंखवत्यभिधेयवत् शतघ्नी शस्त्रभेदेस्या
त्वृश्चिकाल्यांकरंजके ४० शासनंराजदत्तोर्व्यांलेखाज्ञाशा
स्त्रशांतिषु शाखीस्यात्पादपेवेदेतुरुष्कारव्यजनेपुमान् ४१
शिखीवन्हौबलीवर्देशरेकेतुग्रहेद्रुमे मयूरेकुक्कुटेपुंसिशिख
वत्यन्यलिंगकः ४२ शिल्पी तुवाच्यवत्कारौस्त्रियांकोलदलौ
षधौ शृंगी शृंगयुतेनागेवृषपर्वतयोरपि ४३ श्लेष्मघ्नीमल्लि
कायांचज्योतिष्मत्यांचयोषिति शोभनोयोगभेदेनासुंदरेवाच्यलिं
गकः ४४ सवनं त्वध्वरेस्नानेसोमनिर्दलनेपिच स्तननं ध्वनि
मात्रेस्यान्मेघशब्देचकुंथिते ४५ समानं सत्समैकेषुत्रिषुना
माभिमारुते संतानः संततौगोत्रेस्यादपत्येसुरद्रुमे ४६ स्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्शनो मारुते पुंसि दाने स्पर्शे नपुंसकम् संस्थानमाकृतौ मृत्यौ सन्नि
वेशे चतुष्पथे ४७ स्यंदनं तु स्रुतौ नीरे तिनिशे ना रथे ऽस्त्रियाम्॥
सज्जनं तु भवेत्क्लीबमुपरक्षणघट्टयोः ४८ वाच्यलिंगं कुलीने स्या
त्कल्पनायां तु योषिति संधानं स्यादभिषवे तथा संघट्टनेपि च ४९
संपन्नं साधितेपि स्यात्संपत्तिसहिते न्यवत् संधिनी वृषभाक्रांता
कालदुग्धोरुभयोः स्त्रियाम् ५० सद्म स्यान्मंदिरे नीरे संव्यानं त्वा
दनेंशुके सदनं मंदिरे तोये स्वामी प्रभुविशाखयोः ५१ सादी तु
रंगमातंगरथारोहे षु दृश्यते स्थापनं रोपणे पुंसि वने पाठोषधौ स्त्रि
यां ५२ सावनो यज्ञकर्मांते यजमानप्रचेतसोः साधनं मृतसंस्कारे
सैन्ये सिद्धौषधौ गतौ ५३ निर्वर्तनोपायमेढ्रेदापनेऽनुगमे धने सा
मक्लीबमुपायस्य भेदे वेदांतरेपि च ५४ सीमा घाटस्थितिक्षेत्रे
ष्वंडकोषेऽपि च स्त्रियां सूचना व्यधने दुष्टे गंधनेऽभिनयेपि च ५५
सेचनं रक्षणे सेके नौकायाः सेकभाजने सेनानीः स्यात्पुमान्कार्ति
केय सेनापतावपि ५६ सेवनं सीवनोपास्त्योर्हली रामे च कर्षके
हस्तिनी गजयोषायां जातिभेदे च योषितः ५७ हसनं नहूयां हा
सेंऽगारधान्यां तु योषिति हायनो न स्त्रियां वर्षे पुंस्यर्चिर्व्रीहिभेदयोः
५८ ह्रादिनी वज्रतडितोर्हिंडनं भ्रमणे रते ॥ नचतुः॥ अवल
ग्नोऽस्त्री यो मध्ये त्रिषु स्याल्लग्नमात्रके ५९ अनूचानो विनीते
स्यात्सांगवेदविचक्षणे अवाचीनमवागधे विपर्यस्ते च वाच्य
वत् ६० अभिपन्नोऽपराधे भिग्रस्ते चापद्गते त्रिषु अवदानं
खंडने स्यादतिवृते च कर्मणि ६१ अभिमानोऽर्थादिदर्पे ज्ञाने
प्रणयहिंसयोः अनीकिनी स्त्रियां सेनामात्रसेनाविशेषयोः ६२
अधिष्ठानं पुरे चक्रे प्रभावेऽध्यासनेपि च अन्वासनं स्नेहवस्ता
वुपास्तावनुशोचने ६३ अर्यमा तु पुमान्सूर्ये पितृदेवांतरेपि
च अथर्वा ब्राह्मणे पुंसि वेदे तु स्यान्नपुंसकम् ६४ भवेदभि
जनः ख्यातौ जन्मभूम्यां कुलध्वजे कुलेप्यपि च पुमाना यो धनेषु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रुवधेपि च ६५ स्यादाकलनमाकांक्षापरिसंख्यानबंधने ॥
आतंचनंप्रतीवापपवनाप्यायनेषु च ६६ आराधनंचपचनेप्रा
प्तौसंतोषणेपि च आच्छादनंसंपिधानेवस्त्रेःपटलिमात्रके ६७
आस्कंदनंतिरस्कारेरणेसंशोषणेपि च आवेशनंशिल्पिशाले
भूतावेशप्रवेशयोः ६८ आत्मयोनिःपुमान्कामदेवेचपरमेष्ठिनि
॥उपधानंविषेगेंडौप्रणयेपिनपुंसकं ६९ उत्सादनंसमल्लेखोद्व
हनोद्वर्तनेषु च स्यादुत्पतनमुत्पत्तौतथोर्ध्वगमनेपि च ७०
उद्वर्त्तनमुत्पतनेविलेपनेघर्षणेक्लीबं उदयनमुदयेक्लीबं
वत्सेशागस्त्ययोःपुंसि ७१ उद्वाहनंप्रणीतेस्याद्रज्वामुद्वा
हनीमता उपासनंशराभ्यासेप्युपास्तावासनेपि च ७२ कपी
तनोगर्दभांडशिरीषाम्रातकेषु च अश्वत्थेचकलापीतुप्लक्ष
बर्हिणयोःपुमान् ७३ कलध्वनिःपुमान्पारावतेपिकमयूरयोः
कंचुकांतःपुराध्यक्षेषिड्गेःद्रोणोगकद्रुमे ७४ कात्यायनोव
ररुचौविशेषेचमुनेःपुमान् काषायवस्त्रेविधवार्द्धजरत्तुमयोः
स्त्रियाम् ७५ कुंभयोनिरगस्त्येस्याद्वसिष्ठद्रोणयोःपुमान् ॥
कुचंदनंचपत्रांगेदुभेदेरक्तचंदने ७६ कुंडलीवरुणेकेकिभो
गिनोश्वसकुंडले केसरी तुरगेसिंहेपुन्नागेनागकेसरे ७७ क्रौं
चादनंतुघेचुल्यांचिंचोटकमृणालयोः खड्गधेनुःस्त्रियांखड्ग
पुत्रिकागंडकस्त्रियोः ७८ गवादनीद्रवारुण्यांगवांघासादना
श्रये गदयित्नुःपुमान्कामेजल्पाकेकामुकेपि च ७९ घनाघनो
वर्षुकाब्देमत्तघातुककुंजरे चक्रेचघोषयित्नुस्तुविप्रकोकि
लयोःपुमान् ८० चित्रभानुःपुमान्वैश्वानरेचाहस्करेपि च ॥
चोलकीतुकरारेस्यान्नारंगेविकुपर्वणि ८१ जलाटनोलोह
पृष्ठेजलौकायांजलाटनी तपस्वीतापसेचानुकंप्येत्रिष्वथयो
षिति ८२ मांसिकाकटुरोहिण्योस्तरस्वीशूरवेगिनोः तपोध
नस्तापसेस्यान्मुंडिणीतुतपोधना ८३ द्विजन्मा दशनेविप्रे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुर्नामक्लीबमर्शसि स्याद्दीर्घकोषिकायांस्त्रीदेवसेनातुवत्त्रि
णः ८४ सुतायामपिसेनायांदेवतानांचयोषिति नागांजनेभ
सुंदर्यांनागयष्टौचयोषिति ८५ भवेन्निधुवनंकंपेसुरतेचनपुं
सकं निर्वासनंहिंसनेस्यान्नगरादेर्बहिष्कृतौ ८६ निर्भर्त्स
नेखलीकारेलक्तकेपिनपुंसकं निर्यातनंवैरशुद्धौदानेन्यासा
र्पणेपिच ८७ निशामनंदर्शनेस्यादालोचनेचनद्वयोः निशम
नमुक्तंदृष्टौश्रुतौनिरसनंवधेप्रतिक्षेपे ८८ निष्ठीवनेप्रजन
नंपोनीजन्मन्यपिक्लीबं प्रसहनमपिभंगेस्यात्क्षेपेपंचाननः
शिवेसिंहे ८९ प्रहसनमपिप्रहासेरूपकभेदेचपरिहासे प्रणि
धानंप्रयत्नेस्यात्समाधौचप्रवेशने ९० प्रयोजनंकार्यहेत्वोः
पलाशीवृक्षरक्षसोः अथप्रवचनंवेदप्रकृष्टवचनेपिच ९१ प्र
तिपन्नोन्यलिंगःस्याद्विज्ञातेंगीकृतेपिच प्रस्फोटनंतुशूर्पस्या
ताडनेचविकाशने ९२ प्रतिमानंप्रतिछायागजकुंभांतरालयोः
प्रतियत्नस्तुसंस्कारलिप्सोपग्रहणेषुच ९३ प्रत्यर्थी वाच्यलिं
गःस्याच्छत्रौचप्रतिवादिनि परिज्वा तुपुमानिंदौपाल्किकेपरिचा
रके ९४ प्रसाधनी तुकंकत्यांसिद्धौवेशेप्रसाधनं पयस्विनीन
दीधेन्वोर्विभावर्यांचयोषिति ९५ अथपुण्यजनोयक्षेराक्षसेस
ज्जनेपिच पृथग्जनस्तुपुल्लिंगःकथितोनीचमूर्खयोः ९६ फ
लकीमत्स्यभेदेनावाच्यवत्फलकान्विते वारकीशत्रुचित्राश्वप
र्णीजीवपयोधिषु ९७ भूनात्मापुंसिनिर्दिष्टोदेवेचपरमेष्ठिनि म
हाधनंमहामूल्येसुवर्णसिल्हकेपिच ९८ महासेनःकार्त्तिके
येमहासैन्यपतावपि मदयित्नुर्मदयुतेपुमान्मद्येनपुंसकं ९९
महामुनिरगस्त्येनाकुस्तुंबुरुणिनद्वयोः मातुलानीकलायेस्याद्भं
गायांमातुलस्त्रियाम् ३०० मालुधानोमातुलाहौमालुधानीलतां
तरे मेधावीनाशुकेप्राज्ञेस्त्रियांमेधान्वितेत्रिषु ३०१ रसायनं
विषेपिस्याज्जराव्याधिजिदौषधे पुल्लिंगःपक्षिराजेचविडंगाख्यौषधे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिच ३०२ राजादनं क्षीरिकायांपियालेकिंशुकेपिच ललामस्या
त्स्वभावेचलांछनध्वजवाजिषु ३०३ शृंगेप्रधानेभूषायामपिवारुधि
पुंड्रयोः लांगली नालिकेरेद्रौरेवतीमरणेपुमान् ४ वनस्थागंधमा
जीरेवंचकव्याघ्रयोःपुमान् वर्धमानःप्रश्नभेदेशरावेरंडविष्णुषु
५ विस्मापनःस्यात्कुहकेगंधर्वनगरेस्मरे विसर्जनं परित्यागेदा
नेसंप्रेषणेपिच ६ विरोचनःप्रल्हादस्यतनयेऽर्केऽग्निचंद्रयोः
विहेठनंतुहिंसायांमर्दनेचविडंबने ७ भवेद्विहननंविघ्नहिंसयोः
स्तूलपिंजने विषयी विषयासक्तेवाच्यवत्क्लीबमिंद्रिये ८ पुंसिस्या
न्नृपतौकामदेवेवैषयिकेपिच विष्वक्से नापलिंग्यांस्याद्विष्वक्से
नोजनार्दने ९ विलेपनी सुवेषस्त्रीयवाग्वोरपियोषिति विलासी
भोगिनिव्यालेविष्वक्सेनेऽग्निचंद्रयोः १० वृक्षादनश्चलदलेमधुछ
त्रकुठारयोः वृक्षादनी तुवंदायांविदारीकंदकेपिच ११ वैरोचनि
स्तुसुगतेबलिदैत्यार्कपुत्रयोः शिखरीस्यादपामार्गेशैलपादपयोः
पुमान् १२ शिखंडिनीयुथिकायांगुंजायामपियोषिति शिखंडी
नाकलापेस्याद्बाणेयारिमयूरयोः १३ शृंगारी पूगगजयोःसशृं
गारसुवेशयोः अथश्लेष्मघनामल्यांकेतक्यामपियोषिति १४ सं
मूर्छन मभिव्याप्तावुच्छ्रायमोहयोरपि समुत्थानंसमुद्योगेव्याधी
नांनिर्णयेपिच १५ सदादानो भ्रमातंगेहेरंबेगंधहस्तिनि स्यात्सं
वदनमालोचेवशीकारेनपुंसकम् १६ समादाने समीचीनग्रह
णेसौगतान्हिके संवाहनं वाहनेस्याद्भारादेरंगमर्दने १७ समापनं
परिछेदेसमाप्तिवधयोरपि सनातनःशाश्वतेऽजेपितृतिथ्यंतरेहरे
१८ स्तनयित्नुःपुमान्वारिधरेपिस्तनितेपिच सरोजनी तुकमला
करेपद्मेचयोषिति १९ समापन्नंसमाप्तेस्यात्प्राप्तेक्लिष्टेवधेपिच
संबाधनंद्वाःसदनेशूलाग्रद्वारपालयोः २० संयमनीयमपुर्यांसं
यमनेबंधनेव्रतेऽपिस्यात् सारसनमप्युरस्त्रेतनुत्रीणांमेखलायां
च २१ सामिधेनीतुधाय्यायांसमिध्यपिचयोषिति समयोनि सु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सामोत्थेब्रह्मकुंजरयोरपि २२ सुदर्शनो हरेश्चक्रेमेरुजंबुद्रुमेपु
मान् नद्र्योःशक्रनगरेआज्ञौषधिभिदोःस्त्रियाम् २३ सुयामुनो
वत्सराजेप्रासादेभ्रांतरेच्युते सुकर्मा तुपुमान्योगभेदेस्याद्देवशि
ल्पिनि २४ सुधन्वाप्रौढधानुष्केत्रिषुनाविश्वकर्मणि सुपर्वा ना
शरेवंशेपर्वधूमसुरेपिच २५ सुदामा तुपुमान्वारिधरपर्वतभेद
योः सौदामन्यप्सरोभेदेतडित्तद्भेदयोःस्त्रियाम् २६ दूर्षयित्नुः
पुमान्सुत्रेकांचनेतुनपुंसकं ॥ नपंच॥ अथातिसर्जनंदानेवधे
पिचनपुंसकं २७ अपवर्जनंतुदानेनिर्वाणत्यागयोरपि अपसर्जन
मान्नातेपरिवर्जनदानयोः २८ अग्रजन्माद्विजेज्येष्ठभ्रातरिब्राह्म
णिस्मृतः अथानुवासनंस्नेहवस्तिधूपनयोरपि २९ अभिनिष्ठा
नोप्यक्षरमात्रेपिस्याद्विसर्जनीयेच अंतेवासीशिष्येस्याच्चांडा
लेप्रांतगेपिच ३० स्यादुपस्पर्शनंस्पर्शेस्नानाचमनयोरपि उप
संपन्नमुद्दिष्टंनिहतेचसुसंस्कृते ३१ कारंधमीकांस्यकारेधातु
वादरतेपिच कामचारीकामुकेस्यात्स्वछंदकलविंकयोः ३२ कि
ष्कुपर्वा पुमानिक्षौवेणौपोटगलेपिच कृष्णवर्त्मापुमानग्नौदुराचा
रेविधुंतुदे ३३ स्याद्गंधमादनोभृंगेगन्धकेवानरांतरे स्त्रीसुरायां
नगेनस्त्रीचिरजीवीवीहूकाजयोः ३४ तिक्तपर्वाहिलमोचीगुडूची
यष्टिषुस्त्रियां दंतधावनःखदिरेदंतशुद्धौनपुंसकं ३५ स्याद्धूम
केतनःपुंसिकेतुग्रहहुताशयोः स्यान्नंदिवर्धनोगर्भेपक्षांतेतने
येपिच ३६ प्रतिपादनंतु दानेप्रतिपत्तौचबोधने स्यात्पृष्टहा
यनो धान्यविशेषेचमतंगजे ३७ प्रचलाकीमयूरेस्याद्भुजंगेचाऽ
पिदृश्यते स्यात्पद्मलांछनोलोकेश्वरेब्रह्मणिभास्करे ३८ धन
देचस्त्रियांतारालक्ष्मीवाग्देवतासुच पीतचंदनमुद्दिष्टंकालीय
कहरिद्रयोः ३९ पृष्ठशृङ्गी पुमान्दंशभीरौषंढेवृकोदरे वरचंदन
माख्यातंकालीयेदेवदारुणि ४० वरवर्णिनी तुलाक्षाहरिद्रारो
चनासुच फलिन्यामुत्तमानारीसाध्वीयस्यामपिस्त्रियाम् ४१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मधुसूदनस्तुपुंसिभ्रमरेवनमालिनी महारजनमुद्दिष्टंशा
तकुम्भकुसुम्भयोः ४२ स्यान्मृत्युवंचनःशंभौश्रीफलद्रोण
काकयोः वनमालीतुगोविंदेनारास्त्रीवनमालिनी ४३ विषया
यी पुमान्राज्ञिवैषयिकजनेपिच इंद्रियेकामदेवेचविषयासक्त
पूरुषे ४४ विश्वकर्मा सहस्रांशौमुनिभित्देवशिल्पिनोः विघ्न
कारीस्मृतोघोरदर्शनेपिविघातिनि ४५ वृषपर्वापुमान्दैत्य
भेदेप्यन्धकसूदने व्योमचारीतुनिर्दिष्टोदेवतायांनिहङ्गमे ४६
शकुलादनी स्त्रियांकृष्णाभेदीकटुकशाकयोः शालंकायनउ
द्दिष्टोमुनिभेदेच नंदिनि ४७ शिवकीर्तनस्तुपुंसिभृंगरीटेसुरद्वि
षि श्वेतवाहनइत्येषसुधाधाम्निधनंजये ४८ श्वेतधामापुमा
निंदौघनसाराब्धिफेनयोः स्यात्षष्टीहायनोधान्यविशेषेकुंजरेपु
मान् ४९ संप्रयोगीकलाकेलीकामुकेसप्रयोजने हरिचंदन
मस्त्रीस्यात्त्रिदशानांमहीरुहे ५० नपुंसकंतुगोशीर्षेज्योत्स्ना
कुंकुमयोरपि हरिवाहनस्तुपुंसिशचीपतिविवस्वतोः ५१ ॥ न
षट्॥ अंतावसायीश्वपचेमुनिभेदेचनापिते कलानुनादीरो
लंबेकलविंकेकपिंजले ५२ जायानुजीवीपुंसिस्यान्नटेचब
कपक्षिणि सहस्रवेधिक्लीबंस्याद्रामठेनाम्लवेतसे ५३ ॥इति
नांतवर्गः॥ पैकम्॥ पोनावातांडपूतेषुपातरिचकीर्तितः॥
स्त्रियांतुरसपोपानेपूतपूरितकेचसः १ पद्विः॥ कल्पःशास्त्रे
विधौन्यायेसंवर्तेब्रह्मणोदिने कपिर्नासिल्हकेशाखामृगे च
मधुसूदने २ कूपःकूपकमृन्मानेगर्तोगुणवृक्षके कूपोद्रो
णशालकेस्याद्रोणपत्न्यांकृपीस्मृता ३ कृपा दयायांक्षेपस्तु
निंदाविक्षेपलेपने गर्वप्रेरणयोश्चाथरवप्यःक्रोधेबलात्कृतौ ४
गोपो गोपालकेगोष्ठाध्यक्षेपृथिवीपतावपि ग्रामस्याधिकृतेपुं
सिशारिवाख्यौषधौस्त्रियां ५ क्षुपः क्षुपःसार्शनयोस्त्रपुंसीस
करंगयोः तल्प मट्टेकलत्रेचशयनीयेचनह्रयोः ६ त्रपालज्जा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुलटयोस्तापः संतापकृच्छ्रयोः तापी नद्यंतरेदर्पः कस्तूर्यामप्य
हंकृतौ ७ नीपः कदंबबंधूकनीलाशोकद्रुमेषुच दीपः प्रदीपो
त्तरीयेस्याद्धुतायोचमस्तके ८ पुष्पं विकाशिकुसुमस्त्रीरजःसु
नपुंसके रूपंस्वभावसौंदर्यनालोकपशुशब्दयोः ९ ग्रंथावृत्तौना
टकादावाकारश्लोकयोरपि रेपः स्यान्निंदितेक्रूरेरोपोरोपणबा
णयोः १० लेपःप्रलेपनेजग्धौवपाविवरमेदसोः बाष्पउष्मणिलो
हेथशष्पं बालतृणेस्मृतं ११ पुंसिस्यात्प्रतिभाहानौ शाप आक्रो
शदिव्ययोः। शिल्पंस्तुवेक्रियायोग्येस्वापः शयननिद्रयोः १२ स्पर्शा
ज्ञतायामज्ञानेसूपोव्यंजनसूदयोः ॥ पत्रि ॥ अनूपामहिषेनांः
बुप्रायदेशेतुवाच्यवत् १३ अम्लपा तुजलौकायांडाकिन्यांरास
सेतुना आवापोभांडवपनेपरिक्षेपालवालयोः १४ आक्षेपो भ
र्त्सनाः कृष्टिकाव्यालंकृतिषुस्मृतः आकल्पःकल्पनेवेशेप्युडुपं
तुप्लवेस्त्रियाम् १५ चंद्रेपुंस्युलपोनस्त्रीगुल्मिन्यांनातृणांतरे
कच्छपी वल्लकीभेदेदुलौक्षुद्रगदांतरे १६ पुंसिनिध्यंतरेकूर्मेम
ल्लबंधांतरेपिच कलापःसंहतौबर्हेकांच्यांभूषणतूणयोः १७ चं
द्रेविदग्धेव्याकरणभेदेपिकथ्यतेबुधैः कशिपुर्भक्ताच्छादनयो
रेकोक्त्यापृथक्तयोःपुंसि १८ काश्यपउक्तोमुनिमृगयोर्भेदेचकाश्यपी
क्ष्मायां कुतपोस्त्रियांदौहित्रेवाद्यच्छागलकंबले कुशेदिनस्याष्ट
मेंशेनासूर्येकुणपीपुनः विट्सारिकायांकुणपःपूतिगंधेशवेपि
च जिव्हापःशुनिमार्जारेप्रतापस्तापतेजसोः २० पादपःपादपीठ
हौपादुकायांतुपादपा रक्तपास्याज्जलौकायांडाकिन्यांनातुरा
क्षे २१ विटपोनस्त्रियांस्तंबशाखाविस्तारपल्लवे विटाधिपेना
विकल्पःपुंसिभ्रांतौचकल्पने २२ ॥ पचतुः ॥ अभिरूपोबुधे
रम्येऽपलापःप्रेम्ण्यपन्हवे अवलेपस्तुगर्वेस्याल्लेपनेभूषणेपिच
२३ उपतापस्त्वरायांस्यादुत्तापगदयोरपि जलकूपीकूपगर्तेपुष्क
रिण्यांचयोषिति २४ नागपुष्पस्तुपुन्नागनागकेसरपंचके परि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वापस्तुपर्युप्तोजलस्थानेपरिछदे २५ परितापस्तुपुंसिस्याद्दुःखेच
नरकांतरे परिकल्पो भयेकंपेप्रासरूपोन्नरम्ययोः २६ पिंडपुष्प
मशोकेचजवायांचकुशेशये बहुरूपः शिवेविष्णौधूनकेसरठेस्म
रे २७ मेघपुष्पंतुपिंडाम्भांबुनादेयेहरेर्हये विप्रलापो विरोधोक्ताव
पार्थवचनेपिच २८ बीजपुष्पं मरुबकेतथामदनकेपिच॥वृकधू
प स्तुसरलद्रवकृत्रिमधूपयोः २९ वृषाकपिः पुमान्कृष्णेशंकरेजा
तवेदसि हेमपुष्पमशोकेचजवापुष्पेनपुंसके ३० ॥ पपंच ॥ भवे
च्चामरपुष्पंतुपूगेकाशाम्रकेतके ३१ ॥ इतिपांतवर्गः॥१३०२॥
॥फेकम्॥ फोयक्षसाधनेस्फातेझंझावातेपिपुंस्यवं फेरुक्षोक्तौ
फूत्कृतौचतथानिःफलभाषणे १॥ फद्विः॥ गुंफस्तुगुंफनेबाहो
रलंकारेचकीर्यते रेफो रवर्णेपुंसिस्यात्कुत्सितेपुनरन्यवत् २ श
फं मूलेतरूणांस्या द्गवादीनांखुरेपिच शिफा जटायांसरितिमांसि
कायांचमातरि ३॥ इतिफांतवर्गः॥ १३०२॥ बेकं ॥बःपुमा
न्वरुणेसिंधौभगेतोयेगतेतुवा गंधनेतंतुसंतानेपुंस्येववपनेस्मृ
तः १ ॥ बद्विः॥कंबुःशंखेस्त्रियांपुंसिशंबूकेवलयेगजे कंबीरं
शेचवंशस्यखजाकायांस्त्रियामपि २ क्लीबंस्यात्पंडकेनस्त्रीवा
च्यलिंगस्त्वविक्रमे ॥खर्बं संख्यांतरेक्लीबंनीचेवामनकेत्रिषु ३
गर्वोऽभिमानेवलेपेजंबुः स्यात्पादपांतरे तथासुमेरुसरितिद्वी
पभेदेपिचस्त्रियां ४ डिम्बो भयध्वनाबंडेफुप्फुसप्लीहवेश्मवे द
र्वी स्त्रियांखजाकायांफणायामुरगस्यच ५ पूर्वं तुपूर्वजेपिस्या
त्पूर्वःप्रागाद्ययोस्त्रिषु लंबा पद्मालयागौर्योस्त्रिरूतुंब्यामपिस्त्रि
याम् ६ बिम्बंतुप्रतिबिंबेपिमंडलेपुंनपुंसकं बिंबिकायाःफलेक्लीबं
वंस्ककलासेपुनःपुमान् ७ शंबः स्यान्मुसलग्रंथलोहमंडलकेप
वौ शुभान्वितेत्रिषुस्तंबो प्रकांडद्रुमगुल्मयोः ८ ॥बत्रिः॥ कदं
बंनिकुरंबेस्यान्नीपसिद्धार्थयोःपुमान् कलंबी शाकभेदेस्या
त्कदंबशरयोःपुमान् ९ कादंबः स्यात्पुमान्पक्षिविशेषेसायके

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिच गजाह्वाकरिपिप्पल्यांगजाह्वंहस्तिनापुरे १० गंधर्वः पशुभेदे-
स्यात्पुंस्कोकिलतुरंगयोः अंतराभवसत्वेचगायनेखेचरेपिच ११ गो
डुंबः शीर्णवृंतेचगवादन्यांतुयोषिति द्विजिह्वस्तुखलेसर्पेनितंबः
स्कंधरोधसोः १२ स्त्रियाःपश्चात्कटितटेकटकेकटिमात्रके प्रलंबो
दैत्यभेदेस्यात्त्रपुषेपिपयोधरे १३ तालांकुरेपिशाखायांहारभेदेम
लंबने भूजम्बूरपिगोधूमेविकंकतफलेस्त्रियाम् १४ हेरंबो वि
घ्नराजेस्यामहिषेशौर्यगर्विते॥अचतुः॥राजजम्बूस्तुजंबूभि-
त्पिंडखर्जूरयोस्त्रियां १५ ललज्जिह्वोःन्यवह्निस्नेकमेलकशु
नोःपुमान् शतपर्वाचदूर्वायांवचाभार्गवयोषितोः १६ ॥बपञ्च
॥धूलीकदंबोनीपेस्यात्तिनिशेवरुणद्रुमे शृगालजंबूर्गोडिं
बेतथाघोटाफलेस्त्रियां १७ ॥इतिबांतवर्गः॥ १३२२॥भैकं॥
भंनक्षत्रेगभस्तौस्त्रीपुंसिस्याद्भृगुनंदने भूःस्थानमात्रेकथिताध
रण्यामपियोषिति १८ ॥भद्विः॥कुंभोराश्यंतरेहस्तिमूर्धशिरा-
स्सांतरे कार्मुकेवारनार्यांचघटेक्लीबंतुगुग्गुलौ २ स्त्रियासुरा
कट्फलयोःपृश्निकायांचपाटलौ गर्भो भ्रूणेर्भकेकुक्षौसंधौपन
सकंटके ३ जंभो दैत्यविशेषेदंतेजंबीरभक्षणयोः जृंभा वि-
काशज्रृंभणयोस्त्रीषु डिंभोपिबालिशेबाले ४ दंभ स्तुकै-
तवेकल्के दृग्भूःस्त्रीसर्पवज्रयोः नाभिर्मुख्यनृपेचक्रमध्यक्ष
त्रिययोःपुमान् ५ द्वयोःप्राणिप्रतीकेस्यात्स्त्रियांकस्तूरिकामदे
निभस्तुकथितोव्याजेपुल्लिंगःसदृशेत्रिषु ६ रंभाकदल्यप्सरसो
र्नावेणौवारणांतरे विभुः प्रभौसर्वगतेशंकरब्रह्मणोस्तुना ७
शंभुःपुंसिमहादेवेपरमेष्ठिनिचार्हति शुभो योगेशुभंक्षेमेवाच्य
वत्क्षेमशालिनि ८ खसंचारिपुरेस्त्रीतु शोभा कांतीच्छयोर्म-
ता सभा सामाजिकेगोष्ठ्यांद्यूतमंदिरयोरपि ९ स्वर्भूर्नाब्र
ह्मणिहरौस्तंभः स्थूणाजडत्वयोः ॥ भत्रिः ॥ आरंभस्तुत्व
रायांस्यादुद्यमेवधदर्पयोः १० आत्मभूर्नाविधौकामेप्यृषभ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्वौषधांतरे स्वरभिद्वृषयोः कर्णरंध्रकुंभीरपुच्छयोः ११ उत्तर
स्थः स्मृतश्रेष्ठस्त्रीनराकारयोषिति शूकशिंब्यांशिरालायांवि
धवायांकचिन्मता १२ ककुप्स्त्रियांप्रवेणीदिक्शोभासुचं
पकस्त्रजि ककुभो रागभेदेपिवीणांगेऽर्जुनपादपे १३ कटभी
वृक्षभेदेपिज्योतिष्मत्यामपिस्त्रियाम् करभो मणिबंधादि
कनिष्ठांतोष्ट्रतत्सुते १४ कुसुंभंहेमनिमद्भारजकेनाकमंड
लौ गर्भदंश्वेतकुमुदेगर्भभोगंधभिद्यपि १५ रासभेगर्दभीक्षु
द्रजंतुरोगविशेषयोः दुर्लभ स्त्रिषुदुष्प्रापकच्छुरे दुंदुभिः पुमा
न् १६ वरुणेदैत्यभेदेयोंक्षव्यक्षबिंदुत्रिकद्वये निकुंभः कुंभ
कर्णस्यतनयेदंतिकौपधौ १७ वल्लभो दयितेऽध्यक्षेसल्लक्ष
णतुरंगमे वर्षाभूः स्त्रीचशोथघ्न्यांभूलताप्लवयोः पुमान् १८
विष्कंभोयोगभेदेस्याद्विस्तारप्रतिबिंबयोः रूपकांगप्रभेदेचबंध
भेदेचयोगिनां १९ विश्रंभः केलिकलहेविश्वासेप्रणयेपिच वि
ष्टंभः प्रतिबंधेस्यात्प्रभेदेचामयस्यच २० वृषभः श्रेष्ठवृषयो
र्वैदर्भीरीतिभिद्यपि वैदर्भं वाक्यवैक्रल्ये शरभ स्तुपशोर्भिदि
२१ करभेवानरभिदि सनाभिर्ज्ञातितुल्ययोः सुरभिः शल्लकी
मातृभिन्मुरागोषुयोषिति २२ चंपकेचवसंतेचतथाजातीफ
लेपुमान् स्वर्णगंधोत्पलेक्लीबंसुगंधिकांतयोस्त्रिषु २३ वि
ख्यातेसचिवेधीरेचैत्रेपिचपुमानयं ॥ भचतुः॥ अनुष्टुप्स्या
त्सरस्वत्यांछंदोभेदेचयोषिति २४ अवष्टंभः सुवर्णेचस्तंभप्रारं
भयोरपि शातकुंभं सुवर्णेस्यात्शातकुंभो ध्वमारके २५॥॥
॥इतिभांतवर्गः॥ मैकम्॥ मोयमेसमयेपिस्याद्विषेचमधुसू
दने मास्त्रीपद्मालयायांस्यात्पुल्लिंगश्चंद्रशेखरे १ मद्विः॥
आमोऽरूक्ड्डिदेः पुंसिस्यादपक्वेऽन्यलिंगकः उमाऽतसीहैम
वतीहरिद्राकीर्त्तिकांतिषु २ उर्मिः स्त्रीपुंसयोर्वीच्यांप्रकाशेवे
गभंगयोः वस्त्रसंकोचरेखायांवेदनापीडयोरपि ३ क्रमश्चा

For Private and Personal Use Only

तुक्रमेशक्तौकंपेचाक्रमणेपिच क्षमा भूमौतितिक्षायांस्त्रि
यांयुक्तेनपुंसकं ४ वाच्यवच्छक्तहितयोः काम स्मरेच्छ
योःपुमान् रेतस्यपिनिकामेचकाम्येपिस्यान्नपुंसकं ५ कामि
नीकामुकेरत्यांस्त्रीकिंक्षेपवितर्कयोः निंदायांचपरिप्रश्नेवा
च्यलिंगमुदाहृतं ६ क्रिमि र्नाकृमिवत्कीटेलाक्षायांकृमिले
त्वरे किर्मीपलाशेशाखायांहेमपुत्र्यांचयोषिति ७ क्षुमाःत
सीनीलिकयोःक्षेमो स्त्रीतुभ्यरक्षणे चंडायां नाक्षुभेनस्त्री
कात्यायन्यांतुयोषिति ८ क्षौममट्टदुकूलेःस्त्रीक्षौमंवल्कल
जांशुके शशजेःतसिजेरवर्मेपौरुषेकोषजांशुके ९ गमोनाः
क्षविवर्त्तेस्याद्पर्यालोचनेःध्वनि ग्रामः स्वरेसंघसंघेग्रीष्म
उष्मर्तुभेदयोः १० गुल्मः सेनाघट्टभिदोःसैन्यरक्षणरुग्भि
दोः स्तंबेस्त्रियामामलक्यैलवलीवस्त्रवेशयोः ११ घर्मःस्या
दातपेग्रीष्मेप्युष्णस्वेदांबुनोरपि चमूः सेनाविशेषेचसेनामा
त्रेचयोषिति १२ जाल्मःस्यात्पामरेक्रूरेपुंस्यसमीक्ष्यकारिणि
जिह्मस्तुकुटिलेमंदेक्लीबंतगरपादपे १३ तोक्मंकर्णमलेपुं
सिहरितेचहयेस्वरे दमस्तु दमथेदंडेकर्दमेदमनेपुमान् १४
दस्मस्तुयजमानेस्याद्पिचौरेहुताशने द्रुमो महीरुहेपारि
जातेकिंपुरुषेस्वरे १५ धर्मो स्त्रीपुण्यआचारेस्वभावोपमयोः
क्रतौ अहिंसोपनिषन्यायेनाधनुर्यमसोमपे १६ ध्यामंदम
नकेगंधातृणेघश्यामलेत्रिषु नेमिर्नातिनिशेकूपत्रिकाचक्रां
तयोःस्त्रियां १७ नेमःकालेवधौखंडेप्राकारेकैतवेपिच पद्मो
स्त्रीपद्मकेव्यूहनिधिसंख्यांतरेंबुजे १८ नानागेस्त्रीफंजिका
श्रीकारटीपन्नगेषुच ब्रह्मी तुफंजिकायांस्याच्छाकमत्स्यप्र
भेदयोः १९ ब्राह्मी तुभारतीसोमवल्लरीब्रह्मशक्तिषु भ्रमोंबु
निर्गमेभ्रांतौकुंदभ्रमणयोरपि २० भामः क्रोधेरवौदीप्तौभी
ष्मोगांगेयभीमयोः भीमो म्लवेतसेघोरेशंभौमध्यमपांडवे २१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूमिर्वसुंधरायांस्यात्स्थानमात्रेपिचस्त्रियां भौमः कुजेचनरकेपुंसिभूमि
भवेत्रिषु २२ यमोन्यलिंगोयमजेनाकाकेशमनेशनौ शरीरसाधनापेक्ष
नित्यकर्मणिसंयमे २३ पामस्तुपुंसिमहरेसंयमेपिप्रकीर्तितः ॥ यामिः कु
लस्त्रीस्वस्रोस्त्री युग्मो धनुषिसंयुगे २४ रश्मिः पुमान्दीधि
तौचपक्ष्मप्रग्रहयोरपि रमा लक्ष्म्यांरमः कांतेरक्ताशोकद्रुमेस्वरे
२५ रामा योषाहिंगुनद्योःक्लीबंवास्तुककुष्ठयोः नाराघवेचवरुणे
रैणुकेयेहलायुधे २६ हयेचपशुभेदेचत्रिषुचारौसितेःसिते रु
मा सुग्रीवदारेषुविशिष्टलवणाकरे २७ रुक्मंचकांचनेलोहेल
क्ष्मीःसंपत्तिशोभयोः ऋध्द्यौषधेचपद्मायां

वृद्धिनामौषधेपिच २८ स्त्रीफलिन्यांवामि र्वतौस्त्रियांपुंसि
हुताशने वामं धनेहरेपुंसिकामदेवेपयोधरे २९ वल्गुप्रतीप
सव्येषुत्रिषुनार्यांस्त्रियामथ वामीशृगालीवडवारासभीकरभी
षुच ३० शामी सक्तुफलायांचशिंबिकायांचवागुजो श्यामो वटेप्र
यागस्यवारिदेवृद्धदारके ३१ पिकेचकृष्णहरितोःपुंसिस्यात्तद्वति
त्रिषु मरिचेसिंधुलवणेक्लीबंस्त्रीशारिवौषधौ ३२ अप्रसूतांगना
यांचप्रियंगावपिवागुजो यमुनायांत्रियामायांकृष्णत्रिवृत्तिकौषधौ
३३ नीलिकायामथश्रामो मासेमंडपकालयोः शुष्मंतेजसिस्त्र
यैनासमा संवत्सरेस्त्रियां ३४ सर्वसाधुसमानेषुसमं स्यादभि
धेयवत् सीमाघाटस्थितेक्षेत्रेषंडकोषेःपिचस्त्रियाम् ३५ सू
क्ष्मं स्यात्कैतवेध्यात्मेपुंस्यणौत्रिषुचाल्पके सूक्ष्मं क्षीरेचनभसि
सोम स्तुहिमदीधितौ ३६ वानरेचकुबेरेचपितृदेवेसमीरणे व
सुप्रभेदेकर्पूरेनीरेसोमलतौषधौ ३७ हिमं तुषारमलयोद्भवयोः
स्यान्नपुंसकं शीतलेवाच्यलिंगोथ होमिर्नापावकेघृते ३८
॥मत्रिः॥ अधमः स्याद्गर्हहीनेप्यागमः शास्त्रआगमे आश्र
मोब्रह्मचर्यादौवानप्रस्थेवनेमठे ३९ अस्त्रियामुत्तमादुग्धिका
यांत्रिषुचभद्रके उद्दामोबंधरहितेस्वतंत्रेचप्रचेतसि ४० कल

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मः पुंसिलेखन्यांशालौपाटच्चरेपिच कुसुमे स्त्रीरजोनेत्ररोगयोः
फलपुष्पयोः ४१ कृत्रिमं लवणभेदेनासिल्हकेरचितेत्रिषु गो
लोमीश्वेतदूर्वायांस्याद्वचाभूतकेशयोः ४२ गोधूमो नागरंगे
स्यादोषधिव्रीहिभेदयोः गौतमोना मुनौबुद्धेरोचनीदुर्गयोःस्त्रि
यां ४३ तलिमं कुट्टिमेतल्पेचंद्रहासेवितानके दाडिमस्तुत्रि
लिंगस्यादेलायांकरकेत्रिषु ४४ निष्क्रमोबुद्धिसंपत्तौनिर्गमेदुष्कु
लेपिच निगमो वणिजेपुर्यांकटेवेदेवणिक्पथे ४५ नियमोम्ब
णायांचप्रतिज्ञानिश्चयेव्रते नैगमं स्यादुपनिषद्वणिजोर्नागरेपि
च ४६ परमंस्यादनुज्ञायामव्ययंपरमःपरे प्रमथस्तुभवेदा
दौप्रधानेपिचवाच्यवत् ४७ प्रतिमा गजदंतस्यबंधेचानुकृ
तावपि पंचमो रागभेदेस्यात्स्वरभेदेचपंचमी ४८ पांडवानां
चपत्न्यांस्त्रीपंचानांपूरणेत्रिषु प्रक्रमःक्रमेवसरेमध्यमोमध्य
जेन्यवत् ४९ पुमान्स्वरेमध्यदेशेप्यवलग्नेतुनस्त्रियाम् स्त्रि
यांदृष्टरजोनार्यांकर्णिकांगुलिभेदयोः ५० न्यक्षरंक्ले दसितथा
ललामंलांछनेध्वजे शृंगेप्रधानेभूषायांरम्येवाल धिपुंड्रयोः
५१ तुरंगेचप्रभावेथव्यायामःपौरुषेश्रमे विषमेदुर्गसंचारेविश्रा
मोभ्रांतिहावयोः ५२ विद्रुमोरत्नवृक्षेपिप्रवालेपिपुमानयम् वि
लोमस्तुप्रतीपेस्याद्भुजंगेवरुणेमुनि ५३ आमलक्यांविलोमी
चविलोमंचारपट्टने विक्रमस्तुपुमान्क्रांतिमात्रेस्याच्छक्तिसं
पदि ५४ संक्रमःक्रमणेपुंसिनस्त्रीस्याद्दुर्गसंचरे संभ्रमःसाध्व
सेपिस्यात्संवेगादरयोरपि ५५ सत्तमःस्यात्पूज्यतमेसाधीयस्यु
त्तमेत्रिषु सरमा कुक्कुरीदेवशुन्योःस्याद्राक्षसीभिदि ५६ सुष
मा नंतशोभायांस्त्रीचारौचसमेत्रिषु सुषीमःशीतलेचारोत्रिषुना
पन्नगांतरे ५७ ॥ मचतुः ॥ भवेदनुपमासुप्रतीकिन्यांस्त्रीत्रि
षूत्तमे अभ्यागमोविरोधाभिघाताभ्युद्गमनांतिके ५८ उप
क्रमस्तूपधायांज्ञात्वारंभचिकित्सयोः उपक्रमे चिकित्सायामुपगमः ५

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वीकारेंतिकसर्पणे ५९ जलगुल्मोजलावर्त्तेकच्छपेजलचत्व
रे दंडायामस्तुकीनाशेदिवसेकुंभसंभवे ६० प्लुवंगमस्तुमं
डूकेतथाशाखामृगेपिच पराक्रमो विक्रमेस्यात्सामर्थ्योद्योग
योरपि ६१ महापद्मःपुमान्नागनिधिसंख्यांतरेषुच यातयामो
न्यवज्जीर्णेपरिभुक्तोज्झितेषुच ६२ सार्वभौमस्तुदिङ्नागे
सर्वपृथ्वीपतावपि ॥ मपञ्च॥ अभ्युपगमस्तुपुंसिस्वीकारेंति
कसमागमेच ६३ नक्षत्रनेमिरुक्तारेवत्यांनाध्रुवेचंद्रे ॥ इति
मांतवर्गः॥ यैकं॥ योनावायोपमनेयायाञ्चाप्तिधूमितत्यागेषु
॥वारणयोगसमज्ञायानेषुपुमांस्तुगंतरिख्यातः १ ज्या मातरि
वसुधायांमौर्व्यांस्तुक्लीवमन्हिगमनेच नाज्वालनेद्यौस्त्रिदशा
लयत्रिदशवर्त्मनोर्योषिति २ अर्घ्यं शिलाजतुन्यर्घ्योंबुधेन्या
य्येचवाच्यवत् अंत्यस्तुपुंसिमुस्तायामंतोद्भूतेःधमेत्रिषु ३ अन
र्घ्यमर्घस्ययोग्येस्यादर्घार्थेपिचवाच्यवत्॥ अन्योसदृशेतरयो
रर्य्यःस्यात्स्वामिवैश्ययोः ४ आस्यंमुखेचतन्मध्येतद्भवेचस्त्रि
यांस्थितौ इज्या दानेध्वरेर्चायांसंगमेस्त्रीगुरौत्रिषु ५ इभ्या
करेणुशल्लक्योःस्त्रियामाढ्येचवाच्यवत् कश्यंत्रिषुकशार्हेस्या
त्क्लीबंमद्याश्वमध्ययोः ६ कन्या कुमारिकानार्योरोषधीराशि
भेदयोः क्षयो रोगांतरेवेश्मकल्पांतापचयेषुच ७ कल्यं प्रभा
तेक्लीबंस्यात्कल्योवाकुश्रुतिवर्जिते सज्योनीरोगदक्षेषुकल्या
णवचनेपिच ८ उपायवचनेपिस्यात्त्रिषुमद्येतुयोषिति कक्ष्या
बृहतिकायांस्यात्कांच्यांमध्येभबंधने ९ हर्म्यादीनांप्रकोष्ठेच
कार्यहेतौप्रयोजने काव्यं ग्रंथेपुमान्शुक्रेकाव्यास्यात्पूतना
धियोः १० कांस्यं वाद्यांतरेपानपात्रेस्यात्तैजसांतरे॥ कायःक
दैवतेमूर्तौसंघेलक्ष्यस्वभावयोः ११ मनुष्यतीर्थेकार्यंस्यात्
क्रियायांपायचेष्टयोः आरंभेनिष्कृतौपूजासंप्रधारणकर्मसु
१२ शिक्षाचिकित्साकरणेकुड्यंभित्तौविलेपने कुल्यंस्यात्की

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कसेप्युष्ट्रद्रोणीशूर्पमिषेषुच १३ कुल्या पयःप्रणाल्यांचनद्यां
वीजंतिकौषधौ कुलोद्भवेकुलहितेत्रिषुमान्येपुनःपुमान् १४ कृ
त्या क्रियादेवतयोस्त्रिषुत्रिहिष्टकार्ययोः गयः स्यात्प्रभुराजर्षौ
भेदेतीर्थेपुनर्गया १५ गव्यं नपुंसकंज्यायांरागद्रव्येपयस्त्रि
यां गोसमूहेत्रिलिंगंतुगोदुग्धादौचगोहिते १६ ग्राम्यंस्त्रीकर
णेक्लीबेऽश्लीलप्राकृतयोस्त्रिषु गुह्यं रहस्युपस्थेचगुह्यःकम
ठदंभयोः १७ गृह्यो गुदेग्रंथिभेदेक्लीबंशाखापुरेस्त्रियां गृहा
सक्तमृगादौनात्रिषुचास्वैरिपक्षयोः १८ गेयं तुगीतेगेयःस्या॰
ज्ञातव्येगायनेत्रिषु गोप्योदासीसुतेपुंसिरक्षणीयेभिधेयवत् १९
चव्यं तुचविकेक्लीबंवचायामपियोषिति चयःसमूहेप्राकारमू
लबंधेसमाहृतौ २० चित्यं मृतकचैत्येस्याच्चित्यामृतचितौस्त्रियां
चैत्यमायतनेबुद्धवैद्येनोद्देश्यपादपे २१ चोद्यं स्यादद्भुतेप्रश्नेचो
दनार्हेतुवाच्यवत् छायास्यादातपाभावेप्रतिबिंबार्कयोषितोः २२
पालनोत्कोचयोःकांतिसच्छोभापंक्तिषुस्त्रियां जया जयंतीति
थिभित्पथ्योमातत्सखीषुच २३ अग्निमंथेनाजयंतेविजयेचयुधि
ष्ठिरे जन्यंहृद्देपरीवादेसंग्रामेचनपुंसकं २४ जन्या मातृवय
स्यायांजन्यःस्याज्जनकेपुमान् त्रिषूत्पाद्यजनित्रोश्चनवोढाज्ञा॰
तिभृत्यकेः २५ वरस्निग्धेऽथजन्युःस्यात्पुंसिप्राण्यग्निधातृषु त्र
यीत्रिवेद्यांत्रितयेननाताक्ष्यौश्वसर्पयोः २६ गरुडाग्रजेसुपर्णे
चपुंसिक्लीबेरसांजने तिष्योनक्षत्रभेदेस्यात्कलौधात्र्यांचयोषिति
२७ द्रव्यं स्यात्पित्तलेवित्तेपृथ्व्यादौचविलेपने क्लीबेचभेषजेभव्ये
द्रुविकारेचवाच्यवत् २८ दस्युश्चौरेपुंसिरिपौदायस्तोतुंठभाषणे
॥ विभक्तव्यपितृद्रव्येतथाहरणदानयोः २९ दिव्यं लवंगेधात्र्यां
स्त्रीक्लौदिविभवेत्रिषु दूष्यंत्रिषुदूषणीयेक्लीबंवस्त्रेचतद्गृहे ३०
दूत्यंदूतस्वभावेचभावेकर्मण्यपिस्मृतं दैत्यो।सुरेसुरायांतुदैत्या
चंडौषधावपि ३१ धन्याधात्र्यामलक्योःस्याद्धन्यंपुण्यवतित्रिषु

धान्यंव्रीहिषुधन्याकेधिष्ण्यंस्थानाग्निसद्मसु ३२ शाक्तावृसे
व्यशनयो नीतिद्यूतविशेषयोः नाट्यंतौर्यत्रिकेलास्येन्स्त्रियां
स्यात्संततेऽपिच ३३ शाम्पतेत्रिषु पथ्यास्त्रीहरीतक्यांहितेत्रि
षु पद्मंश्लोकेपुमान्क्षुद्रेपद्मावर्त्मनिकीर्तिता ३४ पाक्यं
विटाख्यलवणेयवक्षारेपुनःपुमान् प्रायोमरणानशनेमृत्यौ
बाहुल्यतुल्ययोः ३५ प्रियोहृद्येऽन्यवत्पुंसिवृद्धिनामौषधौ
धवे पीयुःकालेरवौघूकेनापुण्यंशोभनेत्रिषु ३६ क्लीबंधर्मे
चसुकृते पुष्यःकलियुगेस्मृतः नक्षत्रमासयोर्भेदेपूज्यःश्व
शुरवंद्ययोः ३७ पेयंपातव्यपयसोःपेयाश्राणाच्छमंडयोः॥
वंध्यस्त्वफलवृक्षादौस्त्रियांस्यादप्रजस्त्रियां ३८ वर्या पतिं
वरायांस्त्रीवरेण्येत्रिषुनास्मरे बल्यंप्रधानेधातौस्यात्क्लीबं
बलकरेत्रिषु ३९ वीर्यंशुक्रेप्रभावेचतेजःसामर्थ्ययोरपि भयं
प्रतिभयेघोरेप्रसूनेकुब्जकस्यच ४० भव्यंशुभेचसत्येचयोग्ये
भाविनितुत्रिषु कर्मरंगतरौपुंसिस्त्रियांकरिकणामयोः ४१॥
क्लीबमस्थनिभाग्यंतुस्याच्छुभाशुभकर्मणोः भृत्योदासेभृतौ
भृत्यामयुर्नाकिन्नरेमृगे ४२ मयःशिल्पिनिदैत्यानांकरभेऽ
श्वतरेपिच मध्यंविलग्नेनास्त्रीस्यान्न्याय्येऽन्तरेधमेपिच ४३
मत्स्योमीनेऽथपुंभूम्निदेशेमन्युःपुमान्क्रुधि दैन्येशोकेचयज्ञे
चमाल्यंकुसुमतत्स्रजोः ४४ मायास्याच्छांबरीबुध्योर्मायः
पीतांबरेसुरे मूल्यंस्याद्वेतनेप्रश्नेमृत्कर्नामरणेयमे ४५ मेध्यं
त्रिषुशुचौरक्तवचारोचनयोःस्त्रियां ययुःपुमानश्वमेधतुरगे
चतुरंगमे ४६ याप्यस्तुयापनीयेस्यान्निंदितेप्यभिधेयवत् या
म्याःपाच्यांभरण्यांचपुंस्यगस्त्येचचंदने ४७ योग्यःप्रवीण
योगार्होपायशक्तेषुवाच्यवत् क्लीबमृध्यौषधौपुंध्यनास्त्र्यभ्या
सार्कयोषितोः ४८ रम्या रात्रौचंपकेनामनोज्ञेत्यभिधेयवत्
॥नपुंसकंपटोलस्यमूलेसूरिभिरिष्यते ४९ रथ्या रथौघवि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिखावर्त्तनीषुचयोषिति रथवोढरिपुञ्लिंगोरूप्यःस्यात्सुंदरे
त्रिषु ५० आहतस्वर्णरजतेरजतेचनपुंसके लयोविनाशेसंश्लेषे
साम्येतौर्यत्रिकस्यच ५१ लक्ष्यं स्यादपदेशेपिशरव्येपिनपुं
सकं लभ्यंयुक्तेचलब्धव्येलास्यं तौर्यत्रिकेमतम् ५२ नृ
त्येचव्रज्याप्रस्थानेवर्गेपर्यटनेपिच वन्यं त्रिषुवनेद्भूतेस्त्रीव
नांबुसमूहयोः ५३ वाच्यं तुकुत्सितेहीनेवचनार्हेचवाच्यवत्
॥विंध्यास्त्रियांलवल्यांस्यात्पुंसिव्याधाद्रिभेदयोः ५४ वीक्ष्यं
तुविस्मयेदृश्येपुंसिलासकवाजिनोः वश्यं वेश्यागृहेक्लीबंग
णिकायांतुयोषिति ५५ शल्यं तुनस्त्रियांशंकौक्लीबंस्वेडेषु
तोमरे मदनद्रुमाविधोर्नाशपःशय्याहिपाणिषु ५६ शय्या
स्याच्छयनीयेचगुंफनेपिचयोषिति शून्यं स्यान्निर्जनेवाच्य
लिंगमल्पातुयोषिति ५७ शौर्यं मारभटीशक्त्योः सह्यःशै
लांतरेपुमान् सोढव्येवाच्यलिंगःस्यादारोग्येतुनपुंसके ५८
संख्यंसमितिसंख्यास्यादेकत्वादिविचारयोः संध्यापितृप्रसून
द्यंतरयोर्युगसंधिषु ५९ सत्यं कृतेचशपथेतथ्येत्रिषुतुतद्
ति सव्यंवामेप्रतीपेचस्मयोनाऽद्भुतगर्वयोः ६० साध्यःकां
डेदिनांतेचसाध्योयोगांतरेस्मरे गणदेवविशेषेचसाधनीयेतु
वाच्यवत् ६१ सूर्योर्कपर्णेतपनेस्त्रीतज्जायौषधीभिदोः स्थे
यो विवादपक्षस्यनिर्णेतरिपुरोहिते ६२ सैन्यं क्लीबमुशीरे
स्यात्सेवार्हेपुनरन्यवत् सैन्यं क्लीबंबलेसेनासमवेतेतुवा
च्यवत् ६३ सौम्यो ज्ञे नान्त्रिष्वनुग्रेमनोज्ञेसोमदैवते हार्यो
विभीतकतरौहर्त्तव्येपुनरन्यवत् ६४ जरणेऽथत्रिषुहृद्यं हृज्ज
द्हितहृत्प्रिये वशकृद्वेदमंत्रेनाहृहिनामौषधौस्त्रियां ६५॥
॥यत्रिः॥ अनयस्तुविपद्देवाशुभयोर्व्यसनेषुच अत्ययोऽतिक्र
मेदंडेविनाशेदोषकृच्छ्रयोः ६६ अभ्रीयमभ्रसंघातेक्लीबमश्व
हितेन्यवत् अधृष्यातटिनीभेदेप्रगल्भेवाच्यलिंगकं ६७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवध्यमवधार्हेस्यादनर्थकवचस्यपि॥अव्ययोःस्त्रीशब्दभे
देनाविष्णौनिर्व्ययेत्रिषु॥६८॥अहल्यात्वप्सरोभेदेभार्यायांगौ
तमस्यच॥अहार्यः पर्वतेनास्यादहर्तव्येतुवाच्यवत्॥६९॥अ
भिख्यात्वभिधानेस्याच्छोभायांचयशस्यपि॥ अभ्यासास्त्री
हरीतक्यामुशीरेचनपुंसकं॥७०॥निर्भयेवाच्यलिंगःस्यादप
त्येपुत्रपौर्मतं॥ अगस्त्यःकुंभयोनौस्याद्भृंगसेनतरावपि॥७१॥
आशयःस्यादभिप्रायेपनसाधारयोरपि॥स्यादातिथ्यमतिथ्य
र्थेत्रिलिंगमतिथौपुमान्॥७२॥आत्रेयीपुष्पवत्यांस्यान्नदीभेदे
चनामुनौ॥आदित्योभास्करेदेवेप्याम्नायोनिगमेपिच॥७३॥
उपदेशेपीन्द्रियंतुहृषीकेरेतसिस्मृतं॥ उदयस्तुपुमान्पूर्वप
र्वतेचसमुन्नतौ॥७४॥उपायःसमभेदादौतथैवोपगतौपुमान्
॥ऊर्णायुर्नोऽस्त्रणभंगेमेषकंबलमेषयोः॥७५॥औचित्यमुचित
त्वेस्यात्सत्येपिचनपुंसकं॥ कषायो रसभेदेचनिर्यासेचविले
पने॥७६॥अंगरागेचनस्त्रीस्यात्सुरभौलोहितेत्रिषु॥कालेयो
दैत्यभेदेस्यात्कालखंडेनपुंसकम्॥७७॥क्षिपण्युस्तुपुमान्दे
हेसुरभौवाच्यलिंगकः॥ कुलायस्तुपुमान्स्थानेमात्रेस्यात्प
क्षिवासके॥७८॥ क्षेत्रियंक्षेत्रजतृणेपरदेहचिकित्सयोः॥पर
दाररतासाध्यरोगयोःक्षेत्रियःपुमान्॥७९॥कौकृत्यमनुतापे
स्याद्दुष्कृतकरणेपिच॥गांगेयःस्यात्पुमान्भीष्मेक्लीबंस्वर्णकशेरु
णोः॥८०॥चक्षुष्यःकेतकेपुंडरीकसंज्ञकपादपे॥कुलत्थिकासु
भगयोःस्त्रियामक्षिहितेन्यवत्॥८१॥ चांपेयश्चंपकस्वर्णकिं
जल्केनागकेसरे॥ जघन्यंहेमलेक्लीबंचरमेगर्हितेऽन्यवत्॥
॥८२॥जटायुःपुंसिसंपातेःकनीयसिचगुग्गुलौ॥जरायुरपि
तत्पक्षिराजेगर्भाशयेपुमान्॥८३॥तपस्याव्रतचर्यायांतपस्यः
फाल्गुनेपुमान्॥द्वितीयातिथिभित्पत्न्यो पूरणेतूभयेत्रिषु॥
॥८४॥ देवपुर्वाच्यलिंगस्तुधार्मिकेलोकयान्त्रिके॥ नादेयीना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गरं गेस्याज्जयायामंबुवेतसे॥८५॥भूमिजं त्वांजवायां चव्यंगुष्ठे
पिवयोषिति॥निकायस्तुपुमांल्लक्ष्येसधर्मिप्राणिसंहतौ॥८६॥स
मुच्चयेसंहतानांनिलयेपरमात्मनि॥नेपथ्यःस्यादलंकारेरंगज्या
यांनपुंसकं॥८७॥ प्रणयः प्रसवेप्रेम्णि याञ्चाविश्रंभयोरपि॥ नि
र्याणोप्यथपर्यायःप्रकारेवसरेक्रमे॥८८॥ प्रलयो मृत्युकल्पांत
मूर्छापायेषुपुंस्ययम्॥प्रत्ययःप्रथितत्वेचसनादिज्ञानयोरपि॥
८९॥आचारेशपथेरंध्रेविश्वासाधीनहेतुषु॥पर्जन्यो मेघशब्देपि
ध्वनदंबुदशक्रयोः॥९०॥ प्रसव्यं वाच्यलिंगंस्यात्प्रतिकूलानु
कूलयोः॥ प्रकीर्यःपूतिकरजेषिनिकार्येतुवाच्यवत्॥९१॥प्राणा
य्यो संमतेपिस्यादभिलाषविवर्जिते॥ पयस्यं तुपयोजातहितयो
र्वाच्यलिंगकं॥९२॥दुग्धिकाक्षीरकाकोल्योस्वर्णक्षीर्यामपिस्त्रि
यां॥ पारुष्यं परुषत्वेचदुर्वाक्येपुंसिगीष्पतौ॥९३॥ पानीयंतुजले
क्लीबं पातव्येवाच्यलिंगकं॥ पौलस्त्यस्तुकुबेरेस्याद्दशग्रीवेपिपुं
स्ययं॥९४॥ वलयः कंठरोगेनाकंकणेपुंन्नपुंसकं॥ ब्रह्मण्यो ब्र
ह्मसाधीस्याद्ब्रह्मदारुशनैश्चरे॥९५॥ बालेयो गर्दभेपुंसिमृतो
बालहितेत्रिषु॥ ब्राह्मण्यंब्राह्मणत्वेचसमूहेचद्विजन्मनां॥९६॥
भुवन्युस्तुपुमान्भानौज्वलनेशशलांछने॥ भुजिष्यस्तुस्वतंत्रेस्या
द्धस्तसूत्रकदासयोः॥९७॥स्त्रियांदासीगणिकयोर्मलयःपर्वतां
तरे॥शैलांगेदेशआरामेत्रिवृतायांतुयोषिति॥९८॥मंगल्यःस्या
त्त्रायमाणाऽश्वत्थबिल्वमसूरके॥स्त्रियांशम्यामथःपुष्पीमिसि
मुकुवचासुच॥९९॥रोचनायामथोदध्निक्लीबंशिवकरेत्रिषु॥ मृ
गयुः पुंसिगोमायौव्याधेचपरमेष्ठिनि॥१००॥ रहस्यास्त्रीनदी
भेदेगोपनीयेभिधेयवत्॥ लौहित्यंलोहितत्वेस्यात्क्लीबंपुंसिनदां
तरे॥१॥ वदान्यो दानशौंडेस्याच्चारुवादिनिवाच्यवत्॥ व्यवायः
सुरतेंतर्धौपुंसिक्लीबंतुतेजसि॥२॥ वक्तव्यंकुत्सितेहीनेवचनार्हे
चवाच्यवत्॥ विजयःस्याज्जयेपार्थेस्त्रियांतिथ्यंतरेस्मृता॥३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उमासरव्यांवि स्मयःस्याद्दाश्चर्यगर्वे योःपुमान्॥विनयानुकूला
यांस्त्रीशिक्षायांप्रणतौ पुमान्॥४॥विशल्याग्निशिखादंतीगुडू
चीत्रिपुटासुच॥ विषयोगोचरेदेशेतथाजनपदेपिच॥५॥प्रबंधाद्य
स्ययोज्ञातस्तत्ररूपादिकंपुमान्॥श्वशुर्योदेवरेश्यालेशाद्रिस्यःपा
वकांतरे॥६॥मुनिभेदेचमालूरेशालेयःस्यान्मिसौपुमान्॥त्रिपुशा
ल्युद्भवेक्षेत्रेस्याच्छीर्षण्यंतुशीर्षके॥७॥सुकेशेपुंसिशैलेयंता
लपर्ण्यांचसैंधवे॥शैलजेनातुमधुपेशिलातुल्येऽन्यलिंगकं॥८॥
संस्त्यायःसन्निवेशेचसंस्थानेविस्तृतावपि॥सल्लयःसमवा
येपिपृष्ठःस्यापिबलेपुमान्॥९॥शमयःशपथाचारसिद्धांतेषु
तथापिपि॥क्रियाकारेचनिर्देशेसंकेतेकालभाषयोः॥१०॥सरि
ण्युस्तुपुमान्वारिवाहेस्यान्मातरिश्वनि॥सामर्थ्यंयोग्यतायां
स्याच्छक्तावपिनपुंसकं॥११॥सौरभ्यंतुमनोज्ञत्वेसौगंध्येगु
णगौरवे॥सौभाग्यंसुभगत्वेस्याद्योगभेदेनपुंसकं॥१२॥हिर
ण्यंरेतसिद्रव्येशातकुंभवराटयोः॥अक्षयेमानभेदेस्यादकुप्ये
चनपुंसकं॥१३॥ हृदयंमानसेबुक्कोरसोरपिनपुंसकं॥यचतुः
॥भवेदनुशयोद्वेषेपश्चात्तापानुबंधयोः॥१४॥अथावसायःशे
षेस्यात्समाप्तौनिश्चयेपिच॥अवश्यायस्तुनीहारेप्यभिधानेपि
पुंस्ययं॥१५॥अपसव्यंत्रिलिंगंतुदक्षिणप्रतिकूलयोः॥अंतश
य्यामृतौभूमिशय्यायांपितृकानने॥१६॥उपकार्याराजसद्म
न्युपकारोचितेऽन्यवत्॥ जलाशयोजलाधारेस्यादुशीरेनपुं
सकं१७ तंडुलीयःशाकभेदेविडंगतरुताप्ययोः॥तृणशून्यंमल्लि
कायांत्रिषुस्यात्केतकीफले॥१८॥दाक्षिणात्योनारिकेरेत्रिषुदक्षिण
दिग्भवे॥धनंजयोर्जुनेवन्हिनागद्रिग्देहमारुते॥१९॥निरामयस्तु
पुंसिस्याद्दिडिक्केत्रिषुनीरुजि॥परिधायोजनस्थानेपरिच्छेदनितं
बयोः॥२०॥प्रतिश्रयःसभायाञ्चाश्रयेप्रतिभयंभये॥घोरेपिपांच
जन्यस्तुकृष्णशंखेहुताशने॥२१॥ प्रावृषेण्यःपुमान्नीपेप्रावृट्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालभवेत्रिषु॥पौरुषेयः कृतेपुंसांविकारेपुरुषस्यच॥२२॥त्रिषु
नासंगबुधयोःपुरुषस्यपदांतरे॥फलोदयःपुमांल्लाभेत्रिदिवेशा
लयेपिच॥२३॥भागधेयंमतंभाग्येभागप्रत्यापयोःपुमान्॥म
हालयोविहारेस्यात्तीर्थेचपरमात्मनि॥२४॥महोदयःकान्य
कुब्जेचाधिपत्यापवर्गयोः॥महामूल्यःपद्मरागेनामहार्घेन्यलिं
गकः॥२५॥मार्जारीयःस्मृतःशूद्रेविडालेकायशोधने॥रौहिणे
योन्यवहूत्सेनाबुधेचहलायुधे॥२६॥विलेशयस्तुपुल्लिंगोमूषि
केचभुजंगमे॥वैनतेयस्तुगरुडेस्यात्प्रभाकरसारथौ॥२७॥संप
रायःसमीकेस्यादापदुत्तरकालयोः॥समाह्वयस्तुपशुभिःख
गैर्द्यूतेचसंगरे॥२८॥भवेत्समुदयःसंघेसंयुगेचसमुद्गमे॥समु
दायःसमूहेस्याद्युद्धेसमुच्छ्रयःपुमान्॥२९॥विरोधोत्सेधयोः
स्थूलोच्चयोगंडोपलेपिच॥गजानांमध्यमगतेप्यसाकल्यवरंडयोः
॥३०॥हिरण्मयःसुरज्येष्ठेनासुवर्णमयेत्रिषु॥यपंच॥काला
नुसार्येशैलेयेकालीयेशिंशपाद्रुमे॥दुग्धतालीयमित्येतद्दुग्धा
ग्रक्षीरफेनयोः॥अथप्रवचनीयंचस्यात्प्रवक्तृप्रवाच्ययोः॥३२
॥वृषाकपायीश्रीगौरीवरीजीवंतिकासुच॥यषट्॥प्रत्युद्गम
नीयमुपस्थेयेधौतांशुकद्वये॥३३॥विष्वक्सेनप्रियालक्ष्म्यांवा
राह्यामपियोषिति॥इतियांतवर्गः॥१५४॥ रैकं॥ रःस्मृतः
पावकेतीक्ष्णेराःपुंसिस्वर्णवित्तयोः॥श्रीवेशरचनाशोभाभार
तीसरलद्रुमे॥१॥लक्ष्म्यांत्रिवर्गसंपत्तिविधोपकरणेषुच विभू
तौचमतौचस्त्रीस्नुःस्त्रियांनिर्झरेस्रवे॥२॥रद्विः॥अरंशीघ्रेच
चक्रांगेशीघ्रगेपुनरन्यवत्॥अग्रंपुरस्तादुपरिपरिमाणेपलस्य
च॥३॥आलंबनेसमूहेचप्रांतेचस्यान्नपुंसकम्॥अधिकेचप्रधाने
चप्रथमेचाभिधेयवत्॥४॥अस्रःकोणेकचेपुंसिक्लीबमश्रुणि
शोणिते॥अस्त्रंप्रहरणेचापेकरवालेनपुंसकं॥५॥अभ्रंमेघेच
गगनेधातुभेदेचकांचने॥अद्रिःशैलद्रुमार्केनाथोघ्रिर्नापादमूल

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योः॥६॥आरा चर्मप्रभेदिन्यांपुंसिभौमशनैश्चरे॥आर्द्रा नक्षत्रभे
देस्यात्त्रियांक्लिन्नेभिधेयवत्॥७॥आरूःपुंसितरोर्भेदेतथाकर्क
टदंष्ट्रिणोः॥इंद्रःशक्रादित्यभेदयोगभेदांतरात्मसु॥८॥इंद्राफणि
ज्झकेस्त्रीस्यादिरा भूवाक्सुरांबुषु॥उग्रः शूद्रासुतेक्षत्राद्रुद्रेपुंसि
त्रिषूत्कटे॥९॥स्त्रीवचाक्षतयोरुष्ट्रीकर्कर्यांकरभेपुमान्॥उस्रो
वृषेचकिरणेप्युस्राऽर्जुन्युपचित्रयोः॥१०॥ऐंद्रिः काकेजयंतेना
थौड्राःपुंभूम्निनीवृति॥ओड्रःख्यातोजवापुष्पेक्षरंनीरेक्षरोंबुदे
॥११॥करोवर्षोपलेरश्मौपाणौप्रत्यायशुंडयोः॥कद्रुस्त्रिषुस्वर्ण-
पिंगेनागानांमातरिस्त्रियां॥१२॥कारोवधेनिश्चयेचबलौयत्नेय
तावपि॥तुषारशैलेपिपुमान्स्त्रियांदूत्यांप्रसेवके॥१३॥सुवर्णका-
रिकायांचबंधनागारबंधयोः॥क्षारोरसांतरेधूर्तेलवणेकाचभ-
स्मनोः॥१४॥कारिस्त्रियांक्रियायांस्याद्वाच्यलिंगस्तुशिल्पिनि
॥कारुर्विश्वकर्मणिनात्रिषुकारकशिल्पिनोः॥१५॥क्षीरंदुग्धेजले
कीरःशुकेपुंभूम्निनीवृति॥कूरुर्नृपांतरेभक्तेपुमान्पुंभूम्निनीवृति
॥१६॥क्षुद्रःस्यादधमेक्रूरेकृपणाल्पेषुवाच्यवत्॥क्षुद्राव्यंगा
नटीकंटकारिकासरघासुच॥१७॥चांगेरीवेश्ययोर्हिंस्रामक्षिका
मात्रकेषुच॥क्षुरःस्याच्छेदनद्रव्येकोकिलाक्षेचगोक्षुरे॥१८॥क्रू
रस्तुकठिनेघोरेनृशंसेप्यभिधेयवत्॥कृच्छ्रमाख्यातमाभीलेपा
पसंतापनादिनोः॥१९॥क्षेत्रं शरीरकेदारेसिद्धस्थानकलत्रयोः॥
क्रोष्ट्रीशृगालिकाकृष्णाविदारीलांगलीषुच॥२०॥क्षौद्रंमधुनिपा
नीयेखरःस्यात्तीक्ष्णघर्मयोः॥गर्दभेऽस्त्रीदेवताडेखरुर्दर्पेहरे
हये॥२१॥दंतेपुंसित्रिषुश्वेतेखुरं कोलदलेशफे॥गरीखरायां-
करणेक्लीबन्नोपविषेविषे॥२२॥गात्रं गजाग्रजंघादौक्लीबमंगेक
लेवरे॥गीःस्त्रीभाषासरस्वत्योर्गिरि र्नानेत्ररुग्भिदि॥२३॥अद्रौ
गिरिपकेयोषिद्गीर्णेपूज्येपुनस्त्रिषु॥गुंद्र स्तेजनकेस्त्रीतुप्रियं
गौभद्रमुस्तके॥२४॥गुरु स्त्रिलिंग्यांमहतिदुर्जरालघुनोरपि॥

For Private and Personal Use Only

पुमान्निषेकादिकारेपित्रादौसुरमंत्रिणि॥२५॥गृध्रः खगांतरेपुंसि
वाच्यलिंगोप्यलुब्धके॥ गोत्राभूगव्ययोर्गोत्रः शैलेगोत्रंकुलाख्ययोः
॥२६॥ संभावनीयबोधेचकाननक्षेत्रवर्त्मसु॥ गौरः पीतेऽरुणेश्वे
तेविशुद्धेचाभिधेयवत्॥२७॥ नाश्वेतसर्षपेचंद्रेनद्वयोःपद्मकेसरे॥
गौरीत्वसंजातरजःकन्याशंकरभार्ययोः॥२८॥रोचनीरजनीपिंगा
प्रियंगुवसुधासुच॥आपगायाविशेषेपियादसांपतियोषिति॥२९॥
घस्रस्तुदिवसेहिंस्रेघोरेभीमेद्वरेपिच॥चरो द्यूतभेदेचभौमे
चारेत्रसेचले॥३०॥चंद्रः कर्पूरकांपिल्लसुधांशुस्वर्णवारिषु॥च
क्रः कोकेपुमान्क्लीबंव्रजेसैन्यरथांगयोः॥३१॥राष्ट्रेदंभांतरेकुंभका
रोपकरणास्त्रयोः॥जलावर्तेप्यथचरुःपुमान्हव्यान्नभाण्डयोः
॥३२॥चारःपियालवृक्षेस्याद्गतौबंधापसर्पयोः॥चारुर्बृहस्प
तौपुंसिशोभनेप्यभिधेयवत्॥३३॥चित्राखुपर्णीगोडुंबासुभ
द्रादंतिकासुच॥मायायांसर्पनक्षत्रेनदीभेदेषुचस्त्रियां॥३४॥ति
लकालेख्ययोःक्लीबंकर्बुराद्भुतयोरपि॥तद्युक्तयोस्त्वन्यलिंगं
चीरीझिल्ल्यांनपुंसकं॥३५॥गोस्तनेवस्त्रभेदेचरेखा खेलनभे
दयोः॥चुक्रंवृक्षाम्लचांगेर्योस्त्रीपुंस्यम्लेम्लवेतसे॥३६॥चैत्रंमृ
तेदेवकुलेनाभूभृन्मासभेदयोः॥चौरःपाटच्चरेपिस्याच्चौरपुष्पौ
षधावपि॥३७॥छत्रामिसावतिछत्रेकुस्तुंबुरुशिलींध्रयोः॥नपुंस
केचातपत्रेछिद्रंदूषणरंध्रयोः॥३८॥जारी स्यादोषधीभेदेस्त्रिया
मुपपतौपुमान्॥जीरस्तुजरणेखड्गेटारो रंगतुरंगयोः॥३९॥तर
स्तुतरणेपुंसिदृशालौपटकेतरी॥तंत्रंकुटंबकृत्येस्यात्सिद्धांतेचौ
षधोत्तमे॥४०॥प्रधानेतंतुवायेचशास्त्रभेदे परिच्छदे॥श्रुतिशा
खांतरेहेताबुभयार्थप्रयोजके॥४१॥इतिकर्तव्यतायांचतंत्रीवी
णागुणेमता॥अमृतादेहशिवयोस्तंद्रीनिद्राप्रमीलयोः॥४२॥ता
रोवानरभिन्मुक्ताविशुध्योःशुद्धमौक्तिके॥नानक्षत्रेक्षिमध्येचन
नारूप्येनपुंसकं॥४३॥ स्त्रीबुद्धदेवताभेदेवालिगीष्पतिभार्ययोः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिलिंगोसुच्चशब्देचताम्रंशुल्वेऽरुणेपिच॥४४॥तीव्रातुकटु
रोहिण्यांराजिकागंडदूर्वयोः॥त्रिष्वत्युष्णेनितांतेचकटौतीरंतुरो
धसि॥४५॥पुंसित्रपुणितोत्रंतुप्रजनेवेणुकेपिच॥दरोस्त्रीसाध्वसे
गर्तेकंदरेतुदरीस्मृता॥४६॥दरा व्ययंमनागर्थेदस्त्रःखरेश्विनी
सुते॥दारुस्यात्पित्तलेकाष्ठेदेवदारौनपुंसकं॥४७॥द्वारंनिर्गम
नेपिस्यादभ्युपायेधरोगिरौ॥कार्पासतूलकेकूर्मराजेवस्वंतरेपि
च॥४८॥धरा विश्वंभरायांचस्त्रीगर्भाशयमेदसोः॥धात्रीजनन्या
मलकीवसुमत्युपमातृषु॥४९॥धारासैन्याग्निमस्कंधेतुरंगगति
पंचके॥घटादिच्छिद्रसंतत्योःप्रपातेस्याद्द्रवस्यच॥५०॥खड्गादेर्नि
शितमुखेधाराग्रावांतरेप्यृणे॥धीराधैर्यान्वितेस्वैरेधीरःस्या
त्रिषुपंडिते॥५१॥स्वछंदेधैर्ययुक्तेचकुंकुमेतुनपुंसकं॥स्त्रियां
श्रवणतुल्यायांधौम्रंधूम्रत्वईरितं॥५२॥नथावास्तुस्यानभेदेन
रोजेमनुजेऽर्जुनेक्लीबंतुरामकर्पूरेनक्रंस्यादग्रदारुणि॥५३॥ना
सायांपुंसिकुंभीरेनारस्तर्णकनीरयोः॥नीव्रं नेमौबलीकेछैरेव
तीभेपिकानने॥५४॥नेत्रंमंथगुणेवस्त्रभेदेमूलेद्रुमस्यच॥रथे
चक्षुषिनद्यांतुनेत्रीनेतरिवाच्यवत्॥५५॥परःश्रेष्ठारिदूरान्योत्त
रेक्लीबंतुकेवले॥पत्रंतुवाहनेपर्णेस्यात्पक्षेशरपक्षिणोः॥५६॥
पारंपरतटेप्रांतेनस्त्रीपारानदीभिदि॥पारीपूरेचकर्कर्यांपादर
ज्जौचदंतिनः॥५७॥पात्रंतुभोजनेयोग्येस्रुवादौराजमंत्रिणि॥ती
रद्वयांतरेचाथपुरुःप्राज्येऽभिधेयवत्॥५८॥पुंसिस्याद्देवलोके
चनृपभेदपरागयोः॥पुरंनपुंसकंगेहेदेहपाटलिपुत्रयोः॥५९॥पु
ष्पादीनांदलावृत्तौनागुग्गुलौननापुरि॥पुंड्रोदैत्यविशेषेक्षुभेदयो
रतिमुक्तके॥६०॥चित्रकृमौपुंडरीकेपुंभूम्निनीवृदंतरे॥पूरोजल
समूहेस्याद्व्रणसंशुद्धिखाद्ययोः॥६१॥पोत्रंवस्त्रेमुखाग्रेचशूक
रस्यहलस्यच॥पौरंत्रिषुपुरोद्भूतेकरणेतुनपुंसकं॥६२॥वरोजा
मातरिवृतौदेवतादेरभीप्सिते॥षिड्गेपुंसित्रिषुश्रेष्ठेकुंकुमेतुनपुंस

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कं॥६३॥वरी प्रोक्ता शतावर्यां वरा च स्यात्फलत्रिके॥ मनागिष्टेव
रं क्लीबे केचिदाहुस्तदव्ययं॥६४॥ बभ्रुर्वैश्वानरे शूलपाणौ च गरु
डध्वजे॥ विशाले नकुले पुंसि पिंगले त्वभिधेयवत्॥६५॥ वक्रः शनै
श्चरे पुंसि पुटभेदे नपुंसकं॥ त्रिषु क्रूरे च कुटिले वारः सूर्यादिवासरे॥६६
द्वारे हरे कुब्जवृक्षे वृंदावसरयोः क्षणे॥ वारी स्याद्गजबंधन्यां कल
श्यामपि योषिति॥६७॥ वारिर्वा गजबंधन्योः स्त्री क्लीबे तु निबालके
वीरो रसविशेषे स्यादुत्तरे सुभटे त्रिषु॥६८॥ स्त्री मुराक्षीरकाको
लीतामलक्येलवालुके॥ पतिपुत्रवतीरंभाविदारीदुग्धिकासु च ६९
मलपूःक्षीरविदार्योः क्लीबं शृंग्यां नलेपि च॥ भरुः स्वर्णे हरे पुंसि भ
रो निश्चयभारयोः॥७०॥ भद्रः शिवे खंजरीटे वृषभे तु कदंबके॥ करि
जातिविशेषे ना क्लीबं मंगलमुस्तयोः॥७१॥ कांचने च स्त्रियां रास्नाकृ
ष्णाव्योमनदीषु च॥ तिथिभेदे प्रसारिण्यां कट्फलानंतयोरपि॥७२॥
त्रिषु श्रेष्ठे च साधौ च नपुंसि करणांतरे॥ भारः स्याद्विवधे कृष्णोपला
नां द्विसहस्रके॥७३॥ भीरुः शते त्रिलिंगः स्याद्भीरुर्योषिति योषिति॥ सू
रिर्ना वासुदेवे च हरे च परमेष्ठिनि॥७४॥ नपुंसकं सुवर्णे च प्राज्ये स्या
द्वाच्यलिंगकः॥ मंत्रो वेदविशेषे स्याद्देवादीनां च साधने॥७५॥ गुह्य
वादेपि च पुमान्मरुर्नागिरिधन्वनोः॥ मात्रा कर्णविभूषायां वित्ते
माने परिच्छदे॥७६॥ अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येवधारणे॥ मा
रो मृतौ स्मरे विघ्ने मारी चंड्यां जनक्षये॥७७॥ मारिः स्त्री मारणे वर्षामि
त्रे सुहृद्दिनकृतोः॥ सूर्ये पुंसि पुरा गंधद्रव्ये दैत्यांतरे पुमान्॥७८॥ र
या मात्रु यापनेपि स्यात् क्रमनौत्सवयोः स्त्रियां॥ रंध्रं तु दूषणे छिद्रे र
राष्ट्रं स्यादुपवर्तने॥७९॥ उपद्रवे क्लीबपुंसो रुरुर्नासमदैत्ययोः॥ वे
त्रं वेत्रमनिर्पापुषे पटवासेपि सूत्रके॥८० शेध्रो नागालवे क्लीबमपरा
धे च किल्बिषे॥ रौद्र धर्मे रसे चंड्यां स्त्रीति त्रे भीषणे त्रिषु॥८१॥ व
त्रं स्याद्बालके धात्र्यां क्लीबं योगांतरे पुमान्॥ वज्रा स्नुह्यां गुडूच्यां
च वज्री स्नुह्यंतरे स्मृता॥८२॥ दंभोलौ हीरके प्यस्त्री वर्द्धं त्रपुवर

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रयोः वप्रस्तातेपुमानस्त्रीरेणुक्षेत्रेचयेतटे॥८३॥वक्त्रं मुखे
वस्त्रभेदेव्यग्रोव्यासक्तआकुले॥वस्त्रो नादिवसेक्लीबंमंदिरेच
चतुष्पथे॥८४॥व्याघ्रस्यात्पुंसिशार्दूलेरक्तैरंडकरंडयोः॥श्रेष्ठ
नराद्युत्तरस्थः कंटकार्यांतुयोषिति॥८५॥ध्वांक्षोरिपौघनेध्वांते
शैलभेदेचदानवे॥वेरःकलेवरेक्लीबंवार्ताकौकुंकुमेपिच॥८६
वोद्रीस्त्रीपणपादेनागोनसाह्रौझषांतरे॥शारस्तेजनकेबाणे
दध्यग्रेनाशरंजले॥८७॥शस्त्रंलोहास्त्रयोः क्लीबंछुरिकायांतु
योषिति॥शक्रः पुमान्देवराजेकुटजार्जुनभूरुहोः॥८८॥ शा
द्रिर्नाभोधरेजिष्णौशारूर्नाकोपवज्रयोः॥शारिर्नाक्षोपकरणे
स्त्रियांशकुनिकांतरे॥८९॥युद्धार्थगजपर्याणेव्यवहारांतरेपि
च॥शारःस्याच्छाबलेवाच्यलिंगःपुंसिसमीरणे॥९०॥अक्षो
पकरणेशास्त्रंनद्वयोरागमाज्ञयोः॥ शिग्रुर्नाशाकमात्रेचशो
भांजनमहीरुहे॥९१॥शिरोनापिप्पलीमूलेस्याद्धमन्यांचयोषि
ति॥शीघ्रं नलदेचक्रांगेक्लीबंद्रुतगतौत्रिषु॥९२॥शुभ्रं स्यादभ्रके
क्लीबमुद्दीप्तशुक्लयोस्त्रिषु॥शुक्रःस्याद्भार्गवेज्येष्ठमासेवैश्वान
रेपुमान्॥९३॥रेतोस्यक्ष्णिरोगेक्लीबंशूरः स्याद्यादवेभटे॥स्व
रुःपुमान्यूपखंडेभिदुरेप्यध्वरेशरे॥९४॥सत्रंयज्ञेसदादानाच्छा
दनारण्यकैतवे॥सरो दध्यग्रगत्योर्नास्वरोनासासमीरणे॥९५
उदात्तादावकारादौषड्जादौचध्वनौपुमान्॥सारोबलेस्थिरांशे
चमज्ज्ञिपुंसिजलेधने॥९६॥न्याय्येक्लीबंत्रिषुवरेसांद्रेवनेघटे
मृदौ॥स्फारस्यात्पुंसिविकटेकनकादेश्चबुद्बुदे॥९७॥सिध्रोनि
दाघसलिलेसिध्रातुसरिदंतरे॥स्थिराभूशालपर्ण्योर्नाशनौमो
क्षेबलेःद्रिषु॥९८॥सीरोर्केहलयोःपुंसिसुरान्वषकमद्ययोः॥पु
ल्लिंगस्त्रिदिवेशेस्यात्सूत्रंतंतुव्यवस्थयोः॥९९॥शास्त्रादिसूच
नाग्रंथेस्वैरःस्वच्छंदमंदयोः॥ हरि श्चंद्रार्कवाताश्वशुकभेकय
माहिषु॥१००॥कपौसिंहेहरेजैशौशक्रेलोकांतरेपुमान्॥वाच्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्तिंगहरितोहारोमुक्तावल्यौपुंसि॥१॥हारिःपथिकसंघाताद्यूतादिभंग
योःस्त्रियां॥हिंस्रात्वेलावलीमांस्योस्त्रियांस्याद्घातुकेन्यवत्॥२॥हीरते
तांबुलस्यमोः — पुंसिशंकरवज्रयोः॥हीरालग्नेपिराक्षस्यंदूरेरवाशास्त्रभिदोर
पि॥३॥रत्निः॥अमरस्त्रिदशेप्यस्त्रीसंहारेकुलिशद्रुमे॥स्त्री
गुडूच्यमरावत्योःस्थूणादूर्वाजरासुतु॥४॥अपरंगजपश्चाद्गे
स्याज्जरायौतुयोषिति॥इतरस्मिन्नपितथा॥वाचीनेप्यन्यलिं
गकं॥५॥अधरस्तुपुमानोष्ठेहीनेनूर्ध्वेचवाच्यवत्॥अध्वरस्सा
वधानेस्याद्वसुभेदेक्रतौपुमान्॥६॥अंतरमवकाशावधिपरिधा
नांतर्द्धिभेदतादर्थ्ये॥छिद्रात्मीयविनाबहिरवसरमध्यात्मस
दृशेषु॥७॥अवरंगजांत्यजंघादिदेशेपिचरमेत्रिषु॥अवरंनद्
योर्व्योम्निसुगंध्यंतरवस्त्रयोः॥८॥अंगारस्तूल्मुकेनस्त्रीपुंलिं
गस्तुम हीसुते॥अंकुरोरुधिरेलोम्निपानीयेभिनवोद्भिदि॥९॥
अजिरंप्रांगणेवातेविषयेदर्दुरेतनौ॥स्त्रीचंड्यामक्षरंब्रह्म
वर्णयोःपुंसिशंकरे॥१०॥अशिरोवीतिहोत्रेस्याद्राक्षसेभास्क
रेपुमान्॥अंडीरःपुरुषेशक्ते॥ररंठ्रकपाटयोः॥११॥अवीरा॥
पतिपुत्रायांस्त्रीसत्वरहितेत्रिषु॥अगुरुक्लीबंजोंककशिंशपयो
र्वाच्यवल्लघुनि॥१२॥असुरारजनीराश्योरसुरोदेवारिभास्कर
योः॥आकरोनिवहोत्पत्तिस्थानश्रेष्ठेषुकथ्यते॥१३॥आधार
श्चाधिकरणेप्यालवालांबुधारणे॥आसारःस्यात्प्रसरणेवेगवृ
ष्टौसुहृद्बले॥१४॥आहारःस्यादाहरणेभोजनेचपुमानयं॥आ
शरस्तुपुमान्वैश्वानरेचरजनीचरे॥१५॥आकारइंगिताकृत्यो॥
रितरोन्यत्रपामरे॥इत्वरःसत्यांपथिकेक्रूरकर्मणिचत्रिषु॥१६
ईश्वरोमन्मथेशंभौनाढ्येस्वामिनिचान्यवत्॥ईश्वरीचेश्वरोमाया
मुदरंजठरेपुंसि॥१७॥उदारो दातृमहतोर्दक्षिणेप्यभिधेयव
त् उर्वरासर्वसस्याढ्यभूमौस्याद्भूमिमात्रके॥१८॥उत्तरादि
ग्विशेषेचस्नुषायामर्जुनस्यच॥विराटस्यसुतेनास्यादूर्ध्वोदीरि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्योत्तमेत्रिषु॥१९॥ नपुंसकंप्रतिवाक्येःथोद्धारश्चोद्धृतावृणे॥
क्षरंवारिधारायामृक्षरश्चर्त्विजिस्मृतः॥२०॥ एकाग्रमन्यलिं
गंस्यादेकतानेप्यनाकुले॥ औशीरंशयनासनचामरदंडेषुशी
रजेप्रोक्तं॥२१॥ क्रकरःकरीरवृक्षेदीनेक्रकचेचपक्षिभेदेच॥ क
दरःश्वेतखदिरेक्रकचव्याधिभेदयोः॥२२॥ कर्बुरं सलिलेहे
म्निकर्बुरःपापरक्षसोः॥ कर्बराकृष्णवृंतायांशबलेपुनरन्यवत्
॥२३॥ कर्परःस्यात्कपालेचशस्त्रभेदकटाहयोः॥ कंधरोवारिवा
हेस्याद्ग्रीवायांकंधरामता॥२४॥ कर्बरःकथितोव्याघ्रेशिवाया
मपिकर्बरी॥ कंजारोजठरेसूर्येविरिंचौवारणेमुनौ॥२५॥ करी
रोवंशांकुरेस्त्रीवृक्षभिद्घटयोःपुमान्॥ करीरीवीचिकायांच
दंतमूलेचदंतिनां॥२६॥ कटित्रंरसनायांचवर्मागेकटिवासः
सि॥ कच्छूरामूकशिंब्यांचशटीदुःस्पर्शयोरपि॥२७॥ कच्छुरःपुं
श्चलेवाच्यलिंगःस्यात्पामरेपिच॥ कबरंलवणेम्लेस्त्रीपृथ्वी
तुंगीकचांतरे॥२८॥ कबुर्युमायांनारक्षःपापयोर्भेषजांतरे॥
कर्मारोजातिभेदेचत्वचिसारेचपुंस्ययं॥२९॥ करेणुःकर्णिका
रेचकरिणीवेश्ययोःस्त्रियां॥ कच्चरंकुत्सितेवाच्यलिंगतक्रे
नपुंसकं॥३०॥ कर्करीभांडभेदेनादर्पणेकठिनेत्रिषु॥ कडारःपिं
गलेदासेकलत्रंश्रोणिभार्ययोः॥३१॥ दुर्गस्थानेनृपादीनांक
टप्रुःपुंसिराक्षसे॥ विद्याधरेमहादेवेतथास्याद्दक्षदेवने॥३२॥
कंदरस्त्वंकुशेपुंसिगुहायांननपुंसकं॥ कर्चूरःस्यात्पुमांश्छु
ब्यांसुवर्णेतुनपुंसकं॥३३॥ काश्मीरेकुंकुमेःपिस्याट्टंकपुष्कर
मूलयोः॥ कावेरीस्यात्सरिद्भेदेपण्यनारीहरिद्रयोः॥३४॥ कां
तारोस्त्रीमहारण्येबिलेदुर्गमवर्त्मनि॥ पुंसिस्यादिक्षुभेदेश्च
किशोरोःश्वस्यशावके॥३५॥ तैलपर्ण्योषधौचस्यात्तरुणाव
स्थसूर्ययोः॥ किर्मीरोनागरंगेचकर्बुरेराक्षसांतरे॥३६॥ किंशा
रुर्नासस्यशूकेविशिखेकंकपक्षिणि॥ कुहरं गह्वरेछिद्रेकर्णे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बेनागांतरेपुमान्॥३७॥कुक्कुरःसारमेयेनाग्रंथिपर्णेनपुंसकं
॥कूर्परःस्यात्कफोणौचजानुदेशेचपुंस्ययं॥३८॥ कुंजरोऽने
कपेकेशेस्त्रीधातक्यांचपाटलौ॥कुमारःस्याच्छुकेस्कंधेयुव
राजेऽश्ववारके॥३९॥ बालकेवरुणद्रौनानद्रूयोर्जात्यकांचने॥
कुमारीशैलतनयानवमाल्योर्नदीभिदि॥४०॥सहापराजिता
कन्याजंबूद्वीपेषुचस्त्रियां॥कुठारुर्नाद्रुमेकेशेकुद्दारंकेवले
तरे॥४१॥कुबेरःस्यात्पुंसिनदीवृक्षेपुण्यजनेश्वरे॥ कूबरः
स्त्रिषुचारोनाकुब्जकेःस्त्रीयुगंधरे॥४२॥ केसरंहिंगुनिकुं
बंकिंजल्केनस्त्रियांपुमान्॥सिंहच्छटायांपुन्नागेबकुलेनाग
केसरे॥४३॥केदारोद्रौशिवेक्षेत्रेभूमिभेदालवालयोः॥ केनारः
पुंसिनरकेशिरःकपोलसंधिषु॥४४॥ कोटिरःपुंसिनकुलेशः
क्रगोपकशक्रयोः॥कोदृारोनागरेकूपेपुष्करिण्याश्वपाटके॥
॥४५॥ खपुरःक्रमुकेभद्रमुस्तकेऽलसकेपिच॥ खर्पर स्तस्क
रेधूर्त्तेभिक्षाभांडकपालयोः॥४६॥ खर्जूरंरूप्यखलयोर्हस्त्रि
केनाद्रुमेद्वयोः॥खदिरीशाकभेदेस्त्रीनाचंद्रेदंतधावने॥४७
खेडाभ्रमभ्रलेशेस्यात्तथादंतक्षतांतरे॥खिंखिरस्तुशिवाभे
देखट्वांगेवारिधानके॥४८॥ गणेरुःकर्णिकारद्रौकरिणीवे
श्ययोःस्त्रियां॥गर्गरोमीनभेदेस्त्रीमंथन्यामथगव्हरः॥४९॥
गुहागहनदंभेषुनिकुंजेतुपुमानयं॥गांधारःपुंसिसिंदूरेरागदे
शप्रभेदयोः॥५०॥गायत्री त्रिपदादेवीछंदोभित्खदिरेषुच॥
गोपुरं द्वारिपूर्द्वारिकैवर्तीमुस्तकेपिच॥५१॥ घर्घरो नाचल
द्वारिद्वारोलूकनदांतरे॥स्त्रीक्षुद्रघंट्यांवीणायाभेदेस्वरांतरे
पिच॥५२॥चमरंचामरेस्त्रीतुमंजरीमृगभेदयोः॥चंदिरोऽने
कपेचंद्रेचत्वरंस्थंडिलेंगने॥५३॥चंक्रः स्यंदनेवृक्षेचातुरो
नेत्रगोचरे॥चाटुकारिनियंत्रोऽश्वविषुदास्येतुचातुरी॥५४
चक्रगंडौचपुंसिस्याच्चामरंचामरापिच॥ दंडेचवालव्यजने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिकुरस्तरलागयोः ॥५५॥ पक्षिवृक्षभिदोः केशे गृहबभ्रौ सरीसृपे
॥छिदिरः पावके रज्जौ करवाले परश्वधे ॥५६॥ छिद्ुरश्छेदनद्रव्ये धू
र्तवैरिणि च त्रिषु ॥ जठरो न स्त्रियां कुक्षौ वृद्धकर्कटयोस्त्रिषु ॥५७॥ ज
र्जरं शैवलेशक्रध्वजे त्रिषु जरातुरे ॥ जंबीरः प्रस्थपुष्पे स्यात्पुंसि दंत
शठद्रुमे ॥५८॥ जलेंद्रः पुंसि वरुणे जंभले च महोदधौ ॥ झर्झरः
स्यात्कलियुगे वाद्यभांडे नदांतरे ॥५९॥ झल्लरी झल्लरी च द्वे हुडुक्के
बालकुंतले ॥ टट्टरी स्यान्मृषावादे लंपापटहवाद्ययोः ६०॥ टंकारो
विस्मये पुंसि प्रसिद्धौ सिंजिनीध्वनौ ॥ टगरष्टंकणक्षारे हेलाविभ्र
मगोचरे ॥६१॥ नान्यवत्के कराक्षे स्यात्डिंगरो डंगरेपि च ॥ क्षेपे त
मिस्रं तिमिरे कोपे स्त्री तु तमस्ततौ ॥६२॥ कृष्णपक्षनिशायां च त्व
क्पत्रं तु वरांगके ॥ स्त्रीकारव्यां च तिमिरं ध्वांते नेत्रामयांतरे ॥६३
तीवरो नांबुधौ व्याधे तुंबरी कुक्कुरस्त्रियां ॥ धन्याकेपि तुषारस्तु
शीकरे शीतले हिमे ॥६४॥ तुवरस्तु कषाये स्यात्काश्याढक्योस्तु
वर्यपि ॥ तूवरोऽश्मश्रुपुरुषे प्रोढाशृंगारकेपि च ॥६५॥ पुरुषव्यंज
नस्यक्ते स्यात्कषायरसे पि च ॥ दहरो मूषिकायां च स्वल्पे भ्रातरि
बालके ॥६६॥ दंतुरस्तून्नतरदे तथोन्नतनते त्रिषु ॥ दर्दरः पर्वते
पुंसि त्रिष्वीषद्भग्नभाजने ॥ ६७॥ दर्दुरस्तोयदे भेके वाद्यभांडाद्रि
भेदयोः ॥ दर्दुरा चंडिकायां स्याद्ग्रामजाले नपुंसकं ॥६८॥ दंडा
रो वहले मत्तवारणे शरयंत्रके ॥ कुंभकारस्य चक्रे च द्वापरः संश
ये युगे ॥६९॥ दासेरो दासिकापत्ये त्रिषु पुंसि क्रमेलके ॥ दुर्धरः
पुंसि नरकांतरे स्याद्दृषभौषधौ ॥७०॥ दैत्यारिः पुंसि सामान्यदे
वे च गरुडध्वजे ॥ धूसरी किन्नरीभेदे नाखरे त्रिषु पांडुरे ॥७१॥
नरेंद्रस्तु महीपाले विषवैद्ये च पुंस्ययं ॥ नर्मरा तु दरीभस्त्रासर
लानिष्फलासु च ॥७२॥ नागरं मुस्तके शुंठ्यां विदग्धे नगरोद्भवे ॥
निर्झरो निवहे सारे न्यायदेयवने निधौ ॥७३॥ निकरस्तु सह
स्रांशुतुरंगे तुषपावके ॥ निर्जरः स्यात्सुमान्देवे जरात्यक्ते च वाच्य

For Private and Personal Use Only

वत्॥७४॥ निर्जरा तुगुडूच्यांचतालपर्ण्यामपिस्त्रियां॥ निकारः
स्यात्परिभवेधान्यस्योत्क्षेपणेपिच॥७५॥ निर्दरं निर्भरेसारेऽ
न्यवत्तुकठिनेऽत्रपे॥ स्यान्नीवरोवणिजकेवास्तव्येचपुमानयं
॥७६॥ प्रवरः संततौगोत्रेक्लीबंश्रेष्ठेतुवाच्यवत्॥ प्रखरो हय
सन्नाहेकुक्कुरेऽश्वतरेऽपिच॥७७॥ पुंसित्रिष्वत्यंतखरेपवित्रंव
र्षणेकुशे॥ ताम्रेपयसिचक्लीबंमेध्येस्यादभिधेयवत्॥७८॥ प्र
दरो रोगभेदेस्याद्विदारेशरभंगयोः॥ प्रकरः स्यात्पुमान्संघे
विकीर्णकुसुमादिषु॥७९॥ नपुंसकंजोंगकेस्त्रीनाट्यांगेचत्व
रावलौ॥ पंक्तारः शैवलेसेतौसोपानेजलकुब्जके॥८०॥ प्रस्त
रो ग्रावणिमणौप्रकारस्तुल्यभेदयोः॥ पदारःपादधूलौस्यात्पा
दालिंदेपिपुंस्ययं॥८१॥ प्रसरः प्रणयेवेगेस्यात्पाटीरस्तुमूल
के॥ केदारेवेणुसारेचवारिदेतितउन्यपि॥८२॥ स्याद्रंगेवातिके
पुंसिपामरःखलनीचयोः॥ पांडुरं स्यान्मरुबकेवर्णेनातद्वति
त्रिषु॥८३॥ पार्परी भक्तसिक्थेस्यात्कीनाशेराजयक्ष्मणि॥ ज
राटेपिकदंबस्यकेसरेचगदांतरे॥८४॥ प्रांतरंविपिनेदूरशून्य
वर्त्मनिकोटरे॥ पिठरः स्थाल्यांनाक्लीबंमुस्तामंथानदंडयोः
॥८५॥ पिंजरो श्वांतरेक्लीबंस्वर्णेपीतेचवाच्यवत्॥ पिंडारःक्ष
पणेगोपेमहिषीरक्षकेद्रुमे॥८६॥ पीवरः कच्छपेस्थूलेपुष्करं
खेंबुपद्मयोः॥ तूर्यवक्त्रेखड्गफलेहस्तिहस्ताग्रकांडयोः॥८७
कुष्ठौषधेद्वीपतीर्थभेदयोश्चनपुंसकं॥ नारोगनागविहगनृप
भेदेषुवारुणे॥८८॥ बंठरः स्थगिकारज्जौलांगूलेकुक्कुरस्यच
॥ करीरकोशेतालस्यपल्लवेचपयोधरे॥८९॥ बंधुरं मुकुटेपुंसि
स्त्रीचंगतेलकल्कयोः॥ बंधूकेबधिरेहंसेत्रिषुस्याद्रम्यनम्रयोः॥९०
बंधुरापण्ययोषायांस्त्रियांभूम्निचसक्तुषु॥ बंधुरःशोभनेनम्रे
वरत्रारज्जुकक्षयोः॥९१॥ भ्रमरः कामुकेभृंगेभ्रामरं मधुनिस्सृ
तं॥ पुंसिप्रस्तरभेदेऽथभास्करोऽग्नौप्रभाकरे॥९२॥ भार्यारुः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शैलभेदेस्यान्मृगभेदेचतत्र च॥क्रीडयापरभार्यायांपुत्रोयेनोपपादि
तः॥९३॥भृंगारीझिल्लिकायांस्यात्कनकालेपुनःपुमान्॥मत्सरा
मक्षिकायांस्यान्मात्सर्यक्रोधयोःपुमान्॥९४॥असह्यपरसंपत्तौ
कृपणेचाभिधेयवत्॥मधुराशतपुष्पायांमिश्रेयानगरीभिदोः॥
९५॥मधुकर्कटिकामेदामधूलियष्टिकासुच॥क्लीबंविषेपुंसिरसे
तद्वत्स्वादुप्रियेऽन्यवत्॥९६॥मंदरस्तुपुमान्मंथशैलेमंदारपादपे
॥वाच्यवद्बहलेमंदेमंदारःस्यात्सुरद्रुमे॥९७॥पारिभद्रेर्कपर्णेचमं
दारोहस्तिधूर्त्तयोः॥मंदिरंनगरेऽगारेक्लीबंनामकरालये॥९८॥
मंथरःकोशफलयोर्बाधमंथानयोःपुमान्॥कुसुंभ्यांनद्वयोर्भेदे
पृथौवक्रेऽभिधेयवत्॥९९॥मकरोयादसोभेदेनिधिराशिप्रभेदयोः
॥मयूरोबर्हिचूडायामपामार्गेशिखंडिनि॥२००॥महेन्द्रःपर्वतेश
क्रेमधुद्रोऽलौचकामुके॥मंदुरावाजिशालायांशयनीयार्थवस्तु
नि॥१॥मसूरामसुरावानावेश्याव्रीहिप्रभेदयोः॥मसूरीपापरो
गेस्यादुपधानेपुनःपुमान्॥२॥मर्मरोवस्त्रभेदेचशुष्कपर्णध्वनौ
तथा॥पुंसिस्त्रियांपुनःप्रोक्तामर्मरीपीतदारुणि॥३॥मंजरीति
लकद्रूमुक्तयोर्वल्लरौद्वयोः॥मकुरःस्यान्मुकुरवद्दर्पणंबकुलद्रुमे
॥४॥कुलालदंडेमाठरोव्यासेऽर्कपारिपार्श्विके॥मार्जारओतौख
ट्टाशेमिहिरःसूर्यवृद्धयोः॥५॥मुद्गरंमल्लिकाभेदेपुंसिलोष्टादि
भेदने॥मुदिरःकामुकेमेघेमुहिरःकाममूर्खयोः॥६॥मुर्मुर
स्तुषवन्हौस्यान्ममथेरविवाजिनि॥मृगारिःस्यात्पुंसिकंठीरव
शार्दूलयोरपि॥७॥रुधिरोंगारकेपुंसिक्लीबंतुकुंकुमासृजोः॥ब
दरागृष्टिकार्पास्योरेलापर्ण्यांस्त्रियांपुमान्॥८॥कार्पासस्या
स्थिबदरीकोलोक्लीबंतुतत्फले॥ बर्बरःकुक्कुटेपुंसिशठेचवशि
रःपुमान्॥९॥कणिद्दीहस्तिपिपल्योःक्लीबेऽब्धिलवणेस्मृतः॥
बर्बरःपामरेकेशेचक्रलेनीवृदंतरे॥१०॥फंजिकायांपुमान्शा
कभेदपुष्पभिदोःस्त्रियां॥वर्करःपरिहासेस्याच्छागेपुवपशाव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पि॥११॥ वल्लुरं शाद्वलक्षेत्रेगहनौषधयोरपि॥ वल्लूरान्त्रिषुसंशुष्क
मांसशूकरमांसयोः॥१२॥ वार्टरंकूष्मालाबीजदक्षिणावर्तशंखयोः
॥ वीरेचकाकचिंचायांभारत्यांचनपुंसकं॥१३॥ वागरस्तुगतातंके
मुमुक्षौवातवेष्टके॥ विशारदेपिशाणेपिनिर्णयेवारकेपिच॥१४॥
वासरस्तुपुमान्नागप्रभेददिनयोरपि॥ वासुरावासितायांस्याद्भू
सतेपभुविस्त्रियां॥१५॥ विष्टरःकुशमुष्टौस्यादासनेपिमहीरुहे
विस्तरोवाक्प्रपंचेस्याद्विस्तारेप्रणयेपिच॥१६॥ विदुरो नागरेधी
रेकौरवाणांचमंत्रिणि॥ विधुरं स्यात्परिश्लेषेनद्वयोर्विकलेत्रिषु
॥१७॥ रसालायांस्त्रीविदरोज्वलोच्छ्वासजि दारणे॥ विदारीशाल
पर्ण्यांचरोगभेदेसुगंधयोः॥१८॥ विवरं दूषणेगर्तेविसरःप्रसरे
व्रजे॥ विस्तारोविस्तनौस्तंबेविकारोविकृतौरुजि॥१९॥ विहारो
भ्रमणेस्कंधेलीलायांसुगतालये॥ शबरोम्लेच्छभेदेचपानीयेशंक
रेपिच॥२०॥ शबरं सलिलेपुंसिमृगदैत्यविशेषयोः॥ शंबरी
चाखुपर्ण्यांस्याच्छर्वरीयामिनीस्त्रियोः॥२१॥ शर्करा खंडवि
कृतावुपलाकर्परांशयोः॥ शर्करान्वितदेशेपिरुग्भेदेशकलेपिच
॥२२॥ शक्वरीछंदसोभेदेनदीमेखलयोरपि॥ शारीरं शोणमध्य
स्थेपुलिनेदर्दरीतटे॥२३॥ श्वशुरःपूज्येस्त्रीब्राह्म्यांशारीरंदे
हजेवृषे॥ शार्करःस्याद्दुग्धफेनेशर्करान्वितदेशयोः॥२४॥ शां
करस्तुबलीवर्देछंदोभेदेनपुंसकं॥ शार्वरंत्वंधतमसेघातुकेभे
दलिंगकं॥२५॥ शालारंस्याद्धस्तिनखेसोपानेपक्षिपंजरे॥ शा
वरीशूकशिंब्यांस्यात्पुंसिपापापराधयोः॥२६॥ रोध्रेचशाकरिः
पुंसिकार्त्तिकेयेगणाधिपे॥ शिखरोस्त्रीद्रुमाग्राद्रिशृंगेपुलक
कक्षयोः॥२७॥ पक्वदाडिमबीजाभमाणिक्यशकलाग्रयोः॥ शि
शिरोनाहिमेनस्त्रीरितुभेदेजडेत्रिषु॥२८॥ शिलिंध्रंकदलीपु
ष्पेकबरेनाम्नषांतरे॥ द्रुमेदेस्त्रीतुविहगीभेदगंडूपदीमृदोः॥२९॥
शीकरं शरलेवातसृतांबुकणयोःपुमान्॥ शुषिरं वंशादिवाद्ये

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विवरेपिनपुंसकं॥३०॥मूषिकेनास्त्रियांगर्त्तेवन्ध्रेरंध्रान्वितेत्रिषु॥
शृंगाररसुरतेनाट्यरसेचगजमंडने॥३१॥ नपुंसकंलवंगेपिनागसं
भवचूर्णयोः॥संवरो दैत्यहरिणमत्स्यशैलजिनांतरे॥३२॥नपुंसकं
तुसलिलबौद्धव्रतविशेषयोः॥संकरोऽग्निचटत्कारेसंमार्जन्यव
पुंजिते॥३३॥नवदूषितकन्यायांसंकरीपुनरुच्यते॥संस्कारःप्रति
यत्नेनुभवेमानसकर्मणि॥३४॥संस्तरःप्रस्तरेयज्ञेसंगरोयुधिचा
पदि॥क्रियाकारेविषेचांगीकारेक्लीबंशमीफले॥३५॥संभारःसंभृ
तौसंघेसामुद्रंदेहलक्षणे॥समुद्रजेऽन्यलिंगोऽथसावित्रःशंकरे
वसौ॥३६॥सावित्रीसत्यवत्पत्न्यांब्रह्मपत्न्युमयोरपि॥सिंदूरस्तरु
भेदेस्यात्सिंदूरंरक्तचूर्णके॥३७॥सिंदूरीरोचनीरक्तवेल्लिकाधात
कीषुच॥सुनीरस्तुशुनीस्तन्येसर्पांडकेलविंकयोः॥३८॥सुंदरीत
नुभिन्नारीभिदोःस्त्रीरुचिरेऽन्यवत्॥सैरंध्रीपरवेश्मस्थशिल्पक
त्स्ववशास्त्रियां॥३९॥ वर्णसंकरसंभूतस्त्रीमहल्लिकयोरपि॥सौ
वीरंकांजिकेस्रोतोंजनेचबदरीफले॥४०॥ नातुनीरतिहारिद्रं
हरिद्रारंजितेत्रिषु॥नानीपरक्षेहिंडीरःफेनवार्ताकुपूरुषे॥४१॥
रचतुः॥ अरुष्करोव्रणकृतित्रिषुभल्लातकेपुमान्॥भवेदभिम
रोयुद्धेवधेस्वबलसाधने॥४२॥अनुत्तरंत्रिषुश्रेष्ठेप्रतिजल्पविव
र्जिते॥अलंकारस्तुहारादावुपमादावलंकृतौ॥४३॥ अवहारः
पुमांश्चौरेद्यूतयुद्धादिविश्रमे॥निमंत्रणोपनेतव्यद्रव्येग्राहेख्य
यादसि॥४४॥अवतारोऽवतरणेपुष्करिण्यादितीर्थयोः॥अवस्क
रोपिवर्चस्केगुह्येऽथावसरःपुमान्॥४५॥ प्रस्तावेमंत्रभेदेचवर्ष
णेचापिकीर्तितः॥उपलादावकूपारःकूर्मराजेमहोदधौ॥४६॥
असिपत्रःखड्गकोशेपुमान्निक्षौचनारके॥भवेदश्वतरोनागांतरे
वेगसरेपिच॥४७॥अभिहारोऽभियोगेचचौर्येसन्नहनेपिच॥
अग्निहोत्रोग्निहविषोरर्धचंद्रोनखक्षते॥४८॥गलहस्तेबाण
भेदेकृष्णान्निवृतितुस्त्रियां॥आडंबरस्तूर्यपक्ष्मसंरंभेगजगर्जिते

For Private and Personal Use Only

॥४९॥ आत्मवीरः प्राणवति श्यालकेचविदूषके॥ इंदीवरं कुवलये
शतावर्यातुयोषिति॥५०॥ उदुंबरस्तुदेहल्यारक्षभेदेचषंडके॥
कुष्ठभेदेपिचपुमांस्ताम्रेतुस्यान्नपुंसकं॥५१॥ उपव्हरंसमीपेः
स्यादेकांतेपिनपुंसकं॥ उदूतुरस्त्रिमूत्तुंगेकरालोत्कटदंतयोः
॥५२॥ उपकारश्चोपकृतौविकीर्णकुसुमादिषु॥ औदुंबरः श्रा
द्धदेवेरोगभेदेनपुंसकं॥५३॥ अथकर्मकरोभृत्येवेतनाजीवि
नित्रिषु॥ कीनाशेपुंसिमूर्छायांबिंबिकायामपिस्त्रियाम्॥५४॥
कलिकारस्तुधूम्याटेकरंजेपीतमस्तके॥ कर्णिकारःपुमानार
वधद्रौचद्रुमोत्पले॥५५॥ कर्णपूरःशिरीषेस्यान्नीलोत्पलवसंत
योः॥ करवीरःकृपाणेस्याद्दैत्यभेदाश्वमारयोः॥५६॥ करवीर्यै
दितिश्रेष्ठगवीपुत्रवतीषुच॥ कटंभराप्रसारण्यांरोहिण्यांगजयो
षिति॥५७॥ कलंबिकायांगोलायांवर्षाभूमूर्वयोरपि॥ कादंबर
स्तुदध्यग्रेमद्यभेदेनपुंसकं॥५८॥ स्त्रीवारुणीपरभृताभारतीः
शारिकासुच॥ कालंजरो योगिचक्रमेलकेभैरवेगिरौ॥५९॥ कुं
भकारी कुलथ्यांचपुल्लिंगोघटकारके॥ कृष्णसाराशिंशपायां
पुंसिस्तुस्यांमृगांतरे॥६०॥ गिरिसारःपुमांल्लोहेरंगेमलयपर्वते॥
घनसारस्तुकर्पूरेदक्षिणावर्तपारदे॥६१॥ चराचरंवाच्यलिंग
मिंगेजगतिनद्वयोः॥ चर्मकारःपादुकृतिस्त्रियांचर्मकषौषधौ६२
अथचक्रधरोजेःहीनात्रिषुग्रामजालिनि॥ चित्राटीरोविधौभा
लमंकितंयेनतत्रच॥६३॥ घटांकर्णोपहारापहतछागास्रबिंदु
षु॥ तालपत्रंतुताटंकेरंडायांतालपर्ण्यपि॥६४॥ तुंगभद्रानदीः
भेदेस्त्रियांपुंसिनदोत्कटे॥ तुंडिकेरीतुकार्पास्यांबिंबिकायाम
पिस्त्रियां॥६५॥ तुलाधरस्तुलाराशौपुंसिवाणिजकेत्रिषु॥ अथतो
यधरोमुस्तासुनिषण्णौषधीघने॥६६॥ दंडयात्रादिग्विजयेसं
पानवरयात्रयोः॥ अथोदेशपुरंदेशेपूरेपिस्यान्नपुंसकं॥६७॥ दं
डधारःपुमान्पृथ्वीनाथेप्रेताधिपेपिच॥ दिगंबरःस्यात्क्षपणेन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्नेतमसिशंकरे॥६८॥दुरोदरंद्यूतभेदेद्यूतकृत्पणयोःपुमान्॥
देहयात्रायमपुरीगमनेभोजनेपिच॥६९॥द्वैमातुरोजरासंधवा
रणाननयोःपुमान् धराधरौहरौशैलेधाराधरोसिमेघयोः॥७०॥धा
रांकुरस्तुनाशीरेशीकरेपिघनोपले॥धार्तराष्ट्रोःसितास्यांघ्रिहं
सेकौरवसर्पयोः॥७१॥धुंधुमारःशक्रगोपेगृहधूमेपदालिके॥
धुरंधरोधवद्रौनावाच्यलिंगस्तुधूर्वहे॥७२॥धृतराष्ट्रःसरा
ट्टिःस्यान्नागक्षत्रियभेदयोः॥धृतराष्ट्रीहंसपत्न्यांनभस्वरो
विहंगमे॥७३॥विद्याधरेघनेवातेनिशाचरस्तुरक्षसि॥फेरुपे
चकसर्पेषुपांसुलायांनिशाचरी॥७४॥निषद्वरस्तुजंबालेनि
शायांतुनिषद्वरा॥नीलांबरःप्रलंबघ्नेकोणपेचशनैश्वरे॥७५॥
भवेत्परिकरःसंघेपर्यंकपरिवारयोः॥ ॥प्रगाढगात्रिकाबंधे
समाचारविवेकयोः॥७६॥अथपक्षचरश्चंद्रेपृथक्चारिगजे
पिच॥भवेत्प्रतिसरोमंत्रभेदेमाल्येचकंकणे॥७७॥व्रणशुद्धौच
मूपृष्ठेपुंसिनस्त्रीतुमंडने॥आरक्षेकरसूत्रेचनियोज्येत्वन्यलिंग
कः॥७८॥भवेत्परिसरोमृत्यौविधावपिचपुंस्ययं॥परंपरोमृ
गभेदेप्रपौत्रेतनयस्यच॥७९॥परंपरापरिपाट्यांहिंसासंतान
योरपि॥पयोधरःकोषकारेनालिकेरेस्तनेपिच॥८०॥कशेरु
मेघयोःपुंसिप्रभाकरोग्निसूर्ययोः॥प्रतीहारोद्वारिद्वाःस्थे
द्वाःस्थितायांतुयोषिति॥८१॥परिवारःपरिजनेखड्गकोषेपरि
च्छदे॥पारावारःसमुद्रेनातटद्वयेनपुंसकं॥८२॥पाश्वटीरस्तुपु
ल्लिंगोमुक्तव्यापारमंत्रिणि॥लोहकांस्यरजत्पात्रेसिंघाणेपावके
पिच॥८३॥पारिभद्रस्तुमंदारेनिंबद्रौदेवदारुणि॥पीतांबरस्तु
शैलूषेपुंसिकैटभसूदने॥८४॥पीतसारोमलयजेगोमेदकम
णावपि॥पूर्णपात्रंवस्तुपूर्णपात्रेवर्धापकेपिच॥८५॥वलभद्रा
त्रायमाणाकुमार्योःपुंसिसीरिणि॥ब्रह्मपुत्रःक्षेत्रभेदेनदभेदे
चपुंस्ययं॥८६॥वक्रनक्रस्तुपिशुनेतथैवशुकपक्षिणि॥वा

वेटीरोगेगआम्रास्यांकुरेगणिकासुते॥८७॥वारकीरस्तुपुंसि॰
स्याद्वारग्राहिणिवाडवे॥पूकायांरोलरोधिन्यांनीराजितहयेपि
च॥८८॥बिंदुतंत्रः पुमान्शारिफलकेचतुरंगके॥ वीरभद्रो
ऽश्वमेधाश्वेवीरश्रेष्ठेचवीरणे॥८९॥स्याद्वीरतरंवीरणेवीरश्रेष्ठ
शवेचना॥महावीरस्तुगरुडेशूरेसिंहेमखानले॥९०॥वज्रेश्वे
ततुरंगेचसंचानविहगेपिच॥महामात्रःसमृद्धेचामात्येहस्तिप
काधिपे॥९१॥मणिछिद्रातुमेदायामृषभाख्यौषधेपिच॥महेश्व
रोमहादेवेकथितोधीश्वरेपिच॥९२॥मृगनेत्रा रात्रिभेदेविशेषे
योषितस्तथा॥ रथकारस्तुमाहिष्यात्कारणीजेचतक्षणि॥९३॥
रागसूत्रंतुलासूत्रेपट्टसूत्रेनपुंसकं॥लंबोदरःस्याद्धुडानेगणा
नामधिपेपिद्वि॥९४॥लक्ष्मीपुत्रस्तुपुल्लिंगःकामदेवेतुरंगमे॥
व्यवहारोद्रुभेदेस्यान्न्यासेपिचगणस्थितौ॥९५॥ अथव्यतिकरः
पुंसिव्यसनव्यतिषंगयोः॥वातपुत्रोमहाधूर्तेभीमसेनेहनूमति
॥९६॥ विश्वंभरोच्युतेशक्रेपुंसिविश्वंभराभुवि॥विश्वकद्रुस्त्रि
षुखलेध्वानाखेटशुनोःपुमान्॥९७॥विभावरी निशारात्र्योःकु
ट्टन्यांचस्त्रियोषिति॥विवादवस्त्रगुंठ्यांचविभाकरोग्निसूर्ययोः
॥९८॥वीतिहोत्रोनलेःकैंचशतपत्रःशिखंडिनि॥दार्वाघाटेसा
रसेचकमलेतुनपुंसकं॥९९॥शतावरीतुशट्यांस्यादिंदीवर्याम॰
पिस्त्रियां॥शिशुमारोंबुसंभूतजंतौतारात्मकाच्युते॥२००॥भवेर
त्सहचरोझिंट्यांद्वयोरनुचरेत्रिषु॥समुद्रारुःपुमान्ग्राहेसेतुब
द्धेतिमिंगिले॥१॥संप्रहारोगतौयुद्धेस्थिरदंष्ट्रोभुजंगमे॥वरा
हाकृतिविष्णौचसुकुमारोमृदौत्रिषु॥२॥पुंसिपुंड्राभिधानेक्षौ॰
सूत्रधारःशचीपतौ॥नानाद्यंतरसंचारिपारिपात्रप्रभेदयोः॥३॥
॥रपंचकं॥ तमालपत्रंतापिछेतिलकेपत्रकेपिच॥तालीशप
त्रंभूम्यामलकीतालीशयोःस्मृतं॥४॥स्यात्पांशुचामरःपुंसि
दूर्वांचितनटीभुवि॥वर्ह्णोपकेप्रशंसायांपुरोटौधूलिगुच्छके॥५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यात्पादश्चतुरंभागेसेकृतेपिप्पलेपिच॥करकेपरदोषैकस्वच्छ
पुरुषेपिच॥६॥पीतकावेरमिस्पेतत्कुंकुमेपित्तलेपिच॥स्याद्रा
जवदरंरक्तमेलकेलवणेपिच॥७॥वस्वोकसारेंद्रपुरेकुबेरन
लिनीपुरोः॥विप्रतीसारउद्दिष्टःकौकृत्येऽनुशयेरुषि॥८॥भवेत्
समभिहारस्तुपौनःपुन्यभृशार्थयोः॥सर्वतोभद्रइत्युक्तःकाव्य
चित्रेगृहांतरे॥९॥निंबेनासर्वतोभद्रागंभारीनटयोषितोः॥ ॥
इतिरांतवर्गः॥ लैकम्॥ लःशक्रेलातुदानेस्यात्तग्रहणेपिनि
गद्यते॥लीश्लेषणेचचपलेग्लौर्धरण्यांनिशापतौ॥१॥लिकुः
अम्लोरसस्यभेदेस्यादम्लीचांगेरिकौषधौ॥अलिःसुरापुष्पलि
होःपुंस्यालिर्विशदाशये॥२॥त्रिषुस्त्रियांवयस्यायांसेतौपंक्तौ
चकीर्तिता॥आलुर्गलंतिकायांस्त्रीक्लीबमूलेचभेलके॥३॥इ
ला कलत्रेसौम्यस्यधरित्र्यांगविवाचिच॥ओलुस्तुशूरणेपुं
सिस्यादार्द्रेवाच्यलिंगकः॥४॥कला स्यान्मूलरैरवृद्धौशिल्पा
दावंशमात्रके॥षोडशांशेचचंद्रस्यकलनाकलमानयोः॥५॥
कलंभुक्तेत्रिष्वजीर्णनाट्योक्तमधुरध्वनौ॥कलीःस्त्रीकलिका
यान्नाशूराजिकलहेयुगे॥६॥कालोमृत्यौमहाकालेसमयेयम
कृष्णयोः॥कालातुकृष्णात्रिवृतामंजिष्ठानीलिकासुच॥७॥का
लीगौर्यांक्षारकीटेकालिकामातृभेदयोः॥कीलोलेशेद्वयोः
शस्त्रज्वालाकफोणिशंकुषु॥८॥कुलंजनपदेगोत्रेसजातीय
गणेष्वपि॥भवनेचतनौक्लीबंकंटकार्यौषधौकुली॥९॥अथ
कूलंतटेस्तूपेसैन्यपृष्ठतडागयोः॥कोलंकोलिफलेक्लीबेपिप्प
लीचव्ययोस्त्रियां॥१०॥नौकपालेशानौचित्रेवराहेत्संगभेलके॥
॥खलंभूस्थानकल्केषुनीचक्रूराधमेत्रिषु॥११॥खल्लोवस्त्र
प्रभेदेस्याद्गर्तेचर्मणिचातके॥खल्ली तुहस्तपादावमर्दनाख्य
रुजिस्त्रियां॥१२॥खिलमप्रहतेक्लीबंसारसंक्षिप्तवेधसोः॥ग
लःसर्जरसेकंठेगुलःस्यादिक्षवेपुमान्॥१३॥गुली तुगुटिका

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोगभिदोःस्तुह्यांगुलास्मृता॥गोला गोदावरीसख्योःकुनटीदुर्ग
योःस्त्रियां॥१४॥पत्रांजनेमंडुलेचालिंजरेबालखेलने॥चला ल
क्ष्म्यांपुमान्कंपेकंपनेत्वभिधेयवत्॥१५॥चिल्लःपुमान्क्लिन्नने
त्रेक्लिन्नाक्षेप्यभिधेयवत्॥ आततायिनितस्योक्तश्चिल्ली स्यात्तु
द्रवास्तुके॥१६॥चुल्ली चितायामुद्धानेचोलःकूर्पासकेपुमान्॥ न
पुंसकेतुवसनेछलं स्खलितशाठ्ययोः॥१७॥छल्ली वीरुधसं
तानेवल्कलेकुसुमांतरे॥ जलं गोकलनेनीरेह्रीबेरेप्यन्यवज्जडे
॥१८॥जालं गवाक्षआनायेक्षारकेदंभवृंदयोः॥ जालो नीपद्रुमे
जालीपटोलिकौषधौस्त्रियाम्॥१९॥ज्वाला स्यादानपस्योमौंदु
ह्नितर्यपिचस्त्रियां॥झिल्ली वीर्यातप रुचोर्वर्त्यामुहूर्तनांशुके॥
॥२०॥तलं स्वरूपेनूध्वेस्त्रीक्लीबंज्याघातवारणे॥काननेकार्य
बीजेचपुंसितालमहीरुहे॥२१॥चपेटेचत्सरौतंत्रीघातेसव्येन
पाणिना॥तल्ली तरुण्यांतल्लस्तुजलाधारांतरेपुमान्॥२२॥तालः
करतलेंगुष्ठमध्यमाभ्यांचसंमिते॥गीतकालक्रियामानेकरास्फा
लेद्रुमांतरे॥२३॥ वाद्यभांडेचकांसस्यत्सरौतालीजटौषधौ॥क्ली
बंतुहरितालेस्यात्तुलासादृश्यमानयोः॥२४॥ गृहाणांदारुबंधाय
पीठिकायामपीष्यते॥राशौपलशतेभांडेतुलंस्याद्बृहद्दारुणि
॥२५॥ आकाशेथपिचौनस्त्रीदलं मुत्सेधखंडयोः शस्त्रीछदेप्य
वद्रव्येपत्रेप्यथदुलिः स्त्रियां॥२६॥कमठ्यांनामुनौदोला नीत्यां
यानांतरेपिच॥नलःपोटगलेराज्ञिपितृदेवेकपीश्वरे॥२७॥कमले
पिकुनट्यांचक्रमेणक्लीबयोषितोः॥नाला ननापद्मदंडेनाली
शाककडंबके॥२८॥नीलं तुनीलीरक्तेनानिध्यद्रिवानरांतरे
॥नीलीरुग्भेदनीलिन्योःपलमुन्मानमांसयोः॥२९॥पल्ल्यल्प
ग्रामकुट्योःपल्लः स्थूलकुसूलके॥पालिःकर्णलताग्रेऽश्रौ
पंक्तावंकप्रभेदयोः॥३०॥छात्रादिदेयेस्त्रीपालीयूकाश्मश्रुयोषि
तोः॥पिल्लः पुमान्क्लिन्ननेत्रेक्लिन्नाक्षेपुनरन्यवत्॥३१॥पीलुः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुमान्प्रसूनेस्यात्परमाणौमतंगजे॥अस्थिखंडेचताखस्यकांड
पादपभेदयोः॥३२॥पुलः स्यात्पुलकेपुंसिविपुलेप्यन्यलिंगकः
॥फलंजातीफलेसस्येहेतूत्थेव्युष्टिलाभयोः॥३३॥त्रिफलायां
चकक्कोलेप्रियंगौतुफलीस्मृता॥फालःपुंसिमहादेवेकालिंदीभे
दनेपिच॥३४॥ क्लीबंसीरोपकरणेत्रिषुकार्पासवाससि॥बलिर्दै
त्यप्रभेदेचकरचामरदंडयोः॥३५॥उपहारेपुमान्स्त्रीतुजरयाश्ल
थचर्मणि॥गृहदारुप्रभेदेचजठरावयवेपिच॥३६॥बलं गंधर
सेरूपेस्थामनिस्थौल्यसैन्ययोः॥पुमान्हलायुधेदैत्यप्रभेदेवा
यसेपिच॥३७॥ बलयुक्तेऽन्यलिंगःस्याद्बाट्यालकेतुयोषिति॥
वल्ली स्यादजमोदायांव्रतत्यामपियोषिति॥३८॥ बालो नाकुंत
लेश्वस्यकरिणश्चापिबालधौ॥ नालिकेरेहरिद्रायांमल्लिकाभि
द्यपिस्त्रियां॥३९॥ वाच्यलिंगोऽर्भकेमूर्खेह्रीबेरंपुंन्नपुंसकं॥अ
लंकारांतरेमध्येबाली बालात्रुटिस्त्रियोः॥४०॥ वेला कालेच
सीमायामब्धेःकूलविकारयोः॥अक्लिष्टमरणेरागेईश्वरस्यच॥
भोजने॥४१॥ भल्लःस्यात्पुंसिभल्लूकेशास्त्रभेदेतुनद्वयोः॥भल्ला
तक्यांस्त्रियांभल्लीभालं तेजोललाटयोः॥ ४२॥भेलः प्लवेमुनौ
पुंसिभीरावज्ञेचवाच्यवत्॥मलो ऽस्त्रीपापविट्किट्टकृपणेत्व
भिधेयवत्॥४३॥मल्लः पात्रेकपोलेचमत्स्यभेदेबलीयसि॥ मा
लःक्षेत्रेस्त्रियांपुष्पास्त्रजोजात्यंतरेपुमान्॥४४॥मालुः पत्रल
तानार्योःस्त्रियांमूलंशिफाद्ययोः॥मूलवित्तेंतिकेवानामेला
स्यान्मलकेमसौ॥४५॥मौलिःकिरीटेधम्मिल्लेचूडायामनपुंस
कं॥नाशोकद्रौस्त्रियांभूमौलीला केलिविलासयोः॥४६॥शृंगा
रभावचेष्टायांलोलःस्याद्वाच्यलिंगकः॥सतृष्णेचंचलेलोला॥
जिव्हाकमलयोःस्त्रियां॥४७॥व्यालीदुष्टगजेसर्पेश्वापदे नाऽ
न्यवत्खले॥बिलं छिद्रेगुहायांचपुमानुच्चैःश्रवोहये॥४८॥शा
लस्तुशाल्लेपुंसिभृंगिक्षेत्रभित्दोर्विधौ॥शालुः कषायद्रव्येस्या

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चौरकाख्यौषधौपुमान्॥४९॥शालि स्तुकलमादौचगंधमार्जा
रकेपुमान्॥शाला द्रुस्कंधशाखायांगृहगेहैकदेशयोः॥५०॥ना॰
ग्रेषेशीलं मुंडेस्याद्गृहपद्यांशिली मता॥स्तंभशीर्षेशिला शिल्यौ
शिलातुप्रस्तरेमता॥५१॥ तथामनःशिलायांचद्वाराधस्थितदा
रुणि॥शीलं स्वभावेसद्वृत्तेशुक्लोयोगांतरेसिते॥५२॥ नपुंसकं
तुरजतेशूलोः स्त्रीरोगआयुधे॥मृत्युकेतनयोगेषुशूलास्यात्प॰
ण्ययोषिति॥५३॥शूलो भूभृतिशैलंतुशैलेयेतार्क्ष्यशैलके॥सा
लःपादपमात्रेस्यात्प्राकारेसर्जपादपे॥५४॥स्थालंभाजनभेदेऽपि
स्थालीस्यात्पाटलेऽस्त्रयोः॥स्थूलंकूटेऽप्यनिष्पन्नेपीवरेप्यन्यलिंग
कः॥५५॥हालोहलेपुमान्हालामदिरायांचयोषिति॥हेला स्त्रिया
मवज्ञायांविलासेवरयोषितां॥५६॥ लत्रिः॥अनलोवसुभेदे॰
ग्नावनिलोवसुवातयोः॥अर्गलात्रिषुकल्लोलेदंडेऽतरकपाट
योः॥५७॥अरालःकुटिलेसर्जरसेसमददंतिनि॥अंगुलीकर
शाखायांकर्णिकायांगजस्यच॥५८॥अचलावसुधायांस्यादच
लःशैलकीलयोः॥अमलंत्वभ्रकेक्लीबंलक्ष्म्यांस्त्रीनिर्मलेत्रिषु
॥५९॥अंजलीस्तुपुमान्हस्तसंपुटेकुडवेपिच॥अवेलस्त्वपलापे
स्यादवेलापूगचर्विते॥६०॥आभीलंनद्वयोःकृच्छ्रेवाच्यलिंगंभ
यानके॥इल्वलातारकाभेदेनाभेदेदैत्यमत्स्ययोः॥६१॥उत्पली
तुषचर्पट्यांक्लीबंकुष्ठप्रसूनयोः॥उपलःप्रस्तरेरत्नेशर्करायांतु
योषिति॥६२॥उज्वलोदीप्तशृंगारविशदेषुविकाशिनि॥उत्फुल्लं
करणेस्त्रीणामुत्तालेपिविकस्वरे॥६३॥उत्तालउत्कटेश्रेष्ठेविक
रालेप्लवंगमे॥कमलंसलिलेताम्रेजलजेक्लोम्निभेषजे॥६४॥मृ
गभेदेतुकमलःकमलाश्रीवरस्त्रियोः॥कपिलारेणुकायांचशिं
शपागोविशेषयोः॥६५॥पुंडरीककरिण्यांस्त्रीवर्णभेदेत्रिलिंगकं
॥नानलेवासुदेवेचमुनिभेदेचकुक्कुरे॥६६॥कंबलोनागराजे॰
स्यात्सास्नाप्रावारयोरपि॥कृमावप्युत्तरासंगेसलिलेतुनपुंसकं ६७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करालोदंतुरेतुंगेभीषणेचाभिधेयवत्॥ससर्जरसतैलेनाक्लीबंकृ
ष्णाकुठेरके॥६८॥कदलंत्रिषुकपालेप्युपरागेनवांकुरे॥कलध्व
नौकंदलीतुमृगगुल्मप्रभेदयोः॥६९॥कदलाकदलीपृश्न्यांक
दलीकदलौपुनः॥रंभावृक्षेऽथकदलीपताकामृगभेदयोः॥७०॥
कदलाडिंबिकायांचशाल्मलीभूरुहेपिच॥कपालोऽस्त्रीशिरो
स्थ्निस्याद्घटादेःशकलेव्रजे॥७१॥कंठीलातुद्वयोर्द्रोणीप्रभेदेना
क्रमेलके॥कल्लोलःपुंसिहर्षेस्यादुल्लोलवैरिणोरपि॥७२॥काम
लारोगभेदेवानानामरुवसंतयोः॥कामुकेवाच्यलिंगोऽथकालो
लंनरकांतरे॥७३॥नाकुलालेद्रोणकाकेविषभेदेतुनस्त्रियाम्॥
काहलावाद्यभांडस्यभेदेचाप्सरसांभिदि॥७४॥काहलीतुत
रुण्यांस्यात्काहलश्चरणायुधे॥शब्दमात्रेपिपुल्लिंगस्त्रिषुशु
ष्केभृशेखले॥७५॥किट्टालःपुंसिताम्रस्यकलशेलोहगूथके
॥कीलालंरुधिरेतोयेकुशलःशिक्षितेत्रिषु॥७६॥क्षेमेचसुकृ
तेचापिपर्याप्तेचनपुंसकं॥कुवलंचोत्पलेमुक्ताफलेपिबदरी
फले॥७७॥कुड्मलोमुकुलेपुंसिनद्वयोर्नरकांतरे॥कुटिला
तगरपादांस्त्रीभुग्नेवाच्यलिंगकः॥७८॥कुंतलश्चषकेबा
लेजवेपुंभूम्निनीवृति॥कुलालःकुक्कुभेकुंभकारेस्त्रीत्वंजनां
तरे॥७९॥कुंभिलःशालमीनेचचौरेश्लोकार्थचौरयोः॥कुद्दा
लःस्यात्पुमान्भूमिदारणेयुगपत्रके॥८०॥कुचेलाविद्धपर्ण्यां
स्त्रीवाच्यवत्तुकुवाससि॥कुलूलंशंकुसंकीर्णश्वभ्रेनातुतुषान
ले॥८१॥कुंडलंकर्णभूषायांपाशेपिवलयेपिच॥कांचनद्रुगुडू
च्योःस्त्रीकेवलःकुहनेपुमान्॥८२॥नपुंसकंतुनिर्णीतेवाच्य
वच्चैककृत्स्नयोः॥केवलोज्ञानभेदेऽथकोमलंमृदुलेजले॥८३॥
कोहलोवाद्यभेदेस्यान्नाट्यशास्त्रप्रवक्तरि॥ग्रंथिलस्तुक
रीरेस्याद्विकंकततरौपुमान्॥८४॥सग्रंथौत्रिषुगंधोलीभद्रशा
ट्योश्चयोषिति॥गरलंतृणपूलेचविषेमानेनपुंसकं॥८५॥गो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पालोनृपगोपेशेगोकुलेमुसलेहले॥ गोरिलस्तुपुमान्लोहचूर्णे
स्याद्गौरसर्षपे॥ चपलःपारदेमीनेचोरकेप्रस्तरांतरे॥ चपला
कमलाविद्युत्पुंश्चलीपिप्पलीषुच॥८७॥ नपुंसकंतुशीघ्रेस्याद्वा
च्यवत्तरलेचले॥ चत्वालोहोमकुंडेस्यात्पुंसिदर्भेपिदृश्यते ८८
चंद्रिलःपुंसिवास्तूकशाकेभर्गेचनापिते॥ चंचलातुतडिल्लक्ष्म्यो
श्चञ्चलःकामुकेनिले॥८९॥ चूडालातूच्चटायांस्त्रीचूडावति
चवाच्यवत्॥ छगलंनीलवस्त्रेनाछागेस्त्रीवृद्धदारके॥९०॥ जं
बालःशैवलेपंकेजगलोमदनद्रुमे॥ भेदकेपिष्टमद्येचपुंसिधू
र्तेऽभिधेयवत्॥९१॥ जटिलापिप्पलीमांस्योर्जटायुक्तेतुवाच्य
वत्॥ जंगलंनिर्जनस्थानेत्रिलिंग्यांपिशितेस्त्रियां॥९२॥ जंभ
लःपुंसिजंबीरेबुद्धदेवांतरेपिच॥ जंबूलस्तुपुमान्जंबूविट
पेक्रकचच्छदे॥९३॥ जांगलीविषविद्यायांजांगलंजालिनीफ
ले॥ जांगलीशूकशिम्ब्यांस्त्रीजांगलोनाकपिंजले॥९४॥ तर
लंचंचलेषिड्गेभास्करेपित्रिलिंगकं॥ हारमध्यमणौपुंसियवागू
सुरयोःस्त्रियाम्॥९५॥ तंडुलःस्याद्विडंगेचधान्यादिनिकरेपु
मान्॥ तमालस्तिलकेखड्गेतापिच्छेवरुणद्रुमे॥९६॥ तांबूली
नागवल्ल्यांस्त्रीक्रमुकेतुनपुंसकं॥ तातलोरुजिपाकेचलोहकू
टेमनोजवे॥९७॥ तुमुलःकलिवृक्षेनाक्लीबंतुरणसंकुले॥ तैति
लोगंडकेपुंसिक्लीबंतुकरणांतरे॥९८॥ दुकूलंश्लक्ष्णवस्त्रे
स्यात्क्षौमेचधवलागवि॥ वृषश्रेष्ठेपुमान्वाच्यलिंगःशुक्लेचसुंद
रे॥९९॥ नकुलीकुक्कुटीमांस्योःपशुपांडवयोःपुमान्॥ नाकुली
कुक्कुटाकंदेरास्नायांचविकेस्त्रियां॥१००॥ नाभीलंवंक्षणेना
र्याःकृच्छ्रगर्भांडयोरपि॥ निचूलस्तुनिचोलेस्याद्हिज्जलाख्यम
हीरुहे॥१॥ निर्मलंस्यात्तुनिर्माल्येचाभ्रकेचनपुंसकं॥ मलही
नेऽन्यलिंगंचनिस्तलंवर्तुलेचले॥२॥ निष्कलंतुकलाशून्येन
ष्टवीर्येचवाच्यवत्॥ नैपालीतुनवमालीकुनटीसुवहासुच॥३॥

For Private and Personal Use Only

पललंतिलचूर्णेचपंकेमांसेनपुंसकं॥ नाराक्षसेऽथपटलंपिट
केचपरिछदे॥४॥छदिर्दृग्रोगतिलकेक्लीबंव्रजेपुनर्नवा॥प्रतलं
पातालभेदेततांगुलिकरेपुमान्॥५॥पटोलंवस्त्रभेदेनौषधौ
ज्योत्स्न्यांतुयोषिति॥प्रवालोऽस्त्रीकिसलयेवीणादंडेचविद्रुमे
॥६॥पंचालीपुत्रिकागीत्योःस्त्रियांपुंभूम्निनीवृति॥पांशुलःपुं
श्चलेशंभोःखट्वांगेस्त्र्यसतीभुवोः॥७॥पाकलंकुष्ठभैषज्येपुंसि
स्यात्कुंजरज्वरे॥पाचालंपाचनेनाऽग्नौवाधनद्रव्यवातयोः८
पाटलापाटलौस्त्रीस्यादस्यपुष्पेपुनर्नना॥आशुधान्येपुमान्श्वे
तरक्तवर्णेपिवाच्यवत्॥९॥पातालंनागलोकेस्याद्विवरेवड
वानले॥पातिलीवागुरायांस्यान्नारीपात्रप्रभेदयोः॥१०॥पि
प्पलीसलिलेवस्त्रछेदभेदेचनातरौ॥निरंशुकेपक्षिभेदेकणायां
पिप्पलीस्मृता॥११॥पिचुलोझबुकेपिस्याद्जलेजलवायसे
॥पिंगलोनागभिद्रुद्रचंडांशुपारिपार्श्विके॥१२॥निधिभेदेकपा
वग्नौपुंसिस्यात्कपिलेऽन्यवत्॥स्त्रियांवेश्याविशेषेचकरिण्यां
कुमुदस्यच॥१३॥पित्तलातोयपिप्पल्यांस्त्र्यन्यवत्पित्तसंयुते
क्लीबंतुतैजसद्रव्येपिछलोविज्जिनेऽन्यवत्॥स्त्रीपोतिकाशिं
शपयोःशाल्मलीसिंधुभेदयोः॥पुद्गलःसुंदराकारेत्रिषुपुंस्या
त्मभेदयोः॥१५॥पेशलोरुचिरेदक्षेफेनिलोऽरुष्टपादपे॥नास
फेनेत्रिषुक्लीबंकोलीमदनयोःफले॥१६॥बहुलानीलिकायां
स्यादेलायांगविचयोषिति॥कृत्तिकासुस्त्रियांभूम्निविहायसिनपुं
सकं॥१७॥पुंस्यग्नौकृष्णपक्षेचवाच्यवत्प्राज्यकृष्णयोः॥ब
रलाबारलाचापिगंधोलीहंसकांतयोः॥१८॥बार्दलंदुर्दिनेमे
लानंदायांबार्दलःस्मृतः॥मंगलासितदूर्वायांउमायांपुंसि
भूमिजे॥१९॥नपुंसकंतुकल्याणेसर्वार्थरक्षणेपिच॥मंडलं
परिधौकोठेदेशेद्वादशराजसु॥२०॥क्लीबेऽथनिवहेबिंबेत्रिषु
पुंसितुकुक्कुरे॥मंजुलंविषुमजौनाजलरंकोनपुंसकं॥२१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जलांचलेनिकुंजेच महिलाफलिनीस्त्रियोः॥ मातुलोव्रीहिभिन्मा
त्रभ्रात्रोश्चमदनद्रुमे॥२२॥धुस्तूरेमाचलोवंदिचौरेचग्राहरोगयोः
॥मुसलं स्याद्योग्रेतुपुंनपुंसकयोः स्त्रियाम्॥२३॥तालमूल्यामा
खुपर्णीग्रहगोधिकयोरपि॥मृणालंनलदेक्लीबंस्त्रीनपुंसकयोर्बि
से॥२४॥मेखलाखड्गबंधेस्यात्कांचीशैलनितंबयोः॥यमलं युग
लेक्लीबेयमलीचोटिकाद्वये॥२५॥रसालारसनादूर्वाविदारीमार्जि
तासुच॥रसालं सिल्हकेबोलेरसालश्चेक्षुचूतयोः॥२६॥रमि
लोरमणेकामेलांगुलंपुच्छशेफसोः॥लांगलीतोयपिप्पल्यांक्लीबंतु
कुसुमांतरे॥२७॥गोदारणेतृणराजगृहदारुविशेषयोः॥लोहलः
शृंखलाचार्यैः व्यक्तवाजिनिचत्रिषु॥२८॥वंजुलःपुंसितिनिशेवेत
साशोकयोरपि॥वेठालोपुहूभेदेचनौकायांचखनित्रके॥२९॥वा
तूलःपुंसिवात्यायांवाच्यवन्मारुतासहे॥वामिलोदांभिकेवामेत्रि
षुस्याद्विमलास्त्रियां॥३०॥शातलायांभुवोभेदेनिर्मलेत्वभिधेय
वत्॥विपुलःपृथुलेगाधेमेरुपश्चिमभूधरे॥३१॥ विदुलस्तुपुमा
नेबुवेतसेवेतसेपिच॥विडालोनेत्रपिंडेस्याद्वृषदंशककेपुमान्
॥३२॥विशालात्विंद्रवारुण्यामुज्जयिन्यांतुयोषिति॥ मृगपक्षिभि
देःपुंसिपृथुलेत्वभिधेयवत्॥३३॥वृषलोगृंजनेशूद्रेचंद्रगुप्तेचराज
नि शकलंत्वस्त्रिखंडेस्याद्रागवस्तुनिवल्कले॥३४॥शंबलोस्त्री
संबलवत्कुलपाथेयमत्सरे॥शयालुःस्यादजगरेनिद्राशीलेचकुक्कुरे
॥३५॥श्रद्धालुर्दोहदिन्यांस्त्रीश्रद्धायुक्तेतुवाच्यवत्॥श्यामलःपि
प्पलेकृष्णेशार्दूलोराक्षसांतरे॥३६॥व्याघ्रेचपशुभेदेचसत्तमेतूत्त
रस्थितः शाल्मलिस्तरुभेदेस्याद्द्वीपभेदेपिचद्वयोः॥३७॥श्रीफ
लःपुंसिमालूरेधात्रीनीलिकयोःस्त्रियाम्॥शीवलंस्याच्चशैवाले
शैलेयेचनपुंसकं॥३८॥शीतलंपुष्पकाशीशेशैलजेमलयोद्भवे॥
पुमानासनपर्ण्यांस्याच्छिशिरेवाच्यलिंगकं॥३९॥शृगालोवंच
केदैत्यभेदेनाडमरेस्त्रियां॥शृंखलापुंस्कटीवस्त्रबंधेचनिगडेत्रि

For Private and Personal Use Only

षु॥४०॥ शैवलं पद्मकाष्ठे स्याच्छैवाले ऽपि पुमानयं॥ शौष्कलः शु-
ष्कमांसस्य पणके पिशिताशिनि॥४१॥ षंडाली तैलमाने च सरसी-
कामुकस्त्रियोः॥ सरलः पद्मकाष्ठे ना ऽथोदारावक्रयोस्त्रिषु॥४२॥
संकुलं त्रिषु विस्पष्टवाचि व्याप्ते ऽथ सप्तला॥ नवमालीचर्मकषा
गुंजासुपाटलौ स्त्रियां॥४३॥ संधिला तु सुरुंगायां नदीमंदिरयोः
स्त्रियां॥ सिध्मला मत्स्यविकृतौ वाच्यवत्तु किलासिनि॥४४॥ सु-
वेलः प्रणते शांते त्रिषु ना पर्वतांतरे॥ सुतलो ऽट्टालिकाबंधनागलो-
कप्रभेदयोः॥४५॥ हिंगुलो वर्णकद्रव्ये ना भंटाक्यां तु हिंगुली॥ हे-
मलः स्वर्णकारे स्यात्कलासे शिलांतरे॥४६॥ लचतुः॥ अक्ष-
माला ऽक्षसूत्रे स्यादरुंधत्यामपि स्त्रियाम्॥ अंकपाली परीरंभे
धात्रीवेदिकयोः स्त्रियां॥४७॥ अथातिबलः प्रबले त्रिषु स्त्री त्वौ-
षधीभिदि॥ उदूखलं गुग्गुलौ स्यादुलूखले ऽपि नद्वयोः॥४८॥ ए-
काष्ठीला वनतिक्तिकौषधौ पुंसि वकपुष्पे॥ कलकलउक्तः को-
लाहले तथा सर्जनिर्यासे॥४९॥ अथ कर्मफलं कर्मरंगकर्मविपा-
कयोः॥ कंदरालः पुमान्गर्दभांडे प्लक्षतरावपि॥५०॥ कमंडलुः स्यात्करके न
स्त्री ना प्लक्षपादपे॥ कुतूहलं कौतुके स्यात्प्रशस्ते ऽपि च दृश्यते॥५१॥ खतमा-
लस्तु पुल्लिंगो धूमे ऽपि च बलाहके॥ गंडशैलो ललाटे स्याच्च्युतस्थूलोपले गि-
रेः॥५२॥ गंधफल्यपि गुंद्रायां चंपकस्य च कोरके॥ चक्रवालो ऽद्रिभेदे स्या-
च्चक्रवालं तु मंडले॥५३॥ जलांचलं स्रोतोवारिनिर्गमे शैवले
ऽपि च॥ दलामलं मरुबके दमने ऽपि नपुंसकं॥५४॥ ध्वनिनाला
तु वीणायां वेणुकाहलयोरपि॥ स्यात्परिमलो ऽतिमर्दे ऽतिमनो-
हरगंधयोरपि॥५५॥ सुरतोपमर्दे विकसच्छरीररागादिसौरभे
पुंसि॥ अथ पोटगलः पुंसि नले च काशमत्स्ययोः॥५६॥ भवेद्ब-
हुफलो नीपे ना ऽमलक्यां तु योषिति॥ भस्मतूलं ग्रामकूटे पांशु-
वर्षे हिमे ऽपि च॥५७॥ भद्रकाली तु गंधोल्यां कात्यायन्यामपि स्त्रि-
यां॥ महाकालो महादेवे किंपाके प्रथमांतरे॥५८॥ भवेन्मदक-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोमते भेमदाव्यक्तवाचिनोः॥ महाबलं सीसकेति वलायांस्त्री बलोत्कटे॥५९॥त्रिलिंगंमणिमालातुहारेदंतक्षतांतरे॥ महानीलो भृंगराजेमणिनागविशेषयोः॥६०॥ मुक्ताफलंतुकर्पूरे मौक्तिकेलवलीफले॥स्यान्मृत्युफलाकदल्यामहाकालफलेपुमान्॥६१॥ भवेद्यवफलोवेणौमांसीकुटजयोरपि॥रजस्वला पुष्पवत्यांस्त्रियांस्यात्सौरभेपुमान्॥६२॥ वातकेलिः कलालापेषद्गदंतक्षतेपुमान्॥अथ वायुफलंशक्रकार्मुकेकरकेपिच॥६३॥भवेद्विचकिलोमल्लीप्रभेदेमदनेपुमान्॥ बृहन्नलागुडाकेशेमहापोटगलेपुमान्॥६४॥ सदाफलःस्कंधफलेनारिकेलेप्युदुंबरे॥सिनीवाली तुदृष्टेंदुकलामादुर्गयोस्त्रियां॥६५॥अथ सौवर्चलंसर्जक्षारेचलवणांतरे॥ हस्तिमल्लः भ्रमातंगेशंखनागेविनायके॥६६॥ हरितालंधातुभेदेस्त्रीदूर्वाकाशरेखयोः॥ हलाहलोब्रह्मसर्पेभंजनायांविषेस्त्रियां॥६७॥ लपंच॥ ॥ आसुतीबलआख्यातःकन्यापालकयज्वनोः॥ उदंडपालः पुंसिस्यात्सर्वमत्स्यप्रभेदयोः॥६८॥ एककुंडलआख्यातोबलभद्रेधनाधिपे॥कपीटपालउद्दिष्टःकेलितातसमुद्रयोः॥६९॥ स्यात्पांडुकंबलःश्वेतप्रावारग्रावभेदयोः॥भवेत्सुरततालीतुदूतिकायांशिरःस्रजि॥७०॥ इतिलांतवर्गः॥२०२३॥वैकं॥ वःसांत्वनेचवातेचवरुणेचनिगद्यते॥ वं प्रचेतसिजानीयाद्विवार्थेचतदव्ययं॥१॥स्वःस्यात्पुंस्यात्मनिज्ञातौत्रिष्वात्मीयेधनेस्त्रियां॥ वद्विः॥ अविर्नाथेरवौमेषेशैलेमूषिककंबले॥२॥अश्वः पुंजातिभेदेचतुरगेचपुमानयं॥ ऊर्ध्वं स्यादुच्छ्रितेतुंगेचोपरिष्टादपिस्मृतं॥३॥ क्षवः क्षुतेराजिकायांकविर्वाल्मीकिशुक्रयोः॥ स्त्रीकाव्यकरेपुंसिखलीनेस्यात्तुयोषिति॥४॥ कण्वं पापेमुनौपुंसिकिण्वंबीजेचशीधुनः॥पापेक्लीबंनपुंसकेशंडेःन्यवद्विक्रमे॥५॥स्यात्तुग्रीवाकंधरायांतच्छिरायांच

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योषिति॥चार्वी तु शोभना बुध्योज्योत्स्ना धनदभार्ययोः॥६॥
छविः शोभारुचोर्योषिज्जवो वेगवति त्रिषु॥पुल्लिंगस्तु भवेद्वेगे वो
ड्रपुष्पे जवा स्मृता॥७॥जीवः प्राणितिवृत्तौ च वृक्षभेदे बृहस्पतौ
॥जीवा जीवंतिका मौर्वी वचा शिंजितभूमिषु॥८॥ नस्त्री तु जी
विते तत्वं स्वरूपे परमात्मनि॥स्याद्विलंबितनृत्ये च द्रवः शाद्रव
नर्मणोः॥९॥ रसेपि द्रवदावौ तु वनवन्हौ वनेप्युभौ॥ द्वंद्वं रहस्य
कलहे तथा मिथुनयुग्मयोः॥१०॥ दार्वी दारुहरिद्रायां तथा गो
जिह्विकौषधौ॥द्यौः स्त्री स्वर्गे च गगने दिवं क्लीबं तयोः स्मृतं॥
११॥दैवमेघे सुरे रात्ति स्यान्नपुंसकमिंद्रिये॥ देवी कृताभिषेका
यां तेजनीपृक्कयोरपि॥१२॥ धवः पुमान्धवे धूर्ते पत्यौ रक्षांतरे
पि च॥ध्रुवः शंकौ हरे विष्णौ वटे चोत्तानपादजे॥१३॥वसुयोग
भिदोः पुंसि क्लीबं निश्चिततर्कयोः॥स्त्री मूर्व्याढ्योः शालपर्णी गी
तिस्तुम्भेदयोस्त्रिषु॥१४॥संतते शाश्वते चाथ नवनव्ये पुमान्
स्तुतौ॥नीवी परिपणे स्त्रीणां कटीवसनबंधने॥१५॥पक्वं प
रिणतेपि स्याद्विनाशाभिमुखे त्रिषु॥प्लवः स्यात्प्लवने भेले भेके
ऽवौ श्वपचेपपौ॥१६॥जलकाके च कुलके प्रवणे पर्कटीद्रुमे॥
कारंडवाख्यविहगे शब्दे प्रतिगतौ पुमान्॥१७॥ कैवर्तिमुस्तके
गंधतृणेपि स्यान्नपुंसकं॥ पार्श्वं कक्षांतरे चक्रोपांते पर्शुगणे
पि च॥१८॥ प्राध्वं तु प्रणते चातिदूरवर्त्मनि बंधने॥ पृथ्वी भूमौ
महत्यां च त्वक्पत्र्यां कृष्णाजीरके॥१९॥ भवः क्षेमेशसंसारे स
त्तायां प्राप्तिजन्मनोः॥भावः सत्तास्वभावाभिप्रायचेष्टात्मज
न्मसु॥२०॥ क्रियालीलापदार्थेषु विभूतिबुधजंतुषु॥ रत्यादौ
चाथ रेवा स्यान्नील्यां रत्यां नदीभिदि॥२१॥ लवो लेशे विनाशे च
छेदने रामनंदने॥ लट्वा करंजभेदे स्यात्फले वाद्ये खगांतरे २२॥
लध्वी लाघवयुक्तायां प्रभेदे स्यंदनस्य च॥ विश्वा त्वतिविषायां
स्त्री जगति स्यान्नपुंसकं॥२३॥ नना पुंस्यां पुंसि देवप्रभेदे प॰

For Private and Personal Use Only

रिवलेत्रिषु॥बिल्वं फलेश्रीफलेनाशवः स्यात्कुणपेपुमान्॥२४॥
नपुंसकंतुपानीयेशिवभूर्जेनृपेपुमान्॥शिवो मोक्षेमहादेवेकी
लकग्रहयोगयोः॥२५॥ वालुकेगुग्गुलौवेदेपुंडरीकद्रुमेपुमान्॥
सुखक्षेमजलेक्लीबंशिवा झाटामलोषधौ॥२६॥ अभयामलकी
गौरीफेरुसक्तफलासुच॥शिव स्तुभूर्जपत्रेस्यात्तथोदारमही
पतौ॥२७॥ स्रुत्वं ताम्रेयज्ञकर्मण्याचारेजलसन्निधौ॥सत्वंगु
णेपिशाचादौबलेद्रव्यस्वभावयोः॥२८॥ आत्मत्वेव्यवसायासु
चित्तेष्वस्त्रीतुजंतुषु॥सवो यज्ञेचसंधानेसांत्वंदाक्षिण्यसामनोः
॥२९॥स्रुवा द्वयोर्हेमपात्रेशल्लकीमूर्वयोःस्त्रियाम्॥ह्वव आह्वा
ध्वराव्हानेह्रस्वोन्यकुरवर्वयोस्त्रिषु॥३०॥ वत्रि॥ अक्षीवंवशिरे
शिग्रौनामत्तेपुनरन्यवत्॥अभावोमरणेसत्वेआहवोयुद्धय
ज्ञयोः॥३१॥आर्तवंस्त्रीरजेपुष्पेक्लीबंस्यादृतुजेत्रिषु॥आस्रवो
गीकृतौक्लेशेनान्यवद्वचनस्थिते॥३२॥उद्धवो यादवभिदिमहे
चक्रतुपावके॥उत्सवोमहइत्सेकेइच्छाप्रसवकोपयोः॥३३॥का
रवीमधुरादीप्यत्वक्पत्रीकृष्णजीरके॥कितवस्तुपुमान्मत्ते वं
चकेकनकाह्वये॥३४॥ केशवोऽजेचपुन्नागेपुंसिकेशवतित्रिषु
कैतवंतुछलेद्यूतेकैरवःकितवेरिपौ॥३५॥नपुंसकंचकुमुदेचंद्रि
कायांतुकैरवी॥ गांडीवोगांडिवश्चाःस्त्रीकार्मुकेऽर्जुनकार्मु
के॥३६॥गालव स्तुमुनौलोध्रेतांडवोऽस्त्रीतृणांतरे॥भवेदुद्धु
तनृत्येचत्रिदिवासरिदंतरे॥३७॥पुंसिस्वर्गेदीदिविर्नाधिषणेऽन्ने
तदस्त्रियां॥निष्पावःशूर्पपवनेराजमेषकडंगके॥३८॥पवनेशिं
बिकायांनानिर्विकल्पेऽन्यलिंगकः॥निन्हवःपुंसिनिह्नुतावि
श्वासापलापयोः॥३९॥पल्लवोऽस्त्रीकिसलयेविटपेविस्तरेवने॥
शृंगारेऽलक्तरागेस्त्री प्रभावःशांतितेजसोः॥४०॥पंचत्वंपंचा
नांभावेप्राणानामत्ययेपिच॥ प्रभवोजन्ममूलेस्याज्जन्महेतौ
पराक्रमे॥४१॥ ज्ञानस्यचादिमस्थानेप्रसवोगर्भमोचने॥उत्पा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देस्यादपत्येपिफलेपिकुसुमेपिच॥४२॥प्रसेवः पुंसिवीणांगेस्यू
तेचपार्थिवोनृपे॥पार्थिवीतुसितायांस्त्रीपृथिव्याविकृतौत्रिषु॥
॥४३॥पुंगवःस्याद्बलीवर्दप्रभेदेप्यौषधस्यच॥उत्तरस्थःपुनःश्रे
ष्ठेफेरवोजंबुकेस्त्रपे॥४४॥बल्लवःसूपकारेस्यात्भीमसेनेच
गोदुहि॥बांधवोबंधुसुहृदोभार्गवोगजधन्विनोः॥४५॥शुक्रेप
रशुरामेच भार्गवीपार्वतीश्रियोः॥दूर्वायांभैरवःपुंसिशंकरे
भीषणेत्रिषु॥४६॥माधवोःजेमधौराधेयादवेनास्त्रियांमिसो॥
मधुशर्करावासंतिकुट्टनीमदिरासुच॥४७॥गोमहिषादिसंपत्तौ
यादवःपुंसिकेशवे॥राजीवंनलिनेनातुभेदेहरिणमीनयोः॥४८
राघवोब्धेर्महामीनभेदेचरघुवंशजे॥रौरवोनरकेघोरेबडवा
द्विजयोषिति॥४९॥अश्वायांकुंभदास्यांचनारीजात्यंतरेपिच॥
बाडवंकरणेस्त्रीणांघोटकौघेनपुंसकं॥५०॥पातालेनस्त्रियां
पुंसिब्राह्मणेवडवानले॥विभवोरैमोक्षैश्वर्यैविद्रवोविद्रुतौ
धियि॥५१॥विभावःस्यात्परिचयेरसस्योद्दीपनादिषु॥शात्र
वंभावसंहसोःशत्रूणांशात्रवोद्विषि॥५२॥षाडवोगानरसयोः
सचिवोमंत्रिचेटयोः॥सहायेसंभवोहेतावुत्पत्तौमेलकेपिच॥
॥५३॥आधारानतिरिक्तत्वेप्याधेयस्यनिगद्यते॥सुग्रीवोवासुदे
वस्यहयेशाखामृगेश्वरे॥५४॥सुषवीकारवेल्लेस्यात्कृष्णाजी
रकजीरयोः॥सैंधवोःस्त्रीमाणिमंथेनाश्वेसिंधुभवेत्रिषु॥५५
वचतुः॥अनुभावःप्रभावेस्यान्निश्चयेभावबोधके॥भवेद
भिषवःस्नानेमद्यसंधानयज्ञयोः॥५६॥अपन्हवस्तुपुल्लिंगः
स्मृतःस्नेहापलापयोः॥आदीनवःपुमान्दोषेपरिक्लिष्टदुरंतयोः
॥५७॥उपप्लवःसैंहिकेयेविप्लवोत्पातयोरपि॥कुशीलवस्तुवा
ल्मीकौनटचारणयोरपि॥५८॥जलबिल्वःकर्कटेस्यात्पंचांगे
जलचत्वरे॥जीवंजीवश्चकोरेस्याद्द्रुमभेदेपिपुंस्ययं॥५९॥धा
मार्गवस्तुपुंसिस्यादपामार्गेचघोषके॥पारिप्लवश्चा कुले

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्याच्चंचलेचपराभवः॥६०॥तिरस्कारेविनाशेचपुंसिपारशवः
पुमान्॥परस्त्रीतनयेशस्त्रेद्विजाच्छूद्रासुतेपिच॥६१॥पुरथी
वस्तुपुल्लिंगोगर्गरीताम्रकुंभयोः॥बलदेवोबलेनातेत्रायमाणौष
धौस्त्रियां॥६२॥रंतिदेवस्तुनृपतेर्भेदेचगरुडध्वजे॥रोहिताश्व
श्चित्रभानौहरिश्चंद्रनृपात्मजे॥६३॥अथशीतशिवंक्लीबंशैले
यमणिमंथयोः॥पुंसिसक्तुफलावृक्षेतथामधुरिकौषधौ॥६४॥
सहदेवाबलादंडोत्पलयोःशारिवौषधौ॥सहदेवीतुसर्पाक्ष्यां
पुंसिस्यात्पांडवेपुनः॥६५॥वपंच॥आशितंभवमन्नाद्येतृप्ता
वप्याशितंभवा॥इतिवांतवर्गः॥शद्विः॥अंशुःप्रभाकिर
णयोर्नाशातृष्णादिशोस्त्रियाम्॥आशु धान्यांतरेशीघ्रेपीशा
लांगलदंडके॥१॥ईशःप्रभौमहादेवेकाशीवाराणसीपुरे॥न
स्त्रियांतृणभेदेस्यात्कीशोदिगंबरेकपौ॥२॥कुशी फालेकु
शा रज्ज्वांत्रिषुपापिष्ठमत्तयोः॥योक्त्ररामसुतद्वीपेनादर्भेस्त्री
कुशं जले॥३॥केशःस्यात्पुंसिवरुणेह्रीबेरेकुंतलेपिच॥क्ले
शोदुःखेपिकोपेपिव्यवसायेपिदृश्यते॥४॥कोशोस्त्रीकुड्म
लेपात्रेदिव्येखड्गपिधानके॥जातिकोशेर्थसंघातेपश्यांशब्द
दिसंग्रहे॥५॥दर्शस्तुस्यादमावास्यायागभेदावलोकने॥दं
शःकीटविशेषेचवर्मदंशनयोःपुमान्॥६॥दशावस्थादीपव
र्त्योर्वस्त्रांतेभूम्नियोषिति॥दृक्स्त्रियांदर्शनेनेत्रेबुद्धौचत्रिषु
वीक्षके॥७॥नाशःपलायनेपिस्यान्निधनानुपलंभयोः॥निशा
दारुहरिद्रायांस्यात्त्रियामाहरिद्रयोः॥८॥पशुर्मृगादिदेवाजे
नाऽव्ययंपशुदर्शने॥पाशःकेशादिपूर्वःस्यात्तत्संघेकर्णपूर्वकः
॥९॥सुकर्णेचस्वसामर्थ्यान्मृगपक्ष्यादिबंधने॥पांशुर्धूलौच
सस्यार्थचिरसंचितगोमये॥१०॥पेशीसुपक्वकलिकेमांस्यांख
ड्गपिधानके॥मांसपिंड्यामंडभेदेराशेर्मेषादिपुंजयोः॥११॥पुं
सिवंशःकुलेवेणौपृष्ठावयववर्गयोः॥वशावंध्यासुतायोषा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रीगवीकरणीषु च ॥१२॥ त्रिष्वायते क्लीबमायतत्वेचेछाप्रभुत्व
योः ॥ विट्पुंसि मनुजे वैश्ये वेशो वेश्यागृहे गृहे ॥१३॥ नेपथ्ये च
शशी वाले लोध्रे नृपशुभेदयोः ॥ स्पर्शो रुजायां दाने च स्पर्शने स्प
र्शकेपि च ॥ स्पर्शः स्यात्संपरायेच प्रणिधावपि पुंस्ययं ॥ शांत्रिः ॥
आदर्शो दर्पणे टीका प्रतिपुस्तकयोरपि ॥१५॥ उडीशो ग्रंथभेदे
स्यादुडीशश्चंद्रिकापतौ ॥ उपांशु जपभेदे स्यादुपांशु विजने
ऽव्ययं ॥१६॥ कपिशस्त्रिषु श्यावे स्त्री माधव्यां सिल्हके पुमान्
॥ कर्कशः काशमर्दे स्तु कांपिल्ये षष्व्यसौ पुमान् ॥१७॥ त्रिषु साह
सिके क्रूरे दृढाम स्तृणनिर्दये ॥ कीनाशः कर्षक सुद्रोपांशु घातिषु
वाच्यवत् ॥१८॥ यमेनाकुलिशो नस्त्रीदंभोलौ नाझषांतरे ॥ गि
रीशो ऽद्रिपतौ वाचस्पतिशंकरयोः पुमान् ॥१९॥ तुंगीश स्तु
पुमान्गौरीवल्लभे हिमदीधितौ ॥ दुःस्पर्शो धन्वयासे ना कंटका
र्यां स्त्रियां त्रिषु ॥२०॥ खरस्पर्शेथ निस्त्रिंशः खड्गे ना निर्दये त्रिषु
॥ निर्वेश स्तु पुमान्भोगे वेतने मूर्छने पि च ॥२१॥ निवेशः पुंसि
विन्यासे शिबिरोद्वाहयोरपि ॥ निर्देशः शासने पि स्यात्कथनो
पांतयोरपि ॥२२॥ नीकाशो निश्चये तुल्ये पलाशं छदने मतं ॥ श
टी किंशुकर क्षःसु पुंसि स्याद्धरिते त्रिषु ॥२३॥ प्रकाश स्तु स्फुटे ऽ
त्यातः प्रहासातपयोरपि ॥ प्रदेशो देशमात्रे स्यात्तर्जन्यंगुष्ठ
संमिते ॥२४॥ भित्तावपि च पिंगाशी नीलिका यां नपुंसकं ॥ जा
त्यस्वर्णे पुमान्पल्लीपतौ मत्स्यांतरे पि च ॥२५॥ बालिश श्च
शिशौ मूर्खे भूकेशः शैवले वटे ॥ भूकेश्य वल्गुजे पि स्याल्लोम
शो मुनिमेषयोः ॥२६॥ लोमान्विते स्त्रियां काकजंघा मांसी व
चासु च ॥ भूकशिंबि महामेदा काशीशे शाकिनीभिदि ॥२७॥ वि
वशस्त्रिष्ववश्यात्मा रिष्टदुष्टधियोरपि ॥ विकाशः पुंसि विज
ने प्रकाशे सदृशं समे ॥२८॥ उचिते चाऽथ संवेशः स्वापस्त्री
रतबंधयोः ॥ सुखाशो वरुणे राजतिनिशे सुखभोजने ॥२९॥ऽ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हताशो निर्दये चाशारहितेपि शुनेपि च॥ शचतुः॥ अपदेशः पुमां
ल्लक्ष्ये निमित्तव्याजयोरपि॥३०॥ अपभ्रंशस्तु पतने भाषाभेदापश
ब्दयोः॥ आश्रयाशः पुमान्वन्हौ त्रिषु वाश्रयनाशके॥३१॥ उप
स्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि॥ उपदेशो विदेशे च नेत्ररो
गांतरेपि च॥३२॥ क्रूरदृक् पिशुने वाच्यलिंगः पुंसि शनैश्चरे॥ खं
डपर्शुः पर्शुरामे शंकरे चूर्णलेपिनि॥३३॥ खंडामलकभैषज्ये सिद्धि
कातनयेपि ना॥ जीविते शो यमे पुंसि त्रिषु स्याज्जीवितेश्वरे॥३४॥
नागपाशः पुमान्स्त्रीणां करणे च रणायुधे॥ पंचदशी त्वमावा
स्यापौर्णमास्योश्च योषिति॥३५॥ प्रतिष्कशः सहाये स्याद्वा
र्त्ताहरपुरोगयोः॥ परिवेशो वेष्टने स्यात्परिधानेपि पुंस्ययं॥३६॥
पादपाशी खटुकायां शृंखलायामपि स्त्रियां॥ पुरोडाशो हविर्भे
दे च मस्यां पिष्टकस्य च॥३७॥ हुतशेषे च भूमिस्पृक् पुंसि मानववै
श्ययोः॥ इति शांतवर्गः॥ षैकम्॥ षः कचे पुंसि विज्ञे च श्रेष्ठे
स्यादभिधेयवत्॥ क्षः संवर्त्ते राक्षसे च नरसिंहे च विद्युति॥१॥
क्षेत्रे नाशे से त्रपाले क्षि निवासे गतौ क्षये॥ षद्विः॥ अक्षो ज्ञाता
र्थे शकटव्यवहारेषु पाशके॥२॥ रुद्राक्षेंद्राक्षयोः सर्पे विभीतक
तरावपि॥ चक्रे कर्षे पुमान् क्लीबं तूत्थे सौवर्चलेंद्रिये॥३॥ उषा
बाणसुतारात्र्योरुषः कामिनि गुग्गुलौ॥ रात्रिशेष उषायां तु के
चिदाहुस्तदव्ययं॥४॥ ऊषः स्यात् रमृद्यौक्तं प्रभातेपि पुमानयम्॥
तत्सं ध्यायां चरंध्रे च चंद्रनाड्रौ श्रवोबिले॥५॥ ऋषिर्वेदे वसिष्ठादौ
दीधितौ च पुमानयं॥ ऋक्षः पर्वतभेदे स्याद्भल्लूके शोणके पुमान्॥६॥
कृतवेधने न्यलिंगं नक्षत्रे पुन्नपुंसकं॥ ऋक्षा स्याद्दंतरी चस्य पश्चा
दंचलपल्लवे॥७॥ स्पर्धापदे नादौ मूले कच्छवीरुत्तृणेषु च॥ कर्षो
ना कर्षणे मानप्रभेदे पुन्नपुंसकं॥८॥ कर्षूः पुमान् करीषाग्नौ स्त्रि
यां कुल्ये छिखातयोः॥ काक्षी तुवरिकायां च सौराष्ट्रमृद्यपि स्त्रियां
॥९॥ कोषो ऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके॥ जातिकोशे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽर्थसंघातेपेश्याशब्दादिसंगृहे॥१०॥ घोष आभीरपल्ल्यांस्याद्गो
पालध्वनिघोषके॥ कांस्येचांबुदनादेनाघोषामधुरिकोषधौ॥
११॥ चोक्षो गीतज्ञचौक्षेतथा॥ भीक्ष्णमनोज्ञयोः॥ झषा नाग
बलायांस्त्रीतापमत्स्याटवीषुना॥१२॥ तर्षो लिप्सोदन्ययोस्त्रि
तृकांतोवाचिरुचौस्त्रियां॥ तुषा धान्यत्वगक्षद्रोस्तृषा लिप्सा
तृषास्त्रियां॥१३॥ तृट्लिप्सायामुदन्यायांस्मरपुत्र्यामपिस्त्रियां
॥दक्षस्त्रिषुपटौपुंसिताम्रचूडेप्रजापतौ॥१४॥ मुनिभेदेहरवृषेद्रु
मभेदेस्त्रियांभुवि॥ दोषःस्याद्दूषणेपापेदोषारात्रौभुजेपिच॥१५
ध्वांक्षोमत्स्यातवगेकाकेतक्षेभिक्षुकेपिच॥ ध्वांक्षीककोलिका
यांस्याल्लक्षंकात्स्न्येतृणेपिच॥१६॥ क्लीबेऽथपुंसिमहिषेनिकृष्ट
पुनरन्यवत्॥ पूक्षो जटीगर्दभांडद्वीपभित्कुंजराशने॥१७॥ प
क्षो मासार्द्धकेपार्श्वेगृहेसाध्यविरोधयोः॥ केशादेःपरतोवृंदेबले
सखिसहाययोः॥१८॥ चुल्लीरंध्रेपतत्रेचराजकुंजरपार्श्वयोः॥
प्रेक्षा नृत्येक्षणेबुद्धौ प्रैषः क्लेशेचमर्दने॥१९॥ उन्मानेप्रेषणेपौषो
मासेतत्पूर्णिमातिथौ॥ स्त्रियांभक्षाभृतोयाञ्चासेवाभिसितवस्तु
षु॥२०॥ माषो व्रीह्यंतरेमूर्खेमानत्वग्दोषभेदयोः॥ मिषं व्याजे
स्पर्द्धनेनामेषो राश्यंतरेस्तभे॥२१॥ भैषज्यभिदि मोक्षस्तुमुक्ति
पाटलिमोचने॥ यक्षोगुह्यकमात्रेचगुह्यकाधीश्वरेपिच॥२२॥ र
क्षाजतुरक्षणयोरूक्षस्त्वप्रेमण्यचिक्कणे॥ लक्षा नपुंसिसंख्या
यांक्लीबंव्याजशरव्ययोः॥२३॥ वर्षो ऽस्त्रीभारतादौचजंबूद्वीपा
ब्दवृष्टिषु॥ प्रावृट्कालेस्त्रियांभूम्नि विट्स्त्रीव्यापनविष्ठयोः२४
विषंतुगरलेतोयेऽतिविषायांचयोषिति॥ वृषोधर्मेबलीवर्देशृंग्यांपुरा
शिभेदयोः॥२५॥ श्रेष्ठेस्यादुत्तरस्थश्चव्यासमूषिकशुक्रले॥ तथावास्तु
स्थानभेदेपुमानेषप्रकीर्तितः॥२६॥ वृषा मूषिकपर्ण्यांचपत्नीनामासने
वृषी॥ व्योषंस्यात्त्रिकटुद्रव्येकरिभेदेपुमानयं॥२७॥ शुषिःशोषेबिलेस्त्री
स्याच्छ्लेषःसंकर्षणेवधे॥ अनंतेनाप्रसादेनस्वनिर्मास्त्यापणेस्त्रियां॥२८

For Private and Personal Use Only

उपयुक्तेतरेनस्त्रीशोषो यक्ष्मणि शोषणे ॥ षत्रिः॥ अध्यक्षो
धिकृतेपुंसिस्यात्प्रत्यक्षेऽभिधेयवत् ॥२९॥ अभीषुः प्रग्रहेरश्मौ
नाकर्षौद्यूतइंद्रिये॥ पाशकेशारिफलकेकोदंडाभ्यासवस्तुनि॥
॥३०॥ आकर्षणेपिपुंसिस्यादामिषं पुन्नपुंसकं॥ भोग्यवस्तु
निसंभोगेप्युक्तोचेपललेपिच॥३१॥ उष्णीषं तु शिरोवेष्टकिरीटे
लक्षणांतरे॥ उत्प्रेक्षा नवधानेपिकाव्यालंकारणांतरे॥३२॥ क
ल्मषं किल्बिषेक्लीबं पुंसिस्यान्नरकांतरे॥ कल्माषोयातुधानेच
कृष्णापांडववकृष्णयोः॥३३॥ कलुषं त्वाविषेपापेकिल्बिषं पा
परोगयोः॥ अपराधेपिकुल्माषं कांजिके यावके पुमान्॥३४॥ गं
डूषो मुखपूर्तौभपुष्करप्रसृतोन्मिते॥ गवाक्षी शक्रवारुण्यां
गवाक्षोजालकेकपौ॥३५॥ गोरक्षो नागरंगेस्याद्गवांचपरि
रक्षके॥ जिगीषाजेतुमिच्छायांव्यवसायप्रकर्षयोः॥३६॥ तवी
षी शक्रकन्यायांपुंसिस्वर्गेमहोदधौ॥ ताविषी चंद्रकन्यायां
नास्वर्गांबुधिकांचने॥३७॥ नहुषो नागभेदेस्यात्सोमवंशनृ
पेपिच॥ निकषः शाणफलके निकषा यातुमातरि॥३८॥ निमे
षनिमिषौ कालप्रभेदेऽक्षिनिमीलने॥ परुषं कर्बुरेरूक्षेनिष्ठु
रोक्तौचवाच्यवत्॥३९॥ प्रदोषः समयेदोषेप्रत्यूषोहर्मुखेवसौ॥
पीयूषं सप्तदिवसावधिक्षीरेतथाऽमृते॥४०॥ पुरुषः पूरुषेसां
ख्यज्ञेचपुन्नागपादपे॥ पौरुषंपुरुषस्यस्याद्भावेकर्मणितेजसि
॥४१॥ ऊर्ध्वविस्तृतदोःपाणिनृमानेत्वभिधेयवत्॥ महिषीकृता
भिषेकासैरिभ्योरोषधीभिदि॥४२॥ मारिषः शाकभिदार्येना
ट्योक्त्यापुंसियोषिति॥ दक्षायांमृगाक्षीतुविशालामृगनेत्र
योः॥४३॥ रक्ताक्षःकासरेक्रूरेपारावतचकोरयोः॥ रौहिषं क
तृणेक्लीबंपुंसिस्याद्धरिणांतरे॥४४॥ विश्लेषो विधुरे योगे शुश्रू
षा स्यादुपासने॥ कथनेपोतुमिच्छायांशैलूषो नटबिल्वयोः॥
॥४५॥ संघर्षस्तुपुमान्घृष्टौस्पर्धायांचप्रभंजने॥ समीक्षा तु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रियांतत्त्वेबुद्धावपिनिभालने॥४६॥ षचतुः॥ अनुक-
र्षोरथाधःस्थदारुण्यप्यवकर्षणे॥अंबरीषं रणेभ्राष्ट्रेक्लीबंपुं
सिनृपांतरे॥४७॥नरकस्यप्रभेदेचकिशोरेभास्करेपिच॥आम्रा
तकेऽनुतापेचानिमिषोमत्स्यदेवयोः॥४८॥अनुतर्षःसुरापा
नपात्रेतृष्णाऽभिलाषयोः॥अहिर्हिडूरुडेशक्रेमयूरेनकुलेपु
मान्॥४९॥अलंबुषःप्रहस्तेचछर्दनेराक्षसांतरे॥ अलंबुषातु
मुंडीर्यांस्वर्गवारांगनांतरे॥५०॥अश्वकिंपुरुषोलोकभेदकिं-
न्नरयोःपुमान्॥देववृक्षः सप्तपर्णेमंदारादिषुगुग्गुलौ॥५१॥
नंदिघोषोऽर्जुनरथेघोषेवंदिजनस्यच॥परिवेषस्तुपुल्लिंगःपरिधौ
रिवेषणे॥५२॥ परिघोषोनिनादेस्यादवाच्येजलदध्वनौ॥ प
लंकषागोक्षुरकेरास्नागुग्गुलुकिंशुके॥५३॥ मुंडीरीलाक्षयो
श्वस्त्रीराक्षसेतुपलंकषः॥वीरवृक्षस्तुभल्लातककुभद्रुमयोः
पुमान्॥५४॥भूतवृक्षस्तुशाखोटद्रुमेशोनाकपादपे॥महा
घोषातुकर्कटशृंग्यांपुंस्यतिघोषणे॥५५॥क्लीबंहट्टेराजवृक्षः
सुवर्णालिपियालयोः॥वातरूषस्तुवातूलोत्कटयोशक्रकार्मु
के॥५६॥विशालाक्षोहरेतास्त्येनासुनेत्रेऽभिधेयवत्॥सक
टाक्षोवराक्षेनाकटाक्षसहितेत्रिषु॥५७॥ इतिषांतवर्गः॥
सद्विः॥ कंसोस्त्रीतैजसद्रव्येकांस्यमानेसुरेतुना॥कासूर्वि
कलवाचिस्यात्तथाशक्त्यायुधेस्त्रियाम्॥१॥गुच्छः स्यात्स्तब
केस्तबेहारभिद्रुंखिपर्णयोः॥गोसोवोलौषसोश्वास दस्युपक्षि
भिदोःपुमान्॥२॥त्रासो भयेमणेर्दोषेदासी वाणाभुजिष्ययोः
॥दासो भृत्येचशूद्रेचज्ञातात्मनिचधीवरे॥३॥नासा तुनासि
कायांचद्वारोर्ध्वदारुणिस्त्रियाम्॥प्रसू रश्वाजनन्योश्वकंद
लीवीरुधोःस्त्रियां४॥वस्क नीदेवभेदाग्निभायोक्रकवकरा-
जसु॥क्लीबेरक्षौषधेऽम्बेचौरेरत्नमधुरेत्रिषु॥५॥भासः पुं
सिप्रभायांस्याद्विशेषविहगस्यच॥ भाःप्रभावेमयूखेस्त्रीमा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्वभ्रमासयोः पुमान् ॥६॥ मांसं स्यादामिषे क्लीबं कक्कोलीजटयोः
स्त्रियाम् ॥ मिसिः स्त्री मधुरा मांस्योः शतपुष्पाजमोदयोः ॥७
॥ मृत्स्ना कास्यांश्रेष्ठमृदि रसो गंधरसे जले ॥ शृंगारादौ विषे वीर्ये
तिक्तादौ द्रवरागयोः ॥८॥ देहधातुप्रभेदे च पारदस्वादयोः पुमान्
॥ स्त्रियां तु रसना पाठा शल्लकी कंगुभूमिषु ॥९॥ रासः कोलाह
ले ध्वाने भाषाशृंखलके पि च ॥ क्रीडाभेदे च गोपानां वत्सः पुत्रा
दिवर्षयोः ॥१०॥ तर्णके नोरसि क्लीबं व्यासो नाविस्तृते मुनौ ॥
शंसा वचसि वांछायां हंसः स्यान्मानसौकसि ॥११॥ निर्लोभनृप
विष्णवर्के परमात्मनि मत्सरे ॥ योगिभेदे मंत्रभेदे शरीरमरुदंत
रे ॥१२॥ तुरंगमभेदे पि हिंसा चौर्यादिघातयोः ॥ सत्रिः ॥ अलसा
॥ हंसपद्यां ना पादरोगद्रुभेदयोः ॥१३॥ क्रियामंदे त्रिष्वथा र्त्विर्म
यूखशिखयोर्न ना ॥ अर्दः परस्मिन्नत्र स्यादभ्यासोऽभ्यसनेंति
के ॥१४॥ आगोऽपराधे पापे स्यादाश्वासः पुंसि निर्वृतौ ॥ आख्या
यिकापरिच्छेदे चाशीर्दं तेमरुद्भुजां ॥१५॥ हितस्याशंसने स्त्री
स्यादिष्वासः कार्मुके पुमान् ॥ त्रिषु स्यात्क्षेपके चेषो रुच्छासः प्रा
णने पि च ॥१६॥ आख्यायिकापरिच्छेदे प्याश्वासे पि पुमानयम्
॥ उत्तंसः कर्णपूरे पि शिखरे पि च न स्त्रियाम् ॥१७॥ उषः प्रसू
षसि क्लीबं पितृप्रस्वां च योषिति ॥ उरो वक्षसि च श्रेष्ठेप्येनः पा
पापराधयोः ॥१८॥ ओजो दीप्तावष्टंभे प्रकाशबलयोरपि ॥
ओकआश्रयमात्रे च मंदिरे च नपुंसकं ॥१९॥ कीकसः कृमिजा
तौ स्यात्पुंसि कुल्ये नपुंसकं ॥ चमसो यज्ञपात्रस्य भेदे स्त्रीपि
ष्टके स्त्रियां ॥२०॥ छंदः पद्ये च वेदे च स्वैराचाराभिलाषयोः ॥ ज्या
योवृद्धेतिप्रशस्ते ज्योतिरग्नौ दिवाकरे ॥२१॥ पुमान्नपुंसकं
दृष्टौ स्यान्नक्षत्रप्रकाशयोः ॥ तरो बले च रोगे च तपो लोकांतरे
पि च ॥२२॥ चांद्रायणादौ धर्मे च पुमान् शिशिरमाघयोः ॥ तमो
ध्वांते गुणे शोके क्लीबं ना ला विधुंतुदे ॥२३॥ तामसी निशि दु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गोयांतामसोभुजगेखले॥तेजो दीप्तौप्रभावेचस्यात्सराक्रमरेत
सोः॥२४॥धनुः पियालेनानस्त्रीराशिभेदेशरासने॥धनुर्धरेत्रिषु
नभः क्लीबंव्योम्निपुमान्घने॥२५॥ घ्राणश्रावण वर्षासुबिसतंतौप
तद्ग्रहे॥पनसः कंटकिफलेकंटकेवानरांतरे॥२६॥स्त्रियांरोग
प्रभेदेस्यात्पयः स्यात्क्षीरनीरयोः॥पायस स्तुक्लीबपुंसोः श्रीवा
सपरमान्नयोः॥२७॥पुक्कसी कलिकानील्योः पुक्कसः श्वपचे
ऽधमे॥ बीभत्सो नार्जुनेक्रूरघृणात्मविकृतेत्रिषु॥२८॥भूयां
स्त्रिषुबहुतरेपुनरर्थेत्वदोऽव्ययं॥मन स्त्वितेमनीषायांमह
उत्सवतेजसोः॥२९॥मानसंसरसिस्वांतेरभसो हर्षवेगयोः॥
रह स्तत्वेरतेगुह्येरजः क्लीबंगुणांतरे॥३०॥आतर्वेचपरागेच
रेणुमात्रेचदृश्यते॥राक्षसोयातुधानेस्याच्चंडायांराक्षसीस्मृता
॥३१॥रेपाः स्यादधमेक्रूरेकृपणेप्यभिधेयवत्॥रेतः शुक्रेपार
देचरोदश्चरोदसीतिच॥३२॥दिविभूमौपृथक्स्यात्सहोस्त्र्य
प्येतयोस्तथा॥लालसौत्सुक्यतृष्णातिरेकयाञ्चासुचद्वयोः॥
॥३३॥वयः पक्षिणिबाल्यादौयौवनेचनपुंसकं॥वर्चो नपुंसकं
रूपेविष्ठायामपितेजसि॥३४॥पुंसिचंद्रस्यतनयेबर्हिः पुंसिहुता
शने॥नस्त्रीकुशवपुःक्लीबंतनौशस्ताकृतावपि॥३५॥ वतंस
स्तुपुमान्कर्णपूरशेखरयोरपि॥ वाहसोजलनिर्याणेशयालौसुनि
षण्णके॥३६॥वायसोगुरुवृक्षेचश्रीवासध्वांक्षयोःपुमान्॥का
कोदुंबरिकायांचकाकमाच्योचवायसी॥३७॥ विहायनात्मविदि
माङ्गेपंडितेचाभिधेयवत्॥विलासोहावभेदेस्याल्लीलायामपिपुं
स्ययं॥३८॥वितंसो बंधनोपायेमृगाणांपक्षिणामपि॥ तेषाम
पिचविश्वासहेतोःप्रावरणेपिच॥३९॥ वेधाःपुंसिहृषीकेशेबुधे
चपरमेष्ठिनि॥शिरः प्रधानेसेनाग्रेशिखरेमस्तकेपिच॥४०॥श्री
वासोवृकधूपेपिपंकजेमधुसूदने॥ श्रेयो मुक्तौशुभेधर्मेत्रिषु
शस्तेचवाच्यवत्॥४१॥श्रेयसीकरिपिप्पल्यामभयापाठयोरपि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सहो बलेज्योतिषिचपुंसिहेमंतमार्गयोः ॥४२॥ सरसी विम्बका
सारेसरो नीरतडागयोः ॥ स्यात्समास स्तुपुल्लिंगः संक्षेपेचसम
र्थने ॥४३॥ सारसः पक्षिभेदेंद्वोः क्लीबंतुसरसीरुहे ॥ साहसं तुब
लात्कारकृतकार्येदमेपिच ॥४४॥ सुरस स्तत्रिषुस्वादौपर्णाशे
तुनपुंसके ॥ स्त्रीरास्नानागमात्रोश्च स्रोतो ऽम्बुवेगइंद्रिये ॥४५॥ ह
विर्हौतव्यमात्रेचसर्पिष्यपिनपुंसके ॥ सचतुः ॥ अधिवासोनि
वासेस्यात्संस्कारेधूपनादिभिः ॥४६॥ अवध्वंसः परित्यागेनिंदने
प्यवचूर्णने ॥ अवतंसोनस्त्रियांस्यात्कर्णपूरेचशेखरे ॥४७॥ अ
गौकाः पुंसिशरभेपक्षिपंचास्ययोरपि ॥ उदर्चिरुस्मभेवाच्यलिंगः
पुंसिहुताशने ॥४८॥ कलहंसस्तुकादंबेराजहंसेनृपोत्तमे ॥ कनी
यानतियूनिस्यादत्यल्पानुजयोस्त्रिषु ॥४९॥ कुंभीनसः क्रूरस
र्पेस्त्रियांलवणमातरि ॥ भवेद्घनरसः सांद्रेनिर्यासेमोरटेंबुनि ॥
॥५०॥ कर्पूरेपीलुपर्ण्यांचसम्यक्सिद्धरसेपिच ॥ चंद्रहासोदश
ग्रीवकरवालेः सिमात्रके ॥५१॥ जटायुः पुंसिसंपातेः कनीयसि
चगुग्गुलौ ॥ अथतामरसंपद्मेताम्रकांचनयोरपि ॥५२॥ त्रिस्रो
ताजन्हुकन्यायांस्रोतस्वत्यंतरेस्त्रियां ॥ दिवोकाश्च दिवौकाश्च
पुंसिदेवेचचातके ॥५३॥ दीर्घायुः शाल्मलीवृक्षेवायसेजीवकद्रु
मे ॥ मार्कंडेयेचपुंसिस्याच्चिरजीविनिवाच्यवत् ॥५४॥ नगौकाः
पुंसिशरभेपक्षिपंचास्ययोरपि ॥ निःश्रेयसंतुकल्याणमोक्षयोः
शंकरेपुमान् ॥५५॥ नीलांजसाप्सरोभेदेसरिद्भेदेचविद्युति ॥ प्र
चेताः पाशिनिमुनौनाप्रकृष्टहृदित्रिषु ॥५६॥ पुनर्वसुर्नामुनिभि
द्यजेह्निवेतुभांतरे ॥ पौर्णमासः पुमान्यज्ञभेदेस्त्रीपूर्णिमातिथौ
॥५७॥ मद्गारसः स्यात्खर्जूरेकोशकारकशेरुणोः ॥ मलीमसस्तु
मलिनेपुष्पकाशीसलोहयोः ॥५८॥ भवेन्मधुरसाद्राक्षामूर्विका
दुग्धिकासुच ॥ यमस्वसातुदुर्गायांयमुनायामपिस्त्रियां ॥५९॥
यवीयाननुजेपिस्यादतियूनिचवाच्यवत् ॥ रासेरसस्तुगोष्ठ्यां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्याद्रसाश्रृंगारयोरपि॥६०॥रससिद्धिरसावासषष्ठीनागरकेपि
च॥राजहंसस्तुकादंबेकलहंसेनृपोत्तमे॥६१॥वरीयान्योग
भिद्भेदवरिष्ठेष्वतियूनिच॥विहायाः शकुनेपुंसिगगनेपुन्नपुं
सकं॥६२॥विभावसुःपुमान्सूर्येहारभेदेचपावके॥श्वःश्रेय
संचकल्याणेपरमात्मनिशर्मणि॥६३॥अथसर्जरसोवाद्यभां
डभेदेचधूणके॥समार्चिः पावकेपुंसिक्रूरचक्षुषिचत्रिषु॥६४
साधीयानतिवाढेस्यादतिसाधौचवाच्यवत्॥सिंदूरसोरसेपुं
सिधातुप्रभृतिषुत्रिषु॥६५॥सुमनाःपुष्पमालत्योःस्त्रियांनाधी
रदेवयोः॥सुमेधास्तुस्त्रियांज्योतिष्मत्यांत्रिषुसुबुद्धिनि॥६६॥सर्पे
च॥दिव्यचक्षुःसुगंधस्यभेदेनांधेसुलोचने॥स्यान्नभस्वमसश्वं
द्रेचित्रापूपेंद्रजालयोः॥६७॥हिंगुनिर्यासइत्येषनिंबेहिंगुरसेपिच
॥सषट्॥हिरण्यरेताःपुंसिस्याद्दिवाकरहविर्भुजोः॥६८॥इति
सांतवर्गः॥हैकम्॥हःशिवेसलिलेशून्येधारणेमंगलेपिच॥
गगनेनकुलीशेचरक्तेनाकेचवर्ण्यते॥१॥ह्द्वि:॥अहिर्वृत्रासुरेस
र्पेपुंसीहोद्यमवांछयोः॥कुहूःस्त्रीकोकिलालापेनष्टेंदुकलदर्शयोः
॥२॥ग्रहोनुग्रहनिर्बंधग्रहणेषुरणोद्यमे॥सूर्यादौपूतनादौचसैंहिकेयोपरा
गयोः॥३॥ग्राहोग्रहेऽवहारेचगुहःषाण्मातुरेगुहा॥सिंहपुच्छ्यां
चगर्तेचपर्वतादेश्चगह्वरे॥४॥गृहंगृहाश्चपुंभूम्निकलत्रेपिचस
द्मनि॥नाहस्तुबंधनेकूटेप्रोहोगजांघ्रिपर्वणोः॥५॥वाच्यवन्नि
पुणेतर्केबर्हं पिच्छेदलेस्त्रियां॥बहुस्याद्व्यादिसंख्यासुविपु
लेप्यभिधेयवत्॥६॥महीनद्यंतरेभूम्नामहउत्सवतेजसोः॥अ
थमोहोन्यलिंगस्यादविद्यायांचमूर्छने॥७॥लोहोऽस्त्रीशस्त्र
केलोहेजोंगकेसर्वतैजसे॥वहःस्याद्वृषभस्कंधेवाहेगंधवहेपिच
८ वाहोभुजेपुमान्मानभेदाश्ववृषवायुषु॥व्रीहिःसामान्यधा
न्येस्यादाशुधान्येतुपुंस्ययं॥९॥व्यूहःस्याद्बलविन्यासेनिर्मा
णेवृंदतर्कयोः॥सन्नाहोबलेनस्त्रियांस्यात्स्त्रियांतुनखभेषजे १०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दंडोत्पलासुद्गपर्णीकुमारीपृथिवीषु च॥ सिंहः कंठीरवे राशौ सत्त
मे चोत्तरस्थितः॥११॥ सिंही तु कंटकार्यां स्याद्वार्ताकीवासकेपि
च॥ स्नेहः स्यात्तु सितैलादिरसद्रव्ये च सौहृदे॥१२॥ हत्रिः॥ अ
स्यूहो नीलिकायां स्त्री कालकंठखगे पुमान्॥ आग्रहोनुग्रहा
सक्त्योराक्रमे ग्रहणेपि च॥१३॥ आरोहस्त्ववरोहे च वरारोहा
कटावपि॥ आरोहणे गजारोहे दीर्घत्वे च समुच्छ्रये॥१४॥ उत्सा
हस्तूद्यमे सूत्रे कटाहः कूर्मकर्परे॥ द्वीपस्य च प्रभेदे स्यात्तैलादेः
पाकभाजने॥१५॥ जायमानविषाणाग्रमहिषीशावकेपि च॥ क
लहं युद्धकाले ना खड्गकोशे च मंडने॥१६॥ दात्यूहस्तु पुमान्
कालकंठचातकपक्षिणोः॥ निग्रहो भर्त्सनेपि स्यान्मर्यादायां
च बंधने॥१७॥ निर्व्यूहः शिखरे द्वारे निर्यासे नागदंतिके॥ निरू
ढो वस्तिभेदे स्यादूहशून्ये च निश्चिते॥१८॥ प्रग्राहस्तु तुलसू
त्रे वृषादिप्रग्रहेपि च॥ पटहो नासमारंभे आनके पुन्नपुंसकं
॥१९॥ प्रवहस्तु बहिर्यात्रामातरिश्वप्रभेदयोः॥ प्रग्रहस्तु
तुलासूत्रे बंद्यां नियमने भुजे॥२०॥ हयादिरश्मौ रश्मौ च सुवर्णा
लु महीरुहे॥ प्रवाहस्तु प्रवृत्तौ स्यादपि स्रोतसि वारिणः॥२१॥ व
राहः सूकरे विष्णौ मानभेदेऽद्रिमुस्तयोः॥ वाराही मातृभेदे स्याद्वि
ष्वक्सेनप्रियौषधौ॥२२॥ राजार्हं जोंगके कुंबे राजयोग्येऽभिधे
यवत्॥ विग्रहः कायविस्तारे विभागे तारणे स्त्रियां॥२३॥ विदे
हः कायशून्ये स्याज्जनकान्वयभूमिपे॥ वैदेही रोचना सीता वणि
क्स्त्री पिप्पलीषु च॥२४॥ संग्रहो बृहदुद्रंगे ग्रहसंक्षेपयोरपि॥
सुवहा शल्लकैलापर्णीगोधापदीषु वीणायाम्॥२५॥ रास्ना
शेफालिकयोः स्त्री सुखवाह्येऽन्यलिंग स्यात्॥ हचतुः॥ अव
ग्रहो वृष्टिरोधे प्रतिबंधे गजालिके॥२६॥ अभिग्रहोऽभिग्रहणे
ऽभियोगेपि च गौरवे॥ अवरोहोवतरणेप्यारोहे च लतोद्गमे॥
२७॥ अश्वारोहाश्वगंधायां स्त्रियां त्रिष्वश्ववाहके॥ उपनाहो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्रणालेपपिंडेवीणानिबंधने॥२८॥उपग्रहः पुमान्बंद्यामुप
योगेनुकूलने॥स्याद्गंधवाहो नासायां पुल्लिंगो मातरिश्वनि॥
॥२९॥तनूरुहं तु लोम्निस्यात्पतत्रे च नपुंसकं॥तमोपहः सहस्रांशुमृगांकाजिनवन्हिषु॥३०॥ प्रतिग्रहः स्वीकरणे सैन्यपृष्ठेपतद्ग्रहे॥द्विजेभ्यो विधिवद्देयेतद्ग्रहे च ग्रहांतरे॥३१॥परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः॥शापेपरिबर्हो राजयोग्य
द्रव्यपरिछदे॥३२॥परीवाहो जलोच्छ्वासे महीभृद्योग्यवस्तुनि॥पितामहो विरिंचौस्यात्तातस्य जनकेपि च॥३३॥महासहा
माषपर्ण्याममम्लाने पि च योषिति॥ इपंच॥ प्रपितामह इत्येवं
वेधोपितृपितामहे॥३४॥इति हांतवर्गः॥ अथाव्ययानिव
क्ष्यंते व्यक्तं पूर्वोदितैः क्रमैः॥अकाराद्यं ततोचास्मिंस्तस्मादप्य
तिरिच्यते॥१॥ अशब्दः स्यादभावे पि स्वल्पार्थे प्रतिषेधयोः॥अ
नुकंपायां च तथा वासुदेवे त्वनव्ययः॥२॥ आः प्रगृह्यं स्मृतौ वा
क्येनुकंपायां समुच्चये॥इभेदे चरुषोक्तौ चापाकरणानुकंपयोः
॥३॥ईविषादेनुकंपायां लक्ष्म्यां पुनरनव्ययं॥उसंबोधनरोषोक्त्यो
रनुकंपानियोगयोः॥४॥पदपूरणे च पादपूरणेपि च दृश्यते॥ऊ
वाक्यारंभरक्षानुकंपास्वपि च दृश्यते॥५॥ ऋशब्दो मर्दणे वा
क्येदेवमातापां त्वनव्ययं॥ ॠ वाक्यारंभरक्षायां वक्षः स्मृत्यो
रनव्ययं॥६॥ देवमातायां दनौ चापि भैरवे दनुजे मतौ॥ ऌकारो दे
वमातायां भुवि क्रुध्रे च कीर्तितः॥७॥ ॡकारो दानवा स्याच्चाय
त्यन्यपि मातरि॥ एस्मृतावप्यसूयानुकंपामंत्रिणइतिषु॥८॥
ऐशब्दो दृश्यते दूतौ स्मृत्यामंत्रणयोरपि॥ओसंबोधन आव्हा
नेस्मरणे चानुकंपने॥९॥ औशब्दः कथितो दूतौ तथा संबोधने
पिच॥स्त्रीतु विश्वंभरायां स्यात्पुमांस्तु निस्वनेस्मृतः॥१०॥ कंवं
॥कुपापेचेषदर्थे च कुत्सायां च निवारणे॥ कद्विः॥ धिग्भर्त्स
नेच निंदायां॥ कत्रिः॥ मनागप्यल्पमंदयोः॥११॥ द्रिरुक्श

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्दोभिनार्थेचमध्यार्थेपिचदृश्यते॥गद्विः॥अङ्गसंबोधनेहर्षेसं
गमासूययोरपि॥१२॥ङद्विः॥आङ्सीमायामभिव्याप्तौक्रिया
योगेषदर्थयोः॥चैकं॥चान्वाचयेसमाहारेप्यन्योन्यार्थेसमुच्च
ये॥१३॥पक्षांतरेतथापादपूरणेप्यवधारणे॥चद्विः॥किंचारं
भेचसाकल्येप्राक्पूर्वस्मिन्नवांतरे॥१४॥अग्रेप्रभातेतीतेचदेशे
दिक्कालयोरपि॥चत्रिः॥तिर्यक्तिरोर्थेवक्रेचविहंगादौत्व
गव्ययं॥१५॥ननुचप्रश्नदुष्टोक्त्योःसम्यक्दृढप्रशंसयोः॥ञ
द्विः॥नञ्भावेनिषेधेचस्वरूपार्थेप्यतिक्रमे॥१६॥ईषदर्थेचसा
दृश्येतद्विरुद्धतदन्ययोः॥ठद्विः॥सुष्ठुप्रशंसनेपिस्यादत्यर्थे
चनिगद्यते॥१७॥ठत्रिः॥अपष्ठुनिरवद्येचशोभनार्थेचदृश्यते
॥णचतुः॥अंतरेणपदंविद्याद्विनामध्यार्थयोरपि॥१८॥तैकं
तुपादपूरणेभेदेसमुच्चयेवधारणे॥पक्षांतरेनियोगेचप्रशंसायां
विनिग्रहे॥१९॥तद्विः॥अतिशब्दःप्रशंसायांप्रकर्षेलंघनेपि
च॥नितांतासंप्रतिक्षेपवाचकोप्येषदर्शितः॥२०॥अस्तुस्या
दभ्यनुज्ञानेप्यसूयापीडयोरपि॥प्रतिक्षेपेप्रशंसायांप्रकर्षेल
क्षणेपिच॥२१॥असंप्रत्यर्थउद्दिष्टमितिहेतौप्रकाशने॥निदर्श
नेप्रकारेस्यात्परलुत्यनुकर्षयोः॥२२॥समाप्तौचप्रकरणेप्युता
प्यर्थविकल्पयोः॥समुच्चयेवितर्केनप्रश्नेचपदपूरणे॥२३॥
उत्स्यात्प्रश्नेवितर्केचचेत्कृत्सितप्रशंसयोः॥पक्षांतरेप्यसाक
ल्पेजातुशब्देविगर्हणे॥२४॥कदाचिदर्थेपितथान्येविक
ल्पनिषेधयोः॥प्रतिप्रतिनिधावित्थंभूताख्यानाभिमुख्ययोः
॥२५॥मात्रार्थभागवीप्सासुलक्षणप्रतिदानयोः॥बतामंत्रण
संतोषखेदानुक्रोशविस्मये॥२६॥स्वस्तिस्यान्मंगलेपुण्येप्र
शंसायामपिक्वचित्॥स्वित्प्रश्नेचवितर्केचतथैवपदपूरणे॥२७
हंतवाक्यारंभखेदविषादहर्षसंभ्रमे॥तत्रिः॥आराद्दूरेसमी
पेचकच्चित्कामप्रवेदने॥२८॥प्रश्नेहर्षेमंगलेचकिमुतप्रश्नवि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तर्कयोः॥विकल्पेतिशयेपिस्यात्तावन्मानेवधारणे॥२९॥ संभ्र
मेचपरिच्छेदेतथाकार्त्स्न्याधिकारयोः॥पश्यतस्यात्प्रशंसायांवि
स्मयेचनिगद्यते॥३०॥पश्चात्प्रतीच्यांपरमेप्यधिकारेपिदृश्य
ते॥ यद्वत्प्रश्नेवितर्केचयावत्कार्त्स्न्येवधारणे॥३१॥प्रशंसा
यांपरिच्छेदेमानाधिकारसंभ्रमे॥पक्षांतरेचशब्दस्यादात्मप्रश्नेच
मंगले३२ पुराकल्पेसदार्थेचपुनरर्थेचदृश्यते॥प्रकृतसंदेहकारेस्या
त्समाक्षात्प्रत्यक्षतुल्ययोः॥३३॥ तचनुः॥अहोबतानुकंपायां
खेदेसंबोधनेपिच॥ पुरस्तात्प्रथमेप्राच्यामग्रतोर्थपुरार्थयोः
॥३४॥ थद्विः॥अथाथोसंशयेस्यातामधिकारेचमंगले॥वि
कल्पानंतरप्रश्नकार्त्स्न्यारंभसमुच्चये॥३५॥तथाभ्युपगमेपृष्ठ
प्रतिवाक्येसमुच्चये॥सदृशेनिश्चयेपिस्याद्यथातुल्यार्थभान
योः॥३६॥प्रशंसायांवृथावंध्येनिष्कारणे॥थत्रिः॥स्यादथोपुनः
वितथेचापरार्थेचसर्वथाहेतुवादयोः॥३७॥ दद्विः॥ उत्प्रका
शेविभागेचप्राबल्याभ्यासस्वास्थ्यशक्तिषु॥ प्राधान्येबंधनेभावेमो
क्षेलाभोर्द्धकर्मणोः॥३८॥ यत्नुगर्हाहेत्वधृत्योर्यदिगर्हावि
कल्पयोः॥ धद्विः॥अधिस्यादधिकारेचाप्यभ्येचनिगद्यते
॥३९॥ नैकम्॥ नस्यान्निषेधोपमयोर्निनिवेशाभृशार्थयोः
निल्यार्थेसंशयक्षेपकौशलोपरमेसुच॥४०॥सामीप्याश्रयदा
नेषुमोक्षांतर्भावबंधने॥राशयोभावविन्यासेनुवितर्कोपमा
नयोः॥४१॥विकल्पानुनयातीतेप्रश्नहेत्वपदेशयोः॥ नद्विः॥
अनुहीनेसहार्थेचपश्चात्सादृश्ययोरपि॥४२॥लक्षणेत्थंभूता
ख्यानभागवीप्सास्वनुक्रमे॥आयामेचसमीपेचकिंनुप्रश्न
वितर्कयोः॥४३॥ चनविस्मयेसाकल्येननुशब्दोविनिग्रहे॥अ
नुप्रश्नेपरकृतावधिकारेचसंभ्रमे॥४४॥ आमंत्रणेप्यनुनयेप्र
श्नानुज्ञावधारणे॥नानाशब्दोविनार्थेपितथानेकोभयार्थयोः॥
॥४५॥स्थानेतुकरणार्थेस्याद्युक्तसादृश्ययोरपि॥पद्विः॥अप

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यादपकृष्टार्थवर्जनार्थवियोगयोः॥ ४६॥ विपर्ययेचविकृतौ चौ
र्ये निर्देशहर्षयोः॥अपि संभावनाप्रश्नशंकागर्हासमुच्चये॥४७
तथा युक्तपदार्थेपिकामकारक्रियासु च॥ उपस्यादधिकार्थेच
हीनार्थासन्नयोरपि॥ ४८॥ भद्रि:॥अभीष्टंभूतकथनेचाभि
मुख्याभिलावयोः॥ मैके॥ मावारणेविकल्पेचस्मातीतेपादपूर
णे॥४९॥स्यान्मंगलेपरकृता ॥मद्रिः॥ वमोतिकसहार्थयोः॥
आम् ज्ञाननिश्चयेस्मृत्यो कम् रोषेंगीकृतावपि ५०॥ प्रश्नेपिस्या
दुम् रुषोक्तौपृच्छायामोमुपक्रमे॥प्रणवेचाप्युपगमेचापाकृतौ
चमंगले॥ ५१॥ कम् पादपूरणेतोयेमस्तकेचसुखेपिच॥किम्
कुत्सायांवितर्केचनिषेधप्रश्नयोरपि॥५२॥ किमुसंभावनायां
स्यात् विमर्शेचापिदृश्यते॥नामकोपेभ्युपगमेविस्मयेस्मरणे
पिच॥५३॥संभाव्यकुत्साप्राकाश्यविकल्पेपिचदृश्यते॥शम्
कल्याणेसुखे सम् तुशोभनार्थसमर्थयोः॥५४॥संगार्थेचप्र
हृष्टार्थेसामि निंदार्धयोर्मतं॥ हुम् रुषोक्तावनुनयेहुम् स्मृता
वप्यपाकृतौ॥५५॥अथ प्रश्नेभ्यनुज्ञायांहूम् स्यात्प्रश्नवि
तर्कयोः॥ मत्रिः॥अलम् भूषणपर्याप्तिवारणेषुनिरर्थके॥५६
शक्तावेवम् प्रकारेस्यादंगीकारेवधारणे॥अथप्रश्नेपरकृताव
पमापृच्छयोरपि॥५७॥कथम् हर्षेचगर्हायांप्रकारार्थेचसंभ्र
मे॥प्रश्नेसंभावनायांचकामम् चानुमतौस्मृतं॥ ५८॥प्रकाशे
चाप्यसूयायांतथानुगमनेपिच॥ जोषम् सुखेप्रशंसायांतूष्णीं
लंघनयोरपि॥५९॥ नूनम् तुनिश्चितेतर्केस्मरणेवाक्यपूरणे॥
परम् नियोगेक्षेपेचप्राध्वम् नर्मानुकूलयोः॥६०॥ सत्यम् प्र
श्नेभ्युपगमे॥मचतुः॥ अवश्यम् निश्चयप्रयत्नयोः॥अभी
क्ष्णम् मुहुरश्रांतेशीघ्रप्रकर्षयोरपि॥ ६०॥ इदानीम् वाक्यभू
षायांसंप्रत्यर्थेचदृश्यते॥तद्दिनम् दिनमध्येस्यात्तथैवप्रतिवा
सरे॥६२॥सांप्रतंचाधुनार्थेस्यादुचितार्थेचदृश्यते॥ यद्रिः॥अ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यिप्रश्नानुनय योस्तथासंबोधनेपिच॥६३॥अ ये क्रोधविषा
देचसंभ्रमेस्मरणेपिच॥दिष्ट्याहर्षेमंगलेचपश्यशब्दस्तुविस्म
ये॥६४॥प्रशंसायामपितथा॥ यत्रिः॥ समयांतिकमध्ययोः॥
रेकम्॥ प्रप्रकर्षेगताद्यर्थे ॥रद्विः॥प्य रेप्राकृत्यसूयायोः॥६५
उपूरीचाप्युभौशब्दोविस्तारेंगीकृतावपि॥दुर्निषेधेचदुष्टेचनि
र्निर्णयनिषेधयोः॥६६॥परिस्यात्सर्वतोभावेवर्जनेव्याधिरोप
योः॥इत्थंभूताख्यानभागवीप्सालिंगनलक्षणे॥६७॥ दोषाख्या
नेनिरसनेपूजाव्याप्त्योश्चभूषणे॥पराविमोक्षप्राधान्यप्रातिलोम्ये
षुधर्षणे॥६८॥आभिमुख्येभृशार्थेचविक्रमेन्वगतौपधे॥पुरापु
राणेनिकटेप्रबंधातीतभाविषु॥६९॥स्वःप्रेत्यव्योम्निनाकेचा॥र
त्रिः॥प्यंतःस्वीकारमध्ययोः॥ अंतरापिविनार्थेस्यान्मध्यार्थे
निकटार्थयोः॥७०॥उररुरुरूररीचविस्तारेंगीकृतौत्रयं॥न
किर्निषेधोपमयोःप्रादुःप्राकाश्यदृश्यते॥७१॥ संभाव्येचप्रवृत्तौ॰
चपुनरप्रथमेमतम्॥अधिकारेचभेदेचतथापक्षांतरेपिच॥७२॥
लद्विः॥किलशब्दस्तुवार्तायांसंभाव्यानुशयार्थयोः॥ खलु॰
स्याद्वाक्यभूषायांजिज्ञासायांचसांत्वने॥७३॥ वीप्सामाननिषे
धेषुपूरणेपदवाक्ययोः॥ वैकम्॥ वास्याद्विकल्पोपमयोर्वित
र्केपादपूरणे॥७४॥समुच्चयेचविश्रंभेनानार्थातीतयोरपि॥वि
निग्रहेनियोगेचतथैवपदपूरणे॥७५॥निश्चयेसहनेहेतावव्याप्ति
विनियोगयोः॥दृपदर्थेपरिभवेप्युद्धावलंबनेपिच॥७६॥ विज्ञाने
वद्विः॥ थैवचोपम्येनियोगेवाक्यपूरणे॥ अवधारणेचचारनि
योगेचविनिग्रहे॥७७॥ षद्विः॥उषारात्रौतदंतेचदोषारात्रौच
तन्मुखे॥मंक्षुशीघ्रेभृशार्थेच॥षत्रिः॥निकषांतिकमध्ययोः॥
७८॥सैकम्॥स पूजायांभृशार्थानुमतिकृच्छ्रसमृद्धिषु॥सद्विः
भास्स्मरणे॥पाकरणेकोपसंतापयोरपि॥७९॥ ईदुःखभावनेको
पेनिर्निबंधेचनिश्चये॥साकल्यातीतयोर्भोस्तुसंबोधनविषादयोः

For Private and Personal Use Only

॥८०॥ सत्रिः॥ अंजसाशब्द आख्यातस्तत्वतूर्णार्थयोरपि॥
तिरोंऽतर्द्धौतिर्यगर्थे नीचैःस्वैराल्पयोर्मतं॥८१॥ पुरोऽग्रेप्रथ
मेभूयोऽधिकारेचपुनःपुनः॥ मिथोऽन्योन्येरहोर्थेचशनैःस्वैरेश
नैश्चरे॥८२॥ सचतुः॥ अभितःशीघ्रमाकल्पसमुखोभयतोंऽ
तिके॥ अग्रतःप्रथमेचाग्रे पुरतःप्रथमाग्रयोः॥८३॥ पूर्वेद्युःप्रा
तःकालेस्यात्तथैवगतवासरे॥ हैकम्॥ हस्यात्संबोधनेपादपू
रणे चविनिग्रहे ८४ नियोगेक्षिपायांस्यात्कुत्सायामपितृस्य ते
हाविषादेऽशोकेचकुत्सादुःखार्थयोरपि॥८५॥ हिपादपूरणे हे
तौविशेषेत्ववधारणे॥ प्रश्नहेत्वपदेशेचसंभ्रमासूययोरपि॥८६
हीदुःखहेत्वाख्यानाविषादेविस्मयेपिच॥ हेसंबोधनआह्वाने
प्यसूयादेचदृश्यते॥८७॥ हैसंबोधनआह्वाने हो हो शब्दौतथै
तयोः॥ द्वि॥ अहप्रशंसाक्षिपयोर्नियोगेचविनिग्रहे॥८८॥ अहो
धिगर्थेशोकेचकरुणार्थविषादयोः॥ संबोधनेप्रशंसायांविस्मयेप
दपूरणे॥८९॥ असूयायांवितर्केस्यादाहक्षेपनियोगयोः॥ आहोप्र
श्नेविचारेचसहसाकस्यदृश्यते॥९०॥ विद्यमानेचसादृश्येयौगपद्यसमृ
द्धिषु॥ संबंधेचतथाह्रीह्रीशब्दोविस्मयहास्ययोः ९१ हहेसंबोधनेहू
तौहोहोशब्दस्तथैतयोः॥ हत्रिः॥ अहहेत्यद्भुतेखेदेपरिक्लेशप्रकर्षयोः
९२॥ संबोधनेऽपिचोताहोपरिप्रश्नविचारयोः॥ इतिव्ययानेकार्थवर्गः
॥उत्पलिनीशब्दार्णवसंसारावर्तनाममालाख्यान्॥भागुरिवररुचिशाश्व
तवोपालितरंतिदेवहरकोषान् १ अमरशुभांकहलायुधगोवर्धनरभस
पालकृतकोषान्॥रुद्रामरदत्ताजयगंगाधरधरणिकोषांश्च २ हारावल्य
भिधानंत्रिकांडशेषंचरत्नमालांच॥ अपिबहुदोषंविश्वप्रकाशकोषंच
सुविचार्य ३ वाग्भटमाधववाचस्पतिधर्मव्याडितारपालाख्यान्॥ अपि
विश्वरूपविक्रमादित्यनामलिंगानिसुविचार्य॥४॥ कात्यायनवामनचं
द्रगोभिरचितानिलिंगशास्त्राणि पाणिनिपदानुशासनपुराणकाव्या
दिकंचसुनिरूप्य ५ पट्टशनगाथाकोशप्रणयनविख्यातकौशलेनायं मे
दिनिकरेणकोशःप्राणकरसूनुनारचितः ६ इतिमेदिनीकृतानेकार्थकोशः स०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीगणेशायनमः॥अथएकाक्षरकोशःप्रारभ्यते॥अकारोवासु
देवःस्यादाकारस्तुपितामहः॥पूजायामपिमांगल्येआकारःपरि
कीर्तितः॥१॥इकारउच्यतेकामोलक्ष्मीरीकारउच्यते॥उकारःशं
करःप्रोक्तऊकारश्चापिलक्षणे॥२॥रक्षणेचापिउकारउकारोब्र
ह्मणिस्मृतः॥ऋकारोदेवमातास्यात्ॠकारोदनुजप्रसूः॥३॥
ऌकारोदेवजातीनांमातासद्भिःप्रकीर्तिता॥ॡकारःस्मर्यतेपूर्वैर्जे
ननीशब्दकोविदैः॥४॥एकारउच्यतेविष्णुरैकारःस्यान्महेश्व
रः॥ओकारस्तुभवेद्ब्रह्मा औकारोऽनंतउच्यते॥५॥अंस्याच्चप
रंब्रह्मअःस्याच्चैवमहेश्वरः॥कःप्रजापतिरुद्दिष्टःकोर्कवाय्वन
लेषुच॥६॥कश्चात्मनिमयूरेचकःप्रकाशउदाहृतः॥कंशिरोज
लमाख्यातंकंसुखंचप्रकीर्तितं॥७॥पृथिव्यांकुःसमाख्यातः
कुःशब्देपिप्रकीर्तितः॥खमिंद्रियेखमाकाशेखःस्वर्गेपिप्रकीर्ति
तः॥८॥सामान्येचतथाशून्येखशब्दःपरिकीर्तितः॥गोगणेशः
समुद्दिष्टोगंधर्वोगःप्रकीर्तितः॥९॥गंगीतंगाचगाथास्यात्गौ
चधेनुःसरस्वती॥घाघंटाथसमाख्याताघोघनश्चप्रकीर्तितः॥
॥१०॥घंटीशब्देननेघर्मेघुर्घोणाघूर्घनावपि॥ङकारोभैरवः
ख्यातोङकारोविषयस्पृहा॥११॥चश्चंद्रमाःसमाख्यातोभास्क
रेतस्करेमतः॥निर्मलंछंसमाख्यातंतरलेछःप्रकीर्तितः॥१२॥छे
दकेछःसमाख्यातोविद्वद्भिःशब्दकोविदैः॥जकारोगायनेप्रोक्तो
जयनेजःप्रकीर्तितः॥१३॥जेताजश्चप्रकथितःसूरिभिःशब्द
शासने॥झोझंकारकथितोनष्टेझश्चोच्यतेबुधैः॥१४॥झकारश्च
तथावायौनेपथ्येसमुदाहृतः॥ञकारोगायनेप्रोक्तोञकारोझर्झ
रध्वनौ॥१५॥टोधरित्र्यांचकरकेटोध्वनौचप्रकीर्तितः॥ठकारो
जनतायांस्यात्ठोध्वनौचशठेपिच॥१६॥ठोमहेशःसमाख्यातो
ठश्चशून्येप्रकीर्तितः॥वृहद्ध्वनौचठःप्रोक्तस्तथाचंद्रस्यमंडले॥
१७॥डकारःशंकरेत्रासेध्वनौभीमेनिरुच्यते॥ढकारःकीर्तिता

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ढक्का निर्गुणे निर्धने मतः॥१८॥णकारः सूकरे ज्ञाने निश्चये निर्णयेपि च॥
तकारः कीर्तितश्चौरे क्रोडपुच्छे प्रकीर्तितः॥१९॥शिलोच्चये थकारः स्याथ्य
कारेन यरक्षणे॥दकारो भेत्र कलत्रे च छेदे दाने च दातरि॥२०॥धं धने सधने
धः स्यात्तद्धि धातरि मनावपि॥ धिषणा धीः समाख्याता धूश्चैव भारवितयोः
२१॥नेता नश्च समाख्यातस्तरणौ नः प्रकीर्तितः॥नकारः सौगते बुद्धौ स्तुतौ
वृक्षे प्रकीर्तितः॥२२॥नशब्दः स्यागते वं धौ वृक्षे सूर्ये च कीर्तितः॥पः कुबेरः स
माख्यातः पश्चिमे च प्रकीर्तितः॥२३॥पवने पः समाख्यातः पस्यात्पाने च पा
तरि॥ फः स्यातेफकारः स्यात्तथा झाने प्रकीर्तितः॥२४॥फूत्कारेपि च फः
प्रोक्तस्तथा निष्फलभाषणे॥बकारो वरुणः प्रोक्तः कलशे वः फलेपि च॥
वक्षस्थले च नः प्रोक्तो गदायां समुदाहृतः॥नक्षत्रे भं बुधाः प्राहुर्भवने भः
प्रकीर्तितः॥२६॥दीप्तिर्भा स्याच्च भूर्भूमिर्भीर्भयं कथितं बुधैः॥मः शिवश्च
द्रमा वेधा मा लक्ष्मीश्च प्रकीर्तिता॥२७॥मा च मातरि माने च बंधने मः प्रकी
र्तितः॥ यशो यः कथितः प्राज्ञैर्यो वायुरिति शब्दितः॥२८॥याने यातरि यः
स्यात्कथितः शब्दवेदिभिः॥रश्च रामे निलेवन्हौ भूमावपि धने पि च॥
२९॥ दूये धनरोधे च स्पर्भये च प्रकीर्तितः॥लो दीप्तौ द्यां लश्च भूमौ भ
ये च ला दने पि च॥३०॥लो वाते लवणे च स्याल्लो दाने च प्रकीर्तितः॥
लः श्लेषे वा शये चैव प्रलये साधने पि ल॥३१॥मानसे वरुणे चैव ल
कारः सांत्वनेपि च॥वि श्च पक्षी निगदितो गगनं प्रतिकीर्तितं॥३२॥शं
सुखं शंकरः श्रेयः शश्च सीम्नि निगद्यते॥शयने शः समाख्यातो हिंसा
यां शो निगद्यते॥३३॥षः कीर्तितो बुधैः श्रेष्ठ षश्च गंभीरलोचने॥उपसर्गे
परोक्षे च षकारः परिकीर्तितः॥३४॥सः कोपे वरणे सः स्यात्तथा शूलिनि की
र्तितः॥सा च लक्ष्मी बुधैः प्रोक्ता गौरी सा च स ईश्वरः॥३५॥हः कोपे वारणे ह
श्च लश्च शूली प्रकीर्तितः॥हिः पद्यावरणे प्रोक्तो हिः स्याद्धेत्व वधारणे॥३६॥क्षः
क्षेत्रे च क्षरि प्रोक्तो बुधैः क्षः शब्दशासने॥क्षिः क्षेत्रे सत्वरक्षे च नृसिंहे च
प्रकीर्तितः॥३७॥आगमेभ्योभिधानेभ्यो धातुभ्यः शब्दशासनात्॥
एवमेकाक्षरं नामाभिधानं क्रियते मया॥३८॥ ॥इत्येकाक्षरकोशः समाप्तः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीगणेशायनमः॥प्रबोधमाधातुमशाब्दिकानांरूपाण्युपेत्यापि
सतंकवीनाम्॥कृतोमयारूपमवाप्यशब्दभेदप्रकाशोऽविर
वाङ्प्रपार्थः॥१॥विद्यादगारमागारमपगामापगामपि॥अराति
मारातिमथोअमआमःप्रकीर्तितः॥२॥भवेदमर्षआमर्षअंकुरो
ऽकुरएवच॥अंतरिक्षमंतरीक्षमगस्त्योऽगस्तिरेवच॥३॥अटरूष
श्चाटरूषोऽवशायोऽपश्यापएवच॥पतिश्यापःप्रतिश्यायोभल्लू
कोभल्लुकोऽपिच॥४॥उल्मूकमुल्मुकंप्राहुःशंबूकोऽपिशंबुकम्
॥जतु कास्याज्जतूकापिमसूरोमसुरोमतः॥५॥वास्तुकंचापि
वास्तूकंदेवकीदैवकीतिच॥ज्योतिषंज्यौतिषं चापिष्ठे
वनंष्ठीवनंतथा॥६॥सूत्रामापिसूत्रामादनूमान्हनुमानपि॥
उषणंस्याद्दूषणंचभवेदूषरमूषरम्॥७॥वधूरंव [illegible] स्याद्दूरी
कृतमुरीकृतम्॥वाल्हिकंचापिवाल्हीकंगंडीकं [illegible] डुवंतथा॥
॥८॥उषाप्यूषाननन्दाचननान्दाचप्रकीर्तिता॥चं [illegible] लोऽपिचचां
डालोवादान्योऽपिवदान्यवत्॥९॥हालाहलंहा [illegible] लंवदन्त्य
पिहलाहलम्॥प्रचहालंहहालंचहाहलंचापि [illegible] ॥१०॥प्र
काणःप्रक्वणश्चापिश्यामाकश्यामकेऽपिच॥ [illegible] रःसह्वरः
स्फाटिकंस्फटिकंतथा॥११॥गन्धर्वोऽपिचगांधर्वश्चमरश्चाम
रस्तथा॥चोरश्चौरश्चटुश्चाटूश्चोलश्चेलश्चमुश्चम्॥१२॥चंचु
श्चञ्चूस्तलस्तालःश्यामलःशावलस्तथा॥धान्याकमपिधन्या
कंपुतकंपोतकंतथा॥१३॥कवाटंचकपाटंचकविलंकपिलंत
था॥करवालःकरपालोवनीपकवनीपकौ॥१४॥ पारावतःपा
रापतोजरास्याज्जरयासह॥जटायुषंजटायुंचविद्याद्दायुस्तथायु
षा॥१५॥सायंसायोभवेत्कोशःकोशःमूण्डंचमुंडवत्॥भावुकं
भविकंचापिमूसलंमुषलंतथा॥१६॥वेशोवेषश्चकथितोबुसो
ऽपिस्याद्बुषस्तथा॥स्याद्धनुर्धनुषासार्द्धंजरसाचजरांविदुः १७
सूकरःसूकरोपिऽस्यात्सृगालश्चसृगालवत्॥सूरःशूरश्चक

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यितः कलसः कलशोऽपि च ॥१८॥ सुनासीरः शुनासीरो नाराय
णनरायणौ ॥ यातुधानो जातुधानो लक्ष्मणो लक्ष्मनोऽपि च १९ श्वसु
रः स्वसुरोऽपि स्याच्चारित्र्यं चरितं तथा ॥ पारदं पारतं वासा वासकं
कृमिणा क्रिमि ॥२०॥ त्रिफला त्रिपला चापि कुशरा किशरापि च॥
॥ भवेद्दृष्टिस्तथा विष्टिः प्रियालः स्यात्पियालवत् ॥२१॥ कलाटी
नः कराटीनो बलिशो वडिशोऽपि च ॥ संकरः शंकरोऽपि स्यान्मङ्गलो
मुङ्गलोऽपि च ॥२२॥ मङ्गरो मुङ्गरश्चापि मकुटो मुकुटस्त्विह ॥ सुकृतं
सूकृतं चापि चुलुकं चूलुकं तथा ॥२३॥ करञ्जः करजोऽपि स्यात्परेतः
प्रेत उच्यते ॥ कश्मीरोऽपि च कीर्मिरो हायनं हयनं स्मृतम् ॥२४॥ शौ
टीर्यमपि शौण्डीरं ज्येष्ठो ज्यैष्ठोऽपि दृश्यते ॥ सौदाम्नी च सुदाम्नी
च सौदामन्यपि दृश्यते ॥२५॥ जठरो जटरोऽपि स्यान्निमेषो निमिषोऽपि च
॥ बुकोबकश्च कुसुमे मदनो मलयो द्रुमे ॥२६॥ आरग्वधोऽरग्वधो
चरबुरकस्सुरकावपि ॥ प्रश्निः पृश्निश्च सरभूः सरपुश्च निगद्यते ॥२७॥
नीलंगुरपि नीलांगुरीश्वरी चेश्वरापि च ॥ तपिंचमपि तापिंच त्रपु
षं त्रिपुषं तथा ॥२८॥ हिड्डिरोऽपि च हिंडीरः परशुं पर्शुना सह ॥ वालु
का वालिका चापि दोर्दोषोऽपि भुजा भुजः ॥२९॥ बाहुर्बाहा तृषा तृ
ष्णा संध्या स्यात्संधिना सह ॥ भगिनीमपि भग्नीं च झल्लरीं झिल्ली
रीं विदुः ॥३०॥ वेत्रं च वेतसा सार्द्धमेधमा द्रुस्तथैन्धसा ॥ सम्वलनं
सम्वरणं तलुनी तरुणी तिच ॥३१॥ प्रमदा वचनं प्रमद्वचनं परि
कीर्त्तितं ॥ स्वहलिका सुरलीका वज्ज्रं वज्ज्रोशनिस्तथा ॥३२॥ शिलं
मुच शिलीं चं च भवेन्मुचं शिलं तथा ॥ वासुदेवोऽपि वासुः स्याद्वा
सुदेवोऽपि वासवः ॥३३॥ आशी आश्याः द्विदंष्ट्रा यां लक्ष्मिर्लक्ष्मी
र्हरेः प्रिया ॥ रुचकौ रुचुकौ प्रोक्तौ पुरुचूकश्च तादृशः ॥३४॥ कु
मुदं कुमुदश्चापि योषिता योषिदित्यपि ॥ शरद्भवेच्छरदया प्रावृ
ट्प्रावृषया सह ॥३५॥ नगस्तु नगसा सार्द्धं तपश्च तपसा सह ॥ स
हस्तु सहसा सार्द्धं महस्तु महसा सह ॥३६॥ तमस्तु तमसा प्रोक्तार

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जसापिरजःसम॥ग।र्गिचैस्तुजलौकाभिःकथितोअंजलोकसः॥३७
दिवंचापिदिवाप्रोक्तं पर्षस्या त्पर्षदासह॥वर्षाःस्युर्वरिषाभिस्तुद
विषेद्वविषस्तथा॥३८॥सर्षपःस्यात्सरिषपः कर्षःस्यात्करिषेण
च॥मारिषोमार्षइत्युक्तःपरशःपर्शएवच॥३९॥एवमन्येऽपिधाद्वौ
धकद्वौवर्णाःप्रयोगतः॥दक्षिणास्यामवाच्येवप्रायंत्वनशनेविदुः
॥४०॥छंदावभिप्रायवशौकज्जलस्यात्कवातवत्॥ह्रस्वादिकर्तिःपी
डायांधनुःकोट्यामपीष्यते॥४१॥एतौमध्यतवर्गीयौनेदूर्यमणि
शार्दूलौ॥तालव्यमध्योविशदउद्धूशब्दोरकारवान्॥४२॥यवानीष्य
हैमध्येश्रावणेमासिमध्यतः॥शफेखुरचवर्गीयंखुरश्वखुरमके
४३॥नापितस्योपकरणेकषसंयोगइष्यते॥अन्यधानन्यपरात्रोदो
षाशब्दप्रचक्षते॥४४॥प्रायोभवेद्यःप्रचुरप्रयोगःप्रमाणिकोदाहृ
णेप्रतीतः॥रूपादिभेदेषुविचारणेषुविचक्षणोनिश्चयतामुपेति
॥४५॥क्वचिन्मात्राकृतोभेदःक्वचिद्वर्णकृतोऽत्र च॥ क्वचिदर्थान्तरो
ल्लेखाच्छब्दानांरूढितःक्वचित्॥४६॥जागर्तियस्यैषमनःसरो
जेसएवशब्दार्थविवर्तनेशः॥निजप्रयोगार्पितकामचारःपाठप्रयो
गाग्रण शार्गलश्च॥४७॥हारितोहरितोपिस्यान्मुनिपक्षिविशेषयोः
तुवरस्तूवरोऽपिस्यात्कुवरःकूवरस्तथा॥४८॥ उत्तमोनुत्तमो
पिस्यादाहतंस्यादनाहतम्॥ उदारेऽत्रानुदारःस्यादुदग्रेचानुद
ग्रवत्॥४९॥महिलायांमहेलापिमहलास्यान्महेलिका॥छेकदः
छेकछेकालौविदग्धेछेकिलोपिच॥५०॥गुग्गुलौगुग्गुलोपिस्याद्धिंगुले
चापिहिंगुलम्॥मंदिरेमदिरापिस्याद्वीर्येवीर्योपिकथ्यते॥५१॥शु
ष्केप्यकालेचावालमुदकेस्यादृकंतथा॥दुष्टभेदेशतरूपीशताह्व
निगद्यते ५२ द्वेकद्देक्षाणादक्षणाभवन्त्यपिद्रकागवत्॥पत्रगमपिपत्रा
ङ्गे कुद्दालश्चकुदालवत्॥५३॥मारुषंमारिषंशाकेप्रीहाप्लीहागदेपि
च॥फिणापेणिस्त्रयौदुिलकरिण्यांकारिणीतिच॥५४॥धरित्रीश्च
तरिषःचतरिषातारिषीतथा॥कन्याकुब्जकान्यकुब्जंकोशलोतर
कोशला॥५५॥वाराणसीत्वपिप्रोक्ता वाणारसीतिचतथा॥ताम
लिप्तादामलिप्तातुंगोऽप्योतुंगइत्यपि ५६ अन्तस्थीयवकारस्तु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पवनस्यतुकम्पते॥तत्रवायस्यवायेपितन्त्रादित्वंचदृश्यते॥५७॥

इतिपुरुषोत्तमदेवकृतःशब्दभेदप्रकाशःसम्पूर्णः ॥शुभमस्तु॥

---

॥श्रीगणेशायनमः॥

अथापरोद्विरूपकोशःप्रारभ्यते

भवेदाषाढआसाढोविषुवंविशुवंतथा॥मातुस्स्वसामातृष्वसाकषायोक
थिताकशा १ शबलंसबलंप्रोक्तंकुशलंकुसलंतथा॥वाशरोवासरोपि
स्याद्वशिष्ठोपिवशिष्ठकः॥२॥मुषलोमुसलःप्रोक्तःसूकरोपिचशू
करः॥शृगालोपिसृगालस्स्याच्छावःसावोपिकीर्तितः॥३॥कोषः
कोशोःशुभदितमस्तुचापिसताम्मतम्॥शण्डःषण्डस्तथाख्यात
स्साण्डोपित्रिविधोमतः॥४॥शूर स्सूरेपिचानिस्येविष्वाविश्वास्मृ
तावुधैः॥किशलयंकिसलयंचूलुकंचुलुकंतथा॥५॥अलीस्या
दलिरप्येवंबाल्हीकोबाल्हिकोमतः॥गण्डीवंगाण्डिवंचैवपाण्डू
रंपाण्डुरस्तथा॥६॥पारावतःपारवतःकवाटंचकपाटकम्॥अन्त
श्चान्तस्सुखंसौख्यंनखंचनखरंतथा॥७॥ब्राह्मीकोब्राह्मिकश्चैव
वालुकावालिकातथा॥मथुरामधुराप्रोक्ताकफोणिःकफणिस्त
था॥८॥ह्राह्वरमपिचप्रोक्तंसर्षिपोपिचसर्षपः॥धूस्तूरोधूस्तुरश्चै
वमन्तीकापितथान्तिका॥९॥जमदग्निर्जामदग्निःकौलिंजश्चकि
लिञ्जकःप्रतिकारःप्रतीकारोविहारादेर्द्विरूपता॥१०॥रजन्यवनि
भूम्यादेर्द्वैरूप्यमपिदृश्यते॥अयोगण्डस्तुयोगण्डोऽप्यपिधानंपि
धानकम्॥११॥अवतंसोवतंसोप्यवहितंवहितंतथा॥आर्य्यआर्ज्य
स्तथाप्रोक्तःखुरग्नश्वसुरग्रकः॥१२॥यामाताःपिचजामाताया
याजायापिकीर्तिता॥योषाजोषातथाख्यातास्ववासन्यांस्ववासि
नी॥१३॥कङ्गुःकगूर्यवागुश्चयवागुश्चिरैरुदाहृता॥सुत्रामापि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चस्त्रामाकीलिनी कीलिणीतथा॥१४॥ यातीफलंजातिफलंयष्टीमधु
मंतंतथा॥ तनुस्तनूर्हनुश्चैवंपरीषत्परिषत्तथा॥१५॥ अभ्रमभ्रमपि
ख्यातंधवित्रंस्याद्धूपित्रकम्॥ धान्याकमपिधन्याकंखड्गंखड्गश्च
सम्मतः॥१६॥ विरंचिश्चविरंचोपिपरशुःपरशूरपि॥ पृषदश्वःपृषद
श्वोवेष्यावेश्यापिकीर्तिता॥१७॥ सुरापाणंसुरापानंभुजङ्गोभुजगोम
तः॥ तुरङ्गस्तुरगश्चैवकवन्धंचकवन्धकम्॥१८॥ अग्रमग्र्यमपि
ख्यातंशारःसारोपिकथ्यते॥ वन्धुकंवन्धुरंचापिककुदंककुदप्यथ
१९॥ लुद्यानंचपुरुद्यानंपुरीपुरमपिस्मृतम्॥ जम्बीरोऽपिचजम्भीरो
वरूणोवरुणोमतः॥२०॥ रात्रिंचरोरात्रिचरस्संततंसततंतथा॥ जि
ह्वाजिह्वश्चकथितोजिह्लोयेनगीयते॥२१॥ उक्थमुक्थमपिप्रो
क्तमीष्टमिष्टमपिस्मृतम्॥ विश्रामोविश्रमोवापिपुरुषःपूरुषस्तथा॥
॥२२॥ उदर्कमुदकंप्रोक्तंकटिःकटकटीरकौ॥ लज्जालज्यापुनःप्रो
क्ताप्रततिर्व्रततिस्तथा॥२३॥ नृसंनृतंचकथितंशय्यायांकथ्यते
शयः॥ फलितंफालितंचैवविद्वद्भिःपरिकीर्तितम्॥२४॥ गभीरंचा
पिगम्भीरंप्रक्वाणःप्रक्वणस्तथा॥ प्रादेशोपिप्रदेशस्स्यात्करजोपि
करञ्जकः॥२५॥ लकुचोलिकुचोवापिहज्जलोहिज्जलोमतः॥ अग
स्तिस्स्यादगस्त्योऽपिपमदोपमजोमतः॥२६॥ वातिलोवातुलोऽपि
स्याद्वातूलःप्रमतस्तथा॥ अमिक्षास्यादमीक्षापितेमस्तेमइतिस्मृ
तः॥२७॥ चेटीचेडीलक्षणतोरजःख्यातंरजेमतः॥ मह्नःख्यातंमह्नि
मादुश्चिन्तनंचिन्तनीतथा॥२८॥ मासिज्येष्ठस्तथाजेष्ठःपौषःपुष्ये
पिसम्मतः॥ अस्तिवानाऽस्तिवानेवंवाग्वाचादिग्दिशादयः॥२९॥ ना
रिकेलादिषुद्वैधंमाद्केलादिवर्जनात्॥ डिम्भोडिम्बश्चविख्यातःकु
बरःकूबरस्तथा॥३०॥ अर्द्रमार्द्रंधुतंधौतंकटकंकनकंतथा॥ नारकं
नरकंचापिकुटीरंकुटिरंतथा॥३१॥ ननन्दाचननान्दाचजटीलोजटि
लस्तथा॥ निशीतंनिशितंचापिविद्वद्भिःपरिकीर्तितम्॥३२॥ घ्राणं
घ्रातंपुनःप्रोक्तंगृढगुसंमतंतथा॥ क्रीतंक्रीणंचकथितंपुष्टंचपु
षितंतथा॥३३॥ दान्तंचदमितंप्रोक्तंशान्तंशमितमेवच॥ पूर्णंचपू

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रितंचैवक्लिष्टंचक्लिशितंतथा॥३४॥पिष्टंचपिषितंचैवविहङ्गिःपरिकी
र्तितम्॥शुष्कंचशुषितंचैवभिन्नंचभेदितंतथा॥३५॥तप्तंचतपितंचैव
धूपितंचतथामतम्॥धूपायितंमार्गितंचमृगितंचोच्यतेपुनः॥३६॥
त्रातंत्राणमतिख्यातंगुप्तंगोपायितंतथा॥बुद्धंचबुधितंप्रोक्तंपणितं
चतथामतम्॥३७॥पणायितंचपनितंपणायितमपिस्मृतम्॥छन्नं
चछादितंचैवपुष्टंपुष्टमपिस्मृतम्॥३८॥अपतीर्थंपतीर्थंचपर्पः
स्यात्सपर्णीतथा॥गुग्गुलुर्गुग्गुलश्चैवकिकिदीविःकिकीदिविः॥३९
जीवंजीवोजीवजीवस्तडागस्तडगस्तथा॥४०॥अपूपश्चैवपूपः
श्चअघमर्षोघमर्षणम्॥अपमानोऽवमानश्चबिम्बोष्ठादेर्द्विरूपता
॥४१॥हलीषाचहलेशाचलांगलेशातथामता॥काव्येषुगीयतेहर्षे
हरीर्षोःपिचगीयते॥४२॥निमेषनिमिषौचैवभीरुस्याद्भीलुकःपु
मान्॥मेधिर्मेधीशरव्यंचलक्ष्यंलक्ष्यंतथामतम्॥४३॥संख्याल
क्ष्यंचलक्ष्याचकरभोपिकरम्भकः॥मृदुर्म्रृद्वीगुरुर्गुर्वीरजतंरजनंत
था॥सेवनंसीवनंतन्द्रीतन्द्राचमार्जनंमृजा॥संध्यासंधाप्रतिज्ञायांभ
रताभारतीनदी॥४५॥स्मृतौदासेनदासेयौपिटकःपेटकस्तथा॥परी
सृतापरिस्तृतास्यादालस्यालसोपिच॥४६॥कमलंकमलोवापिगृ
ध्नुर्गर्द्धनइत्यपि॥भूस्नुर्भविष्णुर्विकलविकुलौचनवन्नवा॥४७॥मृ
दुलेमृदुलिप्राहुर्वद्धुलेवद्दलंवद्दु॥पृथलंपृथुचेत्येवंमञ्जुलंमञ्जुचे
ष्यते॥४८॥नटनंनाटनंचैवभ्रुकुटिर्भ्रकुटिस्तथा॥वविश्णोवविशो
निशोधृष्टोधृष्णुर्विशाणकः॥४९॥विषाणोवाहवाहौचोररीकृतमरी
कृतम्॥वंगापिपठ्यतेकैश्चितथावङ्गोपिचेष्यते॥५०॥स्फुरणंस्फू
रणंख्यातंस्तम्बघ्नस्तम्बघनोपिच॥कालनेमिःकालनेमादैत्य
नामद्विधामतम्॥५१॥तुल्येमङ्कुल्यमाङ्कुल्येविविधोवीविधो
मतः॥भृङ्गराजोभृङ्गरजोमुकुटमकुटंतथा॥५२॥मुकुरोमकु
रोपिस्यात्फलंचफलितंमतम्॥मृष्टम्लिष्टन्नसान्नासाकर्षकः
कृषिकोपिच॥५३॥खलिनंचखलीनंचगर्तेगर्तापिचेष्यते॥अ
हो आहो तथाप्रायःप्रायस्तुतथामतम्॥५४॥मणावपिमणी
चैवरोधसीरोधसिस्तथादम्पतीजंपतीचैवप्रगाढःप्रगाढस्स्मृतः
॥५५॥ अरेआरेइतिख्यातंद्विरूपंचतथामतम्॥ ॥ छ ॥ छ॥
॥इतिद्विरूपकोशःसमाप्तः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीगणेशायनमः॥ अथत्रिकांडशेषकोशः प्रारभ्यते॥ जयंतिसंतः
कुशलंप्रजानांनमोमुनींद्रायसुराःस्मृताःस्थ॥ स्कतासिवाग्देविदय
स्वमातर्विधेहिविघ्नाधिपमंगलानि॥१॥ अलौकिकत्वादमरःस्वको
शेनयानिनामानिसमुल्लिलेख॥ विलोक्यतैरप्यधुनाप्रचारमयंप्रय
त्नःपुरुषोत्तमस्य॥२॥ वर्गक्रमस्तथानामलिंगयोस्तूपदेशना॥ परिभा
षादिकंसर्वमत्राप्यमरकोशवत्॥३॥ स्वर्लोकोदेवलोकःस्याद्वरोह
फलोदयः॥ मंदरःसैरिभःशाक्रभवनंखंदिवंनभः॥४॥ स्वाहाभुजस्त
वस्कलाःपूजिताश्चचिरायुषः॥ शौभानिलिंपाद्युसदःस्वर्गिणश्चनभः
सदः॥५॥ ऋनामात्वदितिर्देवमातास्यादथपूर्वजाः॥ पितरश्चेंद्रगोलस्था
न्यस्तशस्त्राःस्वधाभुजः॥६॥ कव्यबालादयस्तेचदैत्यास्तुप्रपसाःख
राः॥ क्रतुद्विषश्चेष्टिमुषोदैत्यमातादितिर्दनुः॥७॥ बुद्धोकनिष्ठगमहामु
निधर्मचक्रागाशनिस्त्रिशरणाःखसमोदशार्हः॥ तापीगुणाकरमहा
सुखवज्रिणश्चमैत्रीवलासमजितारिसमंतभद्राः॥८॥ महाबोधिर्धर्म
धातुःश्वेतकेतुर्जिनःखजित्॥ त्रिमूर्त्तिर्दशभूमीशःपंचज्ञानोबहुक्षमः
॥ संबुद्धःकरुणाकूर्चःसर्वदर्शीमहाबलः॥ विश्वबोधोधर्मकायःसंगु
प्तोऽर्हन्मुनिश्चितः॥१०॥ व्योमाभोद्वादशाख्यश्चवीतरागःसुभावितः
॥ सर्वार्थसिद्धस्तुमहाश्रमणःकुलिशासनः॥११॥ गोपेशश्चाथास्ययः
शोधरेयोबाहुलेसुतः॥ देवदत्तोऽनुजोथस्युःश्रावकाःशिष्यसंज्ञिनः१२
प्रत्येकबुद्धाःखड्गास्युःसुदांताश्चैकचारिणः॥ स्वयंभुवोथमारीचीत्रि
मुखावज्रकालिका॥१३॥ विकटावज्रवाराहीगौरीपोत्रिरथाचसा॥ लोक
नाथस्तुलोकेशःसरोजीगुणसागरः॥१४॥ लोकेश्वरःकृपाहूतःसुधावर्षीह
लाहलः॥ सुखावतीश्वरःकन्यारामोऽसिताभशेखरः॥१५॥ चिंतामणिःप

---

स्वर्लोकादिदशस्वर्गस्य स्वाहाभुगादिनवदेवानां ५ ऋनामादित्रीणि अदित्याःपूर्वजादि
पंचपितॄणां ६ कव्यबालेत्येकंपितृभेदस्य दैत्यादिपंचदैत्यमातादित्रीणि ७ बुद्धादिसप्तत्रिं
शत् ८।९।१० सर्वार्थसिद्धाचत्वारिशाक्यमुनेः ११॥ यशोधरेयादिद्वेशाक्यसुतस्य एकंश
क्यभ्रातुःशिष्याणामेकं१२॥ मारीचादिसप्तमायादेव्याः १३॥ लोकनाथादित्रयोविंशतिर्बु

द्मपाणिर्बहुरूपःखसर्पणः॥अमीचदर्शीकारंडव्यूहःपोतलकप्रियः१६
जटाधरोमहावीर्योवज्रसूर्योऽवलोकितः॥तारामहाश्रीरोंकारास्वाहा
श्रीश्चमनोरमा॥१७॥तारिणीचजयाऽनंताशिवालोकेश्वरात्मजा॥खदू
रवासिनीभद्रावैश्यानीलसरस्वती॥१८॥शंखिनीचमहातारावसुधारा
धनंददा॥त्रिलोचनालोचनास्यान्मणिभद्रस्तुजंभलः॥१९॥पूर्वपक्षोज
लेंद्रोथमंजुश्रीर्ज्ञानदर्पणः॥मंजुभद्रोमंजुघोषःकुमारोष्टारचक्रवान्॥
॥२०॥स्थिरचक्रोवज्रधरःप्रज्ञाकायश्चवादिराट्॥नीलोत्पलीमहारा
जोनीलःशार्दूलवाहनः॥२१॥धियांपतिःपूर्वजिनःखड्गीदंडीविभूषणः
बालव्रतःपंचचीरःसिंहकेलिःशिखाधरः॥२२॥वागीश्वरोथहेरंबो
हेरुकश्चक्रसंवरः॥देवोवज्रकपालीचनिशुंभोशशिशेखरः॥२३॥
वज्रटीकोथमैत्रेयोयुवराजोजितश्चसः॥चीवरीश्रमणोभिक्षुर्वैत्य
श्चैत्रोथचेलुकः॥२४॥श्रामणेरःप्रव्रजितोमहापासकगोमिनौ॥अ
थहंसरथोब्रह्माविरिंचोष्टश्रवाःसनत्॥२५॥कंजःप्राणश्चवेदीशवे
दगर्भपुराणगाः॥अब्जजोविश्वरेनाश्चकमलःप्रपितामहः॥२६॥
नाभिजन्माशतधृतिर्ब्राह्मीतुब्रह्मकन्यका॥वाग्देवीशारदाशुक्लाम
हाश्वेतासरस्वती॥२७॥अथहरिशतबिंदुश्रीकरश्रीवराहाजितपर
पुरुषश्रीगर्भषड्बिंदूनेताः॥नरकजिदृतधामाकेशवोजन्मकील:
क्रतुपुरुषनृसिंहश्चनृथजन्हूश्चदेवाः॥२८॥कोकःपुराणपुरुषो
नलिनेशयश्चवासुर्नरायणपुनर्वसुविश्वरूपाः॥अःश्रीनिवासधरणी
धरवामनैकशृंगाश्चवृष्णिवृषशत्रुदशावताराः॥२९॥सोमगर्भादिदे
वादिवराहस्वर्णबिंदवः॥गदाग्रजोमुंजकेशीसदायोगीसनातनः ३०॥
रंतिदेवशिवकीर्तनौत्रिपात्सामसिंधुरपिराहुमूर्धभित्॥कालनेमियव

---

द्धमेदस्य१४।१५।१६।तारादीन्येकविंशतिः१७।१८।मणिभद्रादिचत्वारिपूर्वयक्षस्य॰
१९।मंजुश्रीत्यादिपंचविंशतिःपूर्वजिनस्य२०।२१।२२।हेरंबाद्यष्टौवज्रटीकस्य२३मै
त्रेयादित्रीणि।भिक्षुद्धस्यचीवर्यादिपंचकुद्धभिक्षुकस्यचेलुकादिपंचभिक्षुशिष्यस्य२४
हंसरथादिसप्तदशब्रह्मणः२५।२६ब्राह्म्यादिसप्तसरस्वत्याः२७हर्यादीनिषट्षष्टि

नारिपांडवाभीलसिंधुवृषकृष्णकेशिनः॥३१॥ ह्नेमशंखः शतावर्तीम
नुसात्वतवारिशाः॥ वर्धमानः शतानंदोजगन्नाथः सुयामुनः॥३२॥पू
तनाधेनुकारिष्टकेशिचाणूरसूदनः॥ भूकश्यपस्त्वस्यपितादुंदुभि
स्यदितिःप्रसूः॥३३॥स्यंदनस्तु शतानंदः सारथिश्चास्यदारुकः॥तु
रंगाःशैब्यसुग्रीवमेघपुष्पबलाहकाः॥३४॥ध्वजोभुजंगहामंत्रीपव
नव्याधिरुद्धवः॥ शैनेयस्तुशिनेर्नेसायुयुधानश्चसात्यकिः॥३५॥बल
भद्रस्तुहालःस्यात्सौनंदीहलतालभृत्॥संवर्तकेशुसचरोरुक्मिदार्यक
कुंडलः॥३६॥मधुप्रियोथप्रद्युम्नोजराभीरुश्शमातकः प्रसूनासमपंचे
षुःकंजनोमधुसारथिः॥३७॥ रागरज्जुःकलाकेलिमधुदीपरवीपवः॥इ
कतुर्मकरांकःसंकल्पभवोगजूश्चरूपास्त्रः॥ रणरणकोरतिरमणः
संसारगुरुर्मनोजन्मा॥३८॥कौत्विश्चास्यप्रियारागलताकेलिकला
वती॥सेःकेनतीचास्यबाणामोहनोन्मादनैस्तथा॥३९॥ संतापनःशो
षणश्चनिश्चेष्टाकरणोपिच॥सुतोनिरुद्धःस्याद्विश्वकेतुःप्रीतितृषः
सुतः॥४०॥श्रीवत्सश्रीचलासामारमाजलधिजेंदिरा॥मणिःस्यमतं
कोहस्तेविष्णोरुरसिकौस्तुभः॥४१॥ तार्क्ष्यःशिलौकाःकामायुररुणाव
रजश्चिरात्॥पक्षिसिंहउन्नतीशोवज्रतुंडःसुधाहरः॥४२॥स्वर्णपक्षः
सुमुखभूःशाल्मलीभुजगाशनः॥शंभुर्भगालीकपिशांजनश्चहीरः
कटप्रुर्भरुरेरिहाणो॥पुरारिपंचाननभैरवाट्टहासप्रहासाश्चखकुंतल
श्च॥४३॥कंठकालजयंतगुह्यगुरवोजोटिंगगोपालकौपिंगाक्षःकठमर्द
रेवतजटाटकाव्ययाकूरकृत्॥चंद्रापीडमहानटौचशमिरोहःशैल
धन्वाजटाचीरोऽथवेपनदिवहुनगुडाकेशोग्रकालंजराः॥४४॥मिर
हिराणोजगद्योनिष्टंकटीकोऽजवाहनः॥ कृष्णरोचरवृक्षश्चसुप्र
सादोद्भुतशयनः॥४५॥उःस्थाणुःशिपिविष्टश्चमःकिलोधर्मवाहनः॥

---

द्वैविष्णोःपितुःएकंविष्णोःमातुः३३रथस्यैकंसारथेरेकंशैब्यादिचत्वारिश्चतुरगाणांपृ
थगेकैकस्य३४ध्वजस्यैकंपवनव्याध्यादिद्वेमंत्रिणः शैनेयादिचत्वारिसात्यकेः३५बलभ
द्रादिदशबलदेवस्य३६प्रद्युम्नादीनष्टविंशतिःकामदेवस्य३७३८रागलतादिचत्वारिरतेः
मोहनादिपंचकामबाणानांपृथगेकैकस्यएकैकं३९अनिरुद्धादित्रीणिकामसुतस्यश्र्यादश
लक्ष्म्याः४०विष्णोदक्षमणेरेकंउरोमणेरेकं४१तार्क्ष्यादिचतुर्दश४२४३शंभ्वादिचतुःषष्टिःशि
वस्य४४४५४६शिवस्यशृंगस्यैकं४७द्वेशिवधनुषःवृषादिद्वेशिववृषभस्यभृंगरिटादीनिषट्भृं
गिणः४८महाकालादीनिचत्वारिनंद्यादिचत्वारि४९शिवद्वारस्थस्यआर्यादीनिसप्तत्रिंशत्पार्वे

विरूपविषमत्र्यक्षः संध्यानाटी वृषांचनः ४६ एकपाद्भैरवेति कोभद्रो ध्वरेतः
पांसुचन्दनाः॥अस्थिमाली शिवश्चास्यखट्वांगस्तु सुखंघुणः ४७ अजी
गवोऽजगावश्च वृषो भृंगीरिटित्वसौ॥भृंगरीटः शलो भृंगी नाटी देहो स्थि
विग्रहः ४८ महाकालो महाभीमो महाकायो हृषाणकः॥ह्रास्यस्तु नंदीशाल
कायनस्तांडुवतालिकः॥४९॥स्यान्नंदिकेश्वरो स्थायाहिंडी शि
खेरवासिनी॥शक्तिः सिंहरथा गोलासिनी बाली वृषहूती॥५०॥
सोऽकृष्णपिंगलालंबा शैलेयी गणनायिका॥वारालिकै कानंशग
चशिवदूती यम[illegible]॥५१॥कोट्टवी बाभ्रवी कैटभी कैटभा याट्वी
कर्बुरी [illegible]॥भ्रामरी दक्षकन्या च बर्हिध्वजी नंदपुत्री
चमारी च कालंजरी॥५३॥गोतमी तामसी षष्ठी जयंती शूलधृक्
सती॥ सिंहस्तस्या मनःस्तालः सख्यौ च विजयो जये॥५४॥ व्रत्र
तुंडः करिमुखः पृश्निशृंगो गणाग्रणीः॥त्रिधातुरेकदंतश्च हेरंबो
मूषिकाचनः॥५५॥विघ्नहारी कुमारस्तु स्वामी द्वादशलोचनः॥बा
लचर्यः सिद्धसेनः रूकवाकुध्वजश्च सः॥५६॥ देवराजस्तु लः
कौशिकोसन्महा बाहुदंतेपदाल्मीवराणोद्रिभित्॥ व्रज्रपाणि
र्महेंद्रः सुरग्रामणी यामनेमिर्वृषानाकनाथो हरिः॥५७॥ प्राची
नबर्हिः खदिरः कपिलाश्वो वरक्रतुः॥प्राचीपतिस्तपःस्तेकः पुलो
मारिश्च माहिरः॥५८॥ पृतनाषाट् प्रियात्वस्य चारुधारा शताव
री॥शचीसुता देवसेना मातलिस्तु हयंकषः॥५९॥उच्चैःश्रवाः
श्वेतहयो वृषणश्वो भैरावती॥वृषभासासुरपुरीवनमैंद्रं वृषण्व
सु॥६०॥ नंदनं कंदसारस्यान्मिश्रकावणमित्यपि॥ हस्तिमल्लु

---

पार्वतीसिंहस्येकं पार्वतीसख्योः पृथक् द्वे विजयादीनि ५४ व्रत्रतुंडादीनि
नवगणेशस्य ५५ कुमारादीनि षट् कार्तिकेयस्य॥५६॥ देवराजादीनि षट् विं
शतिरिंद्रस्य ५७॥ ५८॥ चारुधरादि त्रीणि इंद्रस्त्रियाः एकं कन्यापाः सार
थेरेकं ५९॥उच्चैःश्रवसादि त्रीण्यश्वस्य अमरावत्यादि त्रीणि पुर्याः वृषण्वस्वादि च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्चतुर्दंतोभद्ररेणुर्मदांवरः ॥६१॥ श्वेतद्वीपः सुदामाथवज्रोऽस्त्री
गिरिकंटकः ॥ वज्राशनिर्भिदुर्भिद्रोजंभारिस्त्रिदशायुधम् ॥६२॥ श
तधारंशतारंचाभ्रोत्थंभिदिरमंवुजंम् ॥ मार्जारकर्णीचामुंडाक
र्णमोटिश्चचर्चिकाः ॥६३॥ विद्याधरःकामरूपीखेचरस्थिरयौवनः
॥स्पर्शानंदारतिमदाप्सरसः सुमदात्मजाः ॥ देवोद्यानानिवैभ्राजं
मिश्रकंसिध्रकारणम् ॥ चैत्ररथंचनासिक्यौयुजौदस्रौगदाग
दौ ॥६५॥ शुष्मघासिस्मधयोंचतिर्जुदूबाणईषिरतुपद्महाशिराः
॥छागवाहनसूदाकुबर्हिषःस्वर्णससघृतमंत्रदीधितिः ॥६६॥
पर्परीकदहसनीमणिपीथाः सप्तजिव्हसमिधावसितार्चिः ॥ ना
चिकेतभुजिभारतविश्वप्साःशुचिप्रचिसमंतभुजौच ॥६७॥ व
डवाग्नौतुसलिलेंधनःस्याद्वडवामुखम् ॥ काकध्वजोवाणि
जश्चस्कंधाग्निस्तृणकाष्ठधृक् ॥६८॥ छागणस्तुकरीषाग्नि
स्तृणाग्निःस्यात्तुवत्सलः ॥ तुषानलःकुकूलःस्यान्मुर्मुरोथाग्नि
कुक्कुटे ॥६९॥ संकिलोदहनोल्कोस्यादंगारेकोकिलाग्न्यसौ ॥
धूमभंभमरुद्वाहखतमालशिखिध्वजाः ॥७०॥ अग्निवाहस्त्वरीः
स्वाहात्वग्नायीदहनप्रियो ॥ जीवितेशोमयःशीर्णपादश्चमहिष
ध्वजः ॥७१॥ मंदोस्यकांताधूमोर्णाचित्रगुप्तस्तुलेखकः ॥ भृत्यौ
चंडमहाचंडौकालीचीतुविचारभूः ॥७२॥ पंजिकात्वग्रसंधानी
नृचक्षास्तुरवसात्मजः ॥ कीलालपाःपलाशीचक्षपाटोनरविष्वणः ७३

---

त्वारिवनस्य ६ हस्तिमल्लादिषट्गजस्य ६१ वज्रादिद्वादश ६२ मार्जारकर्ण्या
दिचत्वारिचामुंडायाः । ६३ । विद्याधरादिचत्वारिस्पर्शानंदादिचत्वार्यप्सरसः ६४
वैभ्राजेतिचत्वारिदेवोद्याननामेकैकंनासिक्यादिचत्वारिस्ववैद्ययोः ६५ शुष्मा
दिपंचविंशतिरग्नेः ६६ । ६७ । वडवाग्न्याद्यष्टौ ६८ छागणादिद्वेकरीषाग्नेःतृणा
ग्न्यादिद्वेतुषानलान्यादिद्वेअग्निकुक्कुटादित्रीण्यग्निकणायाः ६९ । अंगारादित्री
णिधूमादिसप्त ७० स्वाहादित्रीण्याग्निस्त्रियःजीवितेशादिपंचयमस्य ७१

संध्याबलोरात्रिमटोहनूषः शमनीषदः॥पलाशोविखुरःशंकुःकापिशे
यस्तपिंडकः॥७४॥पिशाचोमेघनादस्तुवरुणोवःपरंजयः॥दैत्यदेवश्च
वातस्तुनभःप्राणोजगद्बलः॥७५॥भोगिकांतःकंपलक्ष्मापश्च धाराव
निश्वसः॥स्वश्वासाक्षिपणुधूलिध्वजःसरपुरंकृतिः॥७६॥वातूलोवा
तगुल्मःस्याच्चरवायुर्निदाघजः॥झंझानिलःप्रावृषिजोवासतोमलया
निलः॥७७॥श्रीदधनकेलिमनुराट्श्ववेतोदररत्नगर्भनिधिनाथाः॥कु
तनुकुहेच्छावसवःपिशाचकीसत्पसेगरस्त्रिशिरेराः॥७८॥अस्त्रीप
द्मौमहापद्मःशंखौमकरकच्छपौमुकुंदकुंदनीलाश्चवर्चोस्यनिधयो
नव॥७९॥सतोस्यमायुराजःस्यात्तथावर्णकविर्निधौ॥आसंगिनी
चवातालीस्याद्वात्यावातमंडली॥८०॥ ॥इतिस्वर्गवर्गः॥ ॥कुना
भिःस्याद्विहायस्तुखंमरुन्मेघवर्त्मच॥अक्षरंचाथपाथोदःखतमा
लोगदांबरः॥८१॥मदप्रित्नुर्वापुदारुव्योमधूमोनभोगजः॥गाद्वयःकं
धरोवातरथोवारिमसिस्त्रियाम्॥८२॥करकास्याद्घनकोबीजो
दकमिराचरम्॥मेघास्थिवर्षणंतुस्याद्घोघृतंचपरामृतम्॥८३॥सौ
दाम्नीत्वशनिर्विद्युदणुभावाचिरद्युतिः॥८४॥तिथिप्रणीर्दर्शविप
न्निशामणिस्त्रिनेत्रचूडामणिरत्रिनेत्रभूः॥सुधांगमौद्गौमृगपिद्रु
पक्षजोदशाश्वसिप्रग्रहणेमिचंदिराः॥८५॥छायामृगधरोराजा
माःपरिद्राबलक्षगुः॥द्विजदाक्षायणीतुगीरोहिणीयज्वनांपतिः॥
उडुपःपर्वधिःक्लुदुर्जयंतस्तपसोहरिः॥८६॥नारापीडःखचमसोवि
कसःसिंधुनंदनः॥चंद्रिकाचंद्रशालोस्यान्नीहारस्तुनिशाजलम्८७॥शी
तंतुशीतलंपत्रहिमंतुहिन दुर्दिनम्॥कुज्झटिधूममहिषीरतांघ्रीचकुहे

---

एकंयमपत्न्याःएकंयमलेखकस्य यमभृत्ययोःप्रत्येकंद्वे विचारभुचएकं७२
पंजिकादिद्वेनृक्षादित्रयोदशयमदूतस्य॥७३॥कापिशेयादित्रीणिपिशाच
स्य॥७४॥मेघनादादिपंचवरुणस्यवातादीनित्रयोदशवायोः॥७५॥७६॥
वातुलादिद्वेवातगुल्मस्यनिदाघवायोरेकं॥७७॥श्रीदादिद्वादशकुबेरस्य॥७८॥
पद्मादिनवप्रत्येकमेकैकंनिधीनां॥७९॥मायुराजादित्रीणिकुबेरसूनोःआसं
गिन्यादिचत्वारिवातभ्रमेः॥८०॥कुनाभ्यादिषडाकाशस्यपाथोदाद्येकाद
शमेघस्य॥८१॥८२॥करकादिसप्त॥८३॥सौदाम्न्यादिषट्विद्युतः८३तिथिप्र
ण्यादिचतुस्त्रिंशच्चंद्रस्य८४८५८६चंद्रिकादिद्वेनीहारादिद्वे८७शीतादिद्वेपत्रहिमादिद्वे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लिका॥८८॥धूमिकाचनभोरेणुरथागस्त्याग्निमारुती॥सत्या
ग्निर्वारुणिर्विंध्यकूटोवातापिसूदनः॥८९॥दीप्ताग्निरौर्वशेयश्चस
मुद्रचुलकोस्यतु॥त्रिपाकौषीतकीलोपामुद्राख्याचविदर्भजौ॥९०
प्राकूफाल्गुनेयस्तुतथ्यानुजःपारुष्यगोरथौ॥दिदिविष्ठुंदशकर
श्चक्षाःसुरगुरुर्गुरुः॥९१॥शुक्रोभःशतपर्वेशोमघाभूर्भृगुरास्फु
जित्॥षोडशार्चिर्नवार्चिस्तुमंगलःखोल्मुकःकुंजः॥९२॥बुधोहे
माराजपुत्रएकदेहःप्रहर्षणः॥स्यात्सप्तार्चिःश्रविष्ठाजःश्यामांगो
कांधरोधनाः॥९४॥शनैश्वरोनीलवासामंदश्छायात्मजःशनिः॥
राहुस्तुग्रहकल्लोलोभ्रपिशाचोप्यथाह्निकः॥९४॥केतुर्ज्योतीरथ
स्तुस्याद्ब्रह्माधारोध्रुवश्वसः॥तत्क्षणेसूर्यमुक्तादिग्धुधैरंगारि
णीस्मृता॥९५॥आसन्नास्तमयाधीरैरुच्यतेचोपधूपिता॥सुनी
तिर्ध्रुवमातास्यान्मातादक्षस्यमारिषा॥९६॥छायापथोदेवप
थःसोमधारानभःसरित्॥दिनप्रणीस्त्वव्यधिपोभानेमिरथव्र
तः॥९७॥गभस्तिहस्तोंशुधरःखरांशुर्भास्विर्भगः॥वेदोदयःप्र
तिदिवामातुःपितुस्तमोपहः॥९८॥दिनमणिहरिहेलिव्रध्नभाकोषभाभृ
द्रथिखगपतंगेनाद्र्यःसप्तसप्तिः॥मिहरमणिरपीथाःकालसूत्पद्म
पाणिःखमणिररुणशूरावंशुमानंशुमाली९९छायास्यात्तपतीमंदजन
नीभूमयीवरी॥संज्ञातुयमकालिंदीरेवंतमनुदस्त्रसूः१००त्रसरेणुर्महा
वीर्यास्त्रातिस्वर्पासुवर्चला॥स्वरेणुद्युमेहीलाष्टीप्रियेचेतेविवस्वतः१अश्मनोरम
णोनूरुर्जटायुस्त्वरुणात्मजः॥इतिदिग्वर्गः॥कालस्त्वपृष्टजेद्दकोभसंते
भसदिस्यपि॥२॥पीथःपीयुस्तिथश्चाथवास्तोष्युष्टांशकेदिनम्॥उषा

---

मदुर्दिनस्यकुज्झल्यादिषट्कुहेलिकायाः८८अगस्त्यादिनव८९कौषीतक्यादित्री
ण्यगस्तिपत्न्याः९०प्राक्फाल्गुनेयादिनवबृहस्पतेः९१शुक्रादिसप्तनवार्चिरादिचत्वा
रिमंगलस्य९२बुधादिदश९३शनैश्चरादिपंचराह्वादित्रीणिअह्निकादिहेतोः९४ज्यो
तीरथादित्रीणिध्रुवस्यसूर्यस्यतत्दिशएकंएकं९५निकटसूर्योस्तदिशएकंएकंध्रुवमातुःएकं
दक्षमातुः९६छायापथादिचत्वारिस्वर्पथस्य॥दिनमण्याद्यष्टत्रिंशद्रवेः९८९९१००।छाया
दिपंचशनिमातुःसंज्ञादिचतुर्दशयममातुः१अश्मनादित्रीण्यरुणस्यजटाय्वादि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभातेगोसर्गःसायोस्तवोविकालके॥३॥रात्रीरक्षोजननीशर्वरी
चक्रभेदिनीघोरा॥श्यामायाम्यादोषातुंगीभौतीशताक्षीच॥४॥
वास्तुयोषानिशाख्याचवासतेयीतमानिशौ॥ यस्यांमत्तानिशि
श्वानःश्वनिशंश्वनिशाचसा॥५॥निःसंपातोर्धमरात्रःस्यात्सर्ववेस
रइत्यपि॥उच्चंद्रापररात्रौद्वौदर्शोमामावसीचसा॥६॥ भूतःकृष्णा
चतुर्दश्यांपौर्णम्यांधर्मवासरः॥ शक्रोत्सवोध्वजोत्थानंशा
रदीयूतपूर्णिमा॥७॥कोजागरःशरत्पर्वःकौमुदीचामरेस्त्रियाम्
यक्षरात्रिस्तुदीपालीचैत्रावल्यांमधूत्सवः॥८॥सुवसंतःकाममः
होवासंतीकर्दमीस्त्रियौ॥आमस्तुमासोवर्षांशोवत्सरस्तुयुगांश
कः॥९॥ऋतुवृत्तिर्मासमानःस्यात्कालग्रंथिरुर्वटः॥कालप्रभातं
शरदोप्रावृषातुजलार्णवः॥१०॥कौमुदःकार्तिकोमासःफाल्गुना
लस्तुफाल्गुनः॥ज्येष्ठामूलीयमिछंतिमासमाषाढपूर्वजम्॥११॥
कृतंसत्ययुगंत्रेताग्नायीद्वापरयद्वियौ॥कलिर्झर्झरकःकर्मयुगं
पापंतुपातकम्॥१२॥शल्यंतूस्तंचकल्कोऽथभद्रंमल्लंशिवंतथा
॥शंशुभंचाव्ययेथात्माजीवःपुरुषमुद्गलौ॥१३॥अंतर्यामीश्वरं
श्चांतःकरणंतुमनोनिगुः॥ ॥इतिकालवर्गः॥ ॥बुद्धिःपंडावि
दार्चावींविचारेतर्कनिर्णयौ॥१४॥गुंजाचर्चाथसिद्धांतोत्तरप
क्षसमाधयः॥कृतांतःपूर्वपक्षस्तुचोद्यंगीर्भणितिर्गिरा॥१५॥

---

द्वेकालादाष्ट॥२॥ वास्त्वादिचत्वारिदीनस्यउषादिद्वेप्रभातस्यगोसर्गादि
त्रीणिविकालस्य॥३॥रात्र्यादिसप्तदश४ श्वनिशादिद्वे५निःसंपातादित्री
ण्यर्धरात्रस्यउच्चंद्रादिद्वेपररात्रस्यदर्शादित्रीणि६एकंकृष्णचतुर्दश्याःपौर्ण
म्यादिद्वे शक्रोत्सवादिद्वे शारद्यादिपंचकोजागरायाः७ यक्षरात्र्यादिद्वे
दीपावल्याःचैत्रावल्यादिषट्॥८॥आमादित्रीणिमासस्य वत्सरादिष
ड्वर्षस्य९ कालप्रभातादिद्वेशरदृतोःप्रावृषादिद्वेवर्षर्तोः१० कौमुदादि
द्वौकार्तिकस्यफाल्गुनादिद्वौफाल्गुनस्यज्येष्ठस्यैकं ११ कृतादिद्वेत्रेतादिद्वेद्वा
परादिद्वेकल्यादित्रीणिपापादिपंच॥१२॥भद्रादिपंचशुभस्य आत्मादिषट्
१३॥अंतःकरणादित्रीणिमनसःबुद्ध्यादिचत्वारिविचारादिपंच॥१४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चो छांदंदस्तु निगमेः साम्न्यूकुर्थस्वरपत्तनमे॥ ब्रह्माक्षरंस्यादों
कारःप्रश्नदूती प्रहेलिका॥१६॥संज्ञाधिवचनंसद्यः कृतंलक्षण
नामनी।।व्यपदेशःप्रसिद्धिस्तुटंकारोथेन वस्तवः॥१७ शब्दाभि
लापोलभिधाभिधानेवाचकोध्वनिः॥ह्रासः कुहरितंचाथ मन्मनोग
द्गदध्वनौ॥१८॥ तूरंतुतूर्यंस्यात्ताड्यमानास्तुपटहादयः॥कर
र्धिःकरताली स्याध्वनिनादातुकाहलौ॥१९॥मड्डुकोमर्दनोमेद्रौ
ढक्काविजयमर्दलः॥द्रगडःप्रतिपत्तूर्यंडमरुः सूत्रकोणकः॥२०॥
नालीघटीयामनालीदंडढक्कायमेरुका॥यामघोषोथतान्त्रीस्यान्
मानरंध्रा विकालिका॥२१॥भवरुत्प्रेतपटहोमृत्युभंगुरकेध्वसः॥
रणतूर्यंतुसंग्रामपटहोभयडिंडिमः॥२२॥भक्ततूर्यंनृपाभोरंमल्लु
तूर्यमहास्वनः॥मुखवाद्यंवक्रनालंवेणोविवरनालिका॥२३॥
वारवाणिःप्रणेतास्याः कथकैकनटौसमौ॥सर्ववेशीलयारंभः
स्यात्तालावचरोनर्तः॥२४॥लयपुत्रीनटीनर्तःखड्गधारादिनर्त
के॥प्लवकःकेलकश्चाथभंडश्चाटुबटुःसमौ॥२५॥गायनेगाथक
स्त्रीणांहल्लीषंसहनर्तनं॥वात्सल्यशांतौतुरसौशृंगारकौशिकः
स्मृतः॥२६॥संभोगोविप्रलंभश्चतद्भेदौवर्णिकामसी॥मसिनी
व्यामनंतुस्याद्ध्यामोवल्गातुपांसनं॥२७॥डमरुस्तुचमत्कारः
प्रौढिस्तुकिपदेह्निको॥स्वेदःप्रश्रवणंस्विप्रोहुयोत्रीडोनटाधिके॥२८

---

सिद्धांतादिचत्वारिपूर्वपक्षादिद्वेप्रश्नस्यगीरादिचत्वारिवचसः१५छंदसा
दिद्वेनिगमस्यसामादित्रीणिब्रह्माक्षरादिद्वेओंकारस्यद्वौप्रहेलिकायाः
१६संज्ञादिषट्नाम्नःप्रसिद्ध्यादिद्वेनवादिद्वेस्तवस्य॥१७॥शब्दाद्यष्टध्व
नेःमन्मनादिद्वेगद्गदध्वनेः॥१८॥तूरादिद्वेताडितपटहादेःकरर्ध्यादिद्वे
करताल्याःध्वनिनालादिद्वेकाहलायाः१९मड्डुकादित्रीणिमृदंगस्यढक्कादि
द्वेविजयढक्कायाःद्रगडादिद्वेडमर्वादिद्वे२०नाल्यादिषट्दंडढक्कायाःत
न्त्रीलादित्रीणिमानरंध्रायाः२१भवरुदादित्रीणिप्रेतपटहस्यरणतू

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भामः क्रोधो निःसमस्तु शोके वीर्यं शुटीरता ॥ छलं मिषं च वैदग्धी
भंगिश्चेभनिमीलिका ॥२९॥ स्याच्चिंता चिंतयोर्थोहा दनं रणरेणं च
तत् ॥ परिहासः केलिमुखे केलिर्देवननर्मणी ॥३०॥ रामोद्भेदस्तु पु
लकस्त्वक्पुष्पं च त्वगंकुरैः ॥ स्वदोषगूहनं म्रक्षो रागसंगौ तु गृध्नु
ता ॥३१॥ काप्यकारः सयश्चिनेपापमाधायसंशनं ॥ कौकृत्यं विप्रती
सारो विबाधा नु विहेटनम् ॥३२॥ दुःखे लोको भवश्चैव संसारः कष्ट
कारकैः ॥ निर्वाणमस्तु को मोक्षः सीतीभावः शमो मृतम् ॥३३॥ इति
नाट्यवर्गः ॥ अथोः व्येपं स्यात्पाताले विरो कंश्वभ्रैमस्त्रियौ ॥ तम
संतु निशाचर्मनीलपंकं रजो बलम् ॥३४॥ दिनांतको विपद्भूतिः खलु
गृक्रौष्यनागभृत् ॥ डुंडुः स्त्रीस्याद् लूताजगरौ वथ द्लाद्लः ३५
ब्रह्मसर्पश्च लोलाच हिमुखा द्विरहीरणिः राजो द्विरलगर्दस्तु काल
सर्गो महाविषैः ॥३६॥ भांडपुष्पस्तु भुजगो भवेत्कौक्कुटिकंदलः ॥ गो
नासगोनसौ द्वालाद्लं हालहलं विषं ॥३७॥ अथा भ्रसो हि सनः
सम कोलश्च भेकभुक् ॥ कुंभीनसो मंडली च गरलं जंगमं विषं ॥३८॥

---

यादि त्रीणि २२ भक्तनूर्यादि द्वे मल्लतूर्यादि द्वे मुखवाद्यादि द्वे वेण्वादि द्वे २३ वंशीव
दकस्यैकं कथकादि द्वे सर्ववेश्यादि चत्वारि नटस्य ॥२४॥ लयपुत्र्यादि त्रीणि न
ट्याः पुवकादि द्वे नर्तकस्येरस्य भांडादि द्वे २५ गायनादि द्वे हल्लीषादि द्वे स्त्रीसह
नर्तनस्य वात्सल्यादि द्वे रसभेदयोः पृथगेकैकस्य शृंगारादि द्वे २६ संभोगादि द्वे
शृंगारभेदयोरेकैकं वर्णिकादि त्रीणि मस्याः व्यामनादि द्वे अवज्ञादि द्वे २७ ॥ डमर्षा
दि द्वे चमत्कारस्य प्रौढ्यादि द्वे स्वेदादि त्रीणि व्रीडादि द्वे लज्जायाः २८ भामादि द्वे क्रो
धस्य निःशमादि द्वे शोकस्य वीर्यादि द्वे छलादि द्वे वैदग्ध्यादि त्रीणि भंग्याः ॥२९॥
चिंतादि द्वे उहादनादि द्वे विवादस्य परिहासादि द्वे केल्यादि त्रीणि ३० रोमोद्भेदादि
चत्वारि पुलकस्य स्वदोषगूहनादि द्वे रागादि त्रीणि गृध्नुतायाः ३१ सपापकथन
स्यैकं कौकृत्यादि द्वे कुकृत्यस्य विबाधादि द्वे ॥३२॥ दुःखलोकादि चत्वारि संसा
रस्य निर्वाणादि षट् मोक्षस्य ३३ अधसादि द्वे पातालस्य विरोकादि द्वे श्वभ्रस्य तम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनंतो वासुकिः पद्मो महापद्मोऽपि तक्षकः ॥ कर्कोटः कुलिकः शंख
इत्यष्टौ नागनायकाः ॥ ३९ ॥ पुरी भोगवती चैषां भोगिन्यो नागकन्य
काः ॥ इति पातालभोगिवर्गः ॥ अकं दुःखमघं चैद्रीत्त्वलक्ष्मीः काल
कर्णिका ॥ ४० ॥ इति नरकवर्गः ॥ पाथोधिसिंधुमकरालयवारिरा
शीगंगाधरेंदुजनकास्तिमिरूर्मिमाली ॥ वार्धिर्मितद्रुतिमिकोषम
हाशयाश्चक्रीबंचशैलशिबिरं धरणीप्लवश्च ॥ ४१ ॥ पुमान्कचंग
लो वाकः कूलंकषपरांगवो ॥ तरंतोदारदः पेरूर्महीप्राचीरमद्रूयोः
॥ ४२ ॥ नदीनश्चाथ कमलं नीरं नाराः स्त्रियामिरा ॥ कंदकंजलम
स्थायमगाधे थांभसोऽभ्रमः ॥ ४३ ॥ तानुरोवापुगुल्मश्च कणलाभः
कुलंकुरः ॥ पुरोटिः पत्रझंकारे वटालः कूलहंडकः ॥ ४४ ॥ चुलुकोघ
नजंबाले दला द्व्येपंककर्वटः ॥ तरणो भेलके वारिरथो नौस्तरिकः प्लु
वः ॥ ४५ ॥ होडुस्तरांधुर्वद्देनं वहित्रं वार्वटः पुमान् ॥ पादारकः स्यात्पो
लिंदः पत्रबाले तुलाधटः ॥ ४६ ॥ समुद्रकफडिंडीरजलहासास्तु
फेनकैं ॥ कैवर्ते जालिकः छोटी कुपिनी स्यादथ प्लवः ॥ ४७ ॥ पलवः पं
जराखेटः करंडी तु जलेशयः ॥ आत्माशी शंबरो मूकोऽनिमेषो वल्कवानपि ॥

---

सः द्वात्रिंधकारस्य ॥ ३४ ॥ नागभृदादि द्वे उलूकादि द्वे जगरस्य हलाहलादि त्री
णि ब्रह्मसर्पस्य ३५ द्विमुखाद्यादि त्रीणि अलगर्धादि त्रीणि कालसर्पस्य ३६
भोंडपुष्पादि द्वे हालाहलादि त्रीणि विषस्य ॥ ३७ अभ्रसादि षट् सर्पस्य जां
गलविषस्यैकं ३८ अनंताद्यष्टनागराजानां पृथगेकैकस्य एकैकं ३९ ॥ नाग
पुर्या एकं भोगिन्यादि द्वे नागकन्यानां ॥ अकादि त्रीणि दुःखस्य सद्यान्नित्री
णि अलक्ष्म्याः ४० पाथोध्याद्येकविंशतिः समुद्रस्य ४१ ४२ कमलादि सप्त ज
लस्य अस्थाघ्यादि द्वे अगाधस्य अंभसांभ्रमादि ४३ ४४ चुलुकादि द्वे घनजं
बालस्य दलाढ्यादि द्वे पंककर्वटस्य तरणादि द्वे भेलकस्य वारिरथादि चत्वा
रि नौकायाः ॥ ४५ ॥ होडादि त्रीणि वहित्रादि द्वे पादारकादि द्वे पत्रबालादि
द्वे ४६ समुद्रकफादि चत्वारि समुद्रफेनस्य कैवर्तादि चत्वारि प्लवादि त्रीणि पंजराखेट

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥४८॥ मीनेवद्रालः पाठीनोमत्स्यराजस्तुरोहितः॥भालांकश्चा
श्चकुलिशेकटंकाष्टीलइत्यपि॥४९॥फलकीस्याच्चित्रफलीराज
ग्रीवोमद्गर्मदः॥कवयीक्रकचपृष्ठेकंकत्रोटोजलव्यधे॥५०॥
शफरःश्वेतकोलःस्यात्त्वशेटस्तुखलेशयः॥ इल्लिशेवारिकर्पूर
रगांगेयशफराधिपाः॥५१॥जलतालोप्यथचलत्पूर्णिमाचंद्रचंच
लौ॥जलवृश्चिकइंचाकेगंगाटेयोगलानिलः॥५२॥ शालःशकु
लगंडःस्यादंधाहिःकूचिकोदयोः॥ब्राह्मीतुपंकगडकोलघुगर्ग
स्त्रिकंटके॥५३॥तिर्यग्यानःकुलीरःस्यान्मुखास्त्रोहरिलोचनः
बहिःकुटीचरःपोताधानंतुस्याज्जलांडकं॥५४॥ जलरूपस्तुमक
रोमरोलिरसिंदूकः॥मीनरस्तुतुनागस्तुनक्रवाडवदारकः॥५५॥
नक्रस्तुवार्भटस्यांदंबुकिरादोंबुकंटकः॥जलसूकरमायादझषा
शनह्रदग्रहाः॥५६॥ जलकूर्मस्त्वंबुकीशोवसाढ्यःशिशुकेश्व
सः॥ उद्रस्तुजलमार्जारजलाखुनकुलप्लवाः॥५७॥मृत्तिकापुर्पु
शीवारिकृमिस्तुजलमक्षिका॥५८॥पटालुकाजलौकांबुसर्पिणी
वेणिवेधिनी॥ व्यंगस्तुनंदकोभेकोगूढवर्चाःकृतालयः॥रेकोजि

---

करंड्यादिपंचजलेशयस्य अनिमेषादित्रीणिमत्स्यस्य ४८ वद्रादिद्वेमत्स्यरा
जादित्रीणिरोहितस्यकुलिशादिद्वे॥४९॥फलक्यादिद्वेराजग्रीवादिद्वेमत्स्य
भेदस्यकवय्यादिद्वेक्रकचत्रोटादिद्वेमत्स्यविशेषस्य॥५०॥ शफरादिद्वेखेट
कादिद्वेखलेशयस्यइल्लिशादिपंच॥५१॥चलत्पूर्णिमादिद्वेमत्स्यभेदस्य
जलवृश्चिकादिद्वेइंचाकस्यगंगाटेयादिद्वे५२ शालादिद्वेअंधाल्स्यादिद्वे
ब्राह्म्यादिद्वेपंकगंडस्यलघुगर्गादिद्वेत्रिकंटकस्य ५३ तिर्यग्यानादिपंच
कुलीरस्यपोताधानादिद्वेजलांडकस्य॥५४॥जलरूपादिपंचमकरस्यतंतु
नागादित्रीणिग्राहस्य ५५ नक्रादिचत्वारिजलसूकरादिचत्वारि॥५६॥जल
कूर्मादिचत्वारिशिशुमारस्यउद्रादिपंच ५७ मृत्तिकादिद्वेपुर्पुर्योःवारिकृ
म्यादिद्वेपटालुकादिचत्वारिजलौकायाः॥५८॥ व्यंगादिसप्तभेकस्यपं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्रो ऽथ पंचांगगुप्तेक्रोडांघ्रिकच्छपौ ॥५९॥ गडुः किंचुलुकोंऽथांधु
र्विकिरश्चूडकश्चसः ॥ चुंटा चुंटी च चूडांऽथांधुकूपः कर्करांधुकः ॥६०॥
पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका ॥ अवघट्टावटौ तुल्यौ
तल्लं विल्लं तलं च तत् ॥६१॥ द्विजप्रपालवालं स्यात्केदारः पांशुमर्द
नः नदी निर्झरिणी रोधोवक्रा सागरगामिनी ॥६२॥ तलोदा चापि
ला सिंधुर्ऋषिकुल्या वहा च सा ॥ अध्वगा गांधिनी गंगा हैमवत्यु
ग्रशेखरा ६३ धर्मद्रवी सिद्धसिंधुस्तापी तु यमुना यमी ॥ रेवा तु पूर्वगं
गा स्यान्मुरला तु मुरंदला ॥६४॥ स्यादर्धगंगा कावेरी वासिष्ठी गो
तमी समे ॥ अथ गोदावरी गोला कुवलं तूत्पलं कुवं ॥६५॥ कैरवं
Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धिमन्यव:२॥२००॥ श्वश्रुरःस्वामिजनकः२साधुर्थीर्वरवत्स
ला२॥भग्नसार्थस्तथाविद्धो२हेलावुको।श्वविक्रयी२॥१॥गृह
वित्तोगृहपतिस्तुंबीपुष्पंलताबुजं२॥लोहिकारवरसोनि:१
स्यान्निलिंपस्त्रिदशः२स्मृतः॥२॥गंडूपदीभूलता२स्यान्मंद
रीघुर्घुरी२मता॥स्वच्छदंय गुलिसंदेशो२लंघनंचापतर्पणं२॥२
गजढक्कामदाम्नातः२शृंगारोगजमंडनं२॥प्रतिमोरणरंकः२
स्यात्वेटकःकदरःसृणि:॥३॥४॥वीचीजललताभृंडिः३फेणा
ग्रंबुद्बुदं विदुः॥जंबालोजलकल्कः२स्यादारणिःकुलदंडकः
२॥५॥विनाकृतंविरहितं२गंडूषोमुखपूरणे२॥काष्ठमल्लुःश
वयानं२कषाय१स्तूवरोरसः॥६॥पर्वावधिःपरग्रंथिः२पिंजो
लापत्रकाहला॥गोहलंछगलंगोविट्३परिघोहारकंटकः२
॥७॥कर्करंचूर्णखंडे२स्यात्कर्कसारकरंभकं२॥स्पर्द्धायाम
पिसंहर्षः२कठोरंकर्करं२विदुः॥८॥वंदीकवरकी२माहुरास
रीलघुखट्विका२घटराजःस्मृतःकुंभो२गर्गरीकलशिर्मता
॥९॥विदुरजन्यमुत्पातं२निर्घातेव्योममुद्गरः२॥पर्यंतिकागुण
भ्रंशो२॥गोष्टीकटशर्करा२॥१०॥उक्काकुलुक्कुगुंजा२स्यात्कु

---

देवग्रासार्थस्य२यज्ञस्थानभेदस्य२।१८।तृणपूल्याः२यथार्थस्य२व
धस्थानस्य२वेधनवेश्मनः२।१९।काष्ठाग्नेः२तृणाग्नेः२करीषाग्नेः२
ज्वराग्नेः२।२००।श्वशुरस्य२श्वश्र्वाः२कुटिलस्य२अश्वविक्रयिण२
॥१॥गृहपतेः२तुंबीपुष्पस्य२लोहपुष्पस्य२त्रिदशस्य२।२।भूलतायाः२
घुर्घुर्याः२अंगुलीध्वनेः२लंघनस्य२।३।गजढक्कायाः२गजशृंगारस्य
२रणकातरस्य२।४।अंकुशस्य३।४।तरंगस्य३फेनाग्रस्य२जलक
ल्कस्य२आरणेः२विरहितस्य२गंडूषस्य२शवयानस्य२कषायस्य
२।६।अंगुलीपर्वणः२पिंजोलायाः२गोमयस्य३हारलगुडस्य२।७कर्क
रस्य२दधिसक्तोः२स्पर्धायाः२कठोरस्य२।८।कवर्याः२लघुखट्वायाः२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पादावधि:

लक्कुस्तालमर्द्दलः २॥ सूत्रकोणेडुमरुकं २ सूत्रवीणा चलावु१
की॥११॥ मेलानंदोमसिमणि२र्लेखनी वर्णतूलिका २ धातूपल
कठिनिका २ मेलापत्रांजनं मसिः ३॥१२॥ तर्कुटीसूत्रलानर्कु२
र्झल्लोलस्तर्कुलासकः २॥ वर्तुलातर्कुपाटीस्या२ संजिकातूल
नालिका २॥१३॥ निर्वेष्टनंनाडिचीरंदग्धेष्टकास्याद्झामकम्
॥दोलाप्रेंखापुमान्प्रेंखो३ वारासनंवास्सदनं॥१४॥ पिष्टवर्त्ति१
स्तच्चमस२ श्चित्रापूपश्चरुव्रणः २॥ म्लेछितंपरभाषायां२लुंटि
कान्यापसारिणी२॥१५॥ भूकापूर्ट्टस्तृणमणि२श्छात्रगंडःप
दाद्यवित २॥ कोशकारःकाष्ठतंतु२र्घुणः स्यात्काष्ठलेखकः२॥
॥१६॥ विषशृंगीभंगरोलो२ वरोलस्तृणषट्पदः २॥ तुदुमोरंध्रब
भ्रुः२स्याद्दीनालिंगालिका २स्मृता॥१७॥ विदारुकक्रकचपादो
२द्रुणश्चालिश्चवृश्चिकः ३॥ पद्माक्षंपद्मबीजं२ चकर्णिका१
बीजमातृका २॥१८॥ रंगमाताभवेल्लाक्षा२ धीलटिर्दुहिता२
मता॥ चाटल्लोलश्चदुल्लोलो२ जेंगटोदोहृदः २स्मृतः॥१९॥ धौ
तांजलीधौतबली२ वज्रकंदुग्धपाचनं२॥ चित्रोक्तिःपुष्पशक
टी२ चासेचनमतृप्तिकृत्२॥२०॥ कालरात्रिर्भीमरथी२अ

---

कुंभस्य२कलश्याः२।९।उत्पातस्य२निर्घातस्य२गुणभ्रंशस्य२कट
शर्करा याः२।१०।उल्काग्नेः^२ करतालस्य^२ः३मरुकस्य सूत्रवीणायाः२।११। मसि
मणेः२कलमस्य२धातूपलस्य२मसेः३।१२। तर्कुट्याः३ तर्कुलासक
स्य२तर्कुपीठ्याः२ तूलनलिकायाः२।१३। निर्वेष्टनस्य२दग्धेष्टकायाः
२दोलायाः२जलस्थापितमंचस्य२।१४। यज्ञपात्रविशेषस्य२चित्रपि
ष्टकस्य२अपशब्दस्य२लुंटिकायाः२।१५। तृणमणेः२पादायवेत्तुः२को
शकृमेः२घुणस्य२।१६। विषशृंगिनः२तृणषट्पदस्य२रंध्रबभ्रोः२
दीनायाः२।१७। क्रकचपादस्य२वृश्चिकस्य३पद्मबीजस्य२पद्म
कोशस्य२।१८। लाक्षायाः२दुहितुः२सुचंचलस्य२गर्भिण्यभिलाषस्य^२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वाध्याये तिराकृतिः २॥ ब्रह्मवादः श्रुतादानं २ विम्बकद्रुरवेरि कः २॥२१॥ हिंसालुकः १ खादुकः स्यायोगितोऽलर्क २ इष्यते॥ द्रुगडस्तूर्यगंडः २ स्यादादर्शो मुकुरः २ स्मृतः॥२२॥ राहूत्सृष्टो रसोनः २ स्याद्धुंगरीकोलनासिका २॥ मयटस्तृणहर्म्यः २ स्यात्कुरंगो मत्तमेडुपः २॥२३॥ स्रवदंगः पणग्रंथि २ श्चितिकाकटिश्रृंखला २॥ विशारदः प्रसिद्धे २ स्यात्श्रीर्लक्ष्मीरिंदिरा ३ मता २४ ॥ ॥ इतिपादावधिः॥ ॥ प्राकृशाला वृकशब्दादधैः पादैस्तः परंशब्दाः॥ नानार्था अपि शब्दैर्गजशब्दात्प्रभृतिविज्ञेयाः २५

---

॥१९॥ धौतांजल्याः २ दुग्धपाचनाम्य २ सुदर्शकस्य २ अतृप्तिकृतः २।२० कालगन्ध्याः २ अस्वाध्यायस्य २ ब्रह्मवादस्य २ मृगयाकुशलश्वुन ।२१। हिंसालुकशुनः २ उन्मत्तशुनः २ सूर्पविशेषस्य २ आदर्शस्य २।२२। लसुनस्य २ कोलनासिकायाः २ तृणपुत्तहर्म्यस्य २ ।मत्स्यरसार्थकुटीरस्य २।२३ पणग्रंथेः २ कटिशृंखलायाः २ प्रसिद्धस्य २ लक्ष्म्याः २॥ २२५ ॥ ॥

---

॥ अथनानार्थः॥

क्षीरदारोगुडक्षोदेगुडेमधुनिकेष्यते॥ कृपीटपानमित्कंतिके तेषा नेचवारिधौ॥२६॥ रसालारमनापास्या न्मथितेदधिपाणिना॥ पोचलोहश्रुतिकदःश्रायावतेसरीसृपे॥२७॥ किटोद्रौलवणोपि द्रौभूषिकेरत्नदिरेपिच॥ विडाकरवीर्योचदर्विकारप्रभेदयो॥२८ कारंडेकरंडः स्यान्मधुकोपेदलाहके॥ रनटः श्लेष्माण्यधकूपे प्रहारांतरनकपो॥२९॥ पिच्छापूगजटाकोपेचोलिकाफणिलालयोः॥ पिचुलोस्फोटिकावाल्यागमावातास्तुपाशवः३०॥ धराकुरोनासफलेनासीराशा करेपिच॥ कोट्टारोनागरेकूपेपुष्करिण्यांच पाटके॥३१॥ नागोजनानागयष्टिःकौरसुंदरिकाकृमित्पूल्यं डःपूतिकोदेचगंधकीटेचदृश्यते३२॥ कटुकायांकचतकेक्वथि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ताशकुलाटनी॥क्रौंचादनस्तुपेंचुल्यांचिचोटकमृणालयोः॥
३३॥संतानिकाक्षीरसरेतथामर्कटजालके॥खड्गधेनुफलेफेने
परांजस्तैलयन्त्रके ३४॥भालांकोलोहितेदष्टःकरपत्रेचकच्छपे॥
संकरोगिनिचटत्कारेसंमार्जन्यपसारिते॥३५॥ गोधाकलंबिका
दंतिवधूषुचकटंभरा॥ पंकारःशैवलेसेतौसोपानेजलकुब्जके
॥३६॥पृष्ठशृंगीतिशब्दोयंदंशभीरौपृथूदरे॥मेघपुष्पंतुनादेये
पिंडाभ्रेसलिलेविदुः॥३७॥पित्तज्वरेकुलालस्यपवनेकूटपाल-
कः॥स्तनदंतेपिप्पलकंतथासीवनसूत्रके॥३८॥पाटलिको-
न्यमर्मज्ञेछात्रेस्यात्कालदेशिनि॥जिह्वापोवृषदंशेचस्याद्विं
द्रमदकर्मणि॥३९॥लाभेकामगुणोरूपेआमिषाख्यातुभोजने
॥छायापथेचदूर्वायांहरितालीध्वनिर्मतिः॥४०॥मालुधानश्चि
त्रसर्पेमहापद्मोपिदृश्यते॥उन्मत्तेक्षपणोनर्थकरेकार्यपुटध्व
निः॥४१॥सांघाटिकांविदुर्युग्मेकुट्टन्यांजलकंटके॥शराहतेच
सर्पेचप्रचलाकंप्रचक्षते॥४२॥चंद्रिकायामब्जधूलीरक्तांगेहरि
चंदनं॥स्त्रीरत्नेचहरिद्रायांलाक्षायांवरवर्णिनी॥४३॥कृकलासे
चित्रकोलेतृणगोधाध्वनिंविदुः॥डिंबंभयेचकललेफुप्फुसेचप्र
चक्षते४४॥धुंधुमारःशक्रगोपेगृहधूमेगृहालिके॥तिक्तपर्वाहि
लमोचीगुडूचीमधुयष्टिषु॥४५॥जलबिल्वःकर्कटकेपंचांगेज
लवल्कले॥चोलकीनागरंगेचकरीरेकिष्कुपर्वणि॥४६॥कुला
लचक्रेवाहनेदंडारःशरयंत्रके॥द्विग्जयेवरयात्रायांदंडयात्रांविदु
र्बुधाः॥४७॥उष्ट्रदासीसुतेचैवदासेरकइतिस्मृतः॥जलगुल्मो
जलावर्तेकच्छपेजलचत्वरे॥४८॥काहलावेणुवीणादिध्वनि
नानाध्वनिंविदुः॥ ॥घोंघेकारुंडिकायांचनादकध्वनिरिष्य
ते॥४९॥विद्यादुत्कलिकाशब्दमुत्कंठावीचिवाचकं॥दृष्टिवि
षसूचकेच द्विजिह्वःपरिकीर्तितः॥५०॥मदमत्ताविदग्धस्त्रीन
र्तकीषुचवाणिनी॥रोमावलीमेघमालाकरटीषुचकालिका॥५१

For Private and Personal Use Only

मंजुलोमधुरेकुंजेजलरंकेजलांचले॥अनुकंपस्तरस्वीस्या
त्तपस्वीचधृतव्रतः५२॥ ॥इतिनार्थार्धश्लोकावधिः॥ ॥
शाल्मवृकौकपिश्लानौनिष्ठुरःकठिनेऽत्रपे॥छर्दनोलंबुषेनिंबे
न्युष्टकल्पेतथोषिते॥५३॥ इसौकरीरेकोषांगेव्रणचिन्हेघुण
किणः॥नर्मठंचंचुकेपिंगेछेकःषडंघ्रिवक्रयोः॥५४॥धाराट
श्वातकेवाहेलंजःस्यात्पंगुकछुयोः॥नर्मटःखर्परेसूर्येगोकी
लोमुशलेहले५५मुंडिरीर्वारुकूष्मांडोफाणिर्गुडकलंबयोः॥तंडकःखं
जनेफेनेलङ्गाशिन्यांखगांतरे५६गजेपिनागमातंगौविशेषस्ति
लकेपिच॥निष्पारःसूर्यवातेपिसूत्रकंठोद्विजेपिच५७विदुष्यपि
स्मृतोवेधाःपुरंदेहेपिदृश्यते॥खरेपिकंठआख्यातःशरत्संवत्सरेपिच५८
॥लाक्षापिजतुकाप्रोक्तालग्नाचार्येपिहिंडिकः॥नौसेचने
पिवारुंडःपादालिंदेपिपंकिलः॥५९॥कचोगीष्पतिपुत्रेपिकुंदेपि
भ्रमरोबटौ॥भांडंभूषणमात्रेपिरुधिरंकुंकुमेपिच॥६०॥
गोमेदकेपिगंगोलःकटाहोनिरयेपिच॥मरीचेपिभवेत्कृष्ण
श्रृंगागेगुणिकाभवेत्॥६१॥शस्त्र्यामपिखङ्गधेनुर्निस्त्रिंशो
करुणेपिच॥स्कंधावारेऽपिकटकोविंदुस्तुविदुरेपिच॥६२॥
जलसूचिर्जलौकापिवेश्यायामपिपिंगला॥अद्रिरप्युदरा
वर्तेविशाखापिखनित्रकः॥६३॥भ्रमरःकामुकेपिस्यादंगी
कारेपिचाथकिं॥महालयेपितीर्थःस्यात्भोजनेपितथान्हि
कं॥६४॥बलिश्चामरदंडेपिपादपीठेपिपादपः॥गोदंतोहरि
तालेपिवानीरश्चित्रकेपिच॥६५॥आधारेप्याश्रयःप्रोक्तोग
जसंघेप्यवग्रहः॥कथितासाजटायांचमार्गणेपिमृगःक्व
चित्॥६६॥मूषिकापिभवेद्वीनाजटाटंकोहरेपिच॥अभ्रम
कृतेपिफाटंमृङ्गांडेऽप्युष्ट्रिकाभवेत्॥६७॥अंगसादेपिसद
नंवनदावेपिझिंझिमः॥दंतमांसेपिवेलास्यात्कुल्कंनारीधने
पिच॥६८॥निंबेपिहिंगुनिर्यासोमेलानंदेपिवार्दलं॥लेखन्यां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्णिकापिस्यात्कटिन्यामपिवर्णिका॥६९॥पटलेपिकासमन्दौदिष्टंदैवेपिकीर्तितं॥दाडिमेपिचहिंडीरंवंशोवेणौकुलेपिच॥२७०॥ ॥इतिनानार्थः॥ ॥

काव्यादीनामनंतत्वाच्छन्दादीनांविशेषतः॥क्वकदाकेनकिंदृष्टमितिकोवेदितुंक्षमः॥७१॥अतःशब्दःक्वदृष्टोयमर्थतश्चापिकीदृशः॥इतिकाव्यमलीकंस्यान्मात्सर्यमलिनात्मनो॥७२॥शब्दार्णवउत्पलिनीसंसारावर्तइत्यपि॥कोषावाचस्पतिव्याडिविक्रमादित्यनिर्मिताः॥७३॥आदायसारमेतेषामन्येषांचविशेषतः॥हारावलीनिर्मितेयंमयाद्वादशवत्सरैः॥७४॥उपास्यसर्वज्ञमनंतमीशंभूत्वातिथिःश्रीधृतिसिंहवाचां॥हारावलीद्वादशमाससमानैर्विनिर्मितेयंपुरुषोत्तमेन॥७५॥नानाकाव्यपुराणनाटककथाकोषेतिहासस्मृतिज्योतिः शास्त्रगजाश्वमानवभिषक्कोषान्प्रयत्नादपि॥दृष्ट्वान्यांश्चशाब्दिकैःसहकृताहारावलीयत्नतःकर्तव्योत्रनसंशयःसुमनसश्शब्दार्थलिंगेष्वपि॥७६॥सुधियाजनमेजयेनयत्नात्धृतिसिंहेनसमंनिरूपितेयं॥विदितोबहुदृश्वभिःकवींद्रैर्भुविकोषानुमतःश्रमोमदीयः॥७७॥हित्वामहाशाब्दिकताभिमानंमात्सर्यमन्यत्रमुहुर्निधाय॥हारावलींयःप्रकरोतिकंठेविदग्धगोष्ठीषुपरंसभाति॥७८॥ ॥इतिश्रीमहामहोपाध्यायपुरुषोत्तमदेवप्रणीताहारावलीपर्यवसिता

॥इतिहारावलीसमाप्ता

For Private and Personal Use Only

# धनंजयकोश १

श्रीगणेशायनमः॥ तन्नमामिपरंज्योतिरवाङ्मनसगोचरम्॥ नु
न्मीलयत्यविद्यांपद्विद्यामुन्मीलयत्यपि॥१॥ हृदयंहृतयंमुभयंय
मलंयुगलंयुगं॥ युग्मंद्वंद्वंयमंद्वैधंपादयोःपातुजैनयोः॥२॥ ऋषि
र्यतिर्मुनिर्भिक्षुस्तापसःसंयतोव्रती॥ तपस्वीसंयमीयोगीवर्णी
साधुश्चपातुवः॥३॥ दीक्षितंमौण्डंशिष्यंचेतमंतेवासिनंविदुः॥
कृतान्तागमसिद्धान्ताग्रन्थशास्त्रमतःपरम्॥४॥ भूमिर्भूःपृथि
वीपृथ्वीगह्वरीमेदिनीमही॥ धरावसुमतीधात्रीक्ष्माविश्वंभ
रावनिः॥५॥ वसुधाधरणीक्षोणीक्ष्माधरित्रीक्षितिश्चकुः॥
कुंभिनीलोर्वीराचौर्वीजगतीगौर्वसुंधरा॥६॥ तत्पर्यायधर
श्शैलस्तत्पर्यायपतिर्नृपः॥ तत्पर्यायरुहोवृक्षश्शब्दमन्यच
योजयेत्॥७॥ दरीभृदचलःशृंगीपर्वतस्सानुमान्गिरिः॥ नग
श्शिलोच्चयोद्रिश्चशिखरीत्रिककुन्मरुत्॥८॥ प्रस्थपार्श्वे
तटंसानुर्मेखलोपत्यकातटी॥ नितंबमेतोदंतश्चतहुानपिगि
रिःस्मृतः॥९॥ राजाधिपःपतिःस्वामीनाथःपरिवृढःप्रभुः॥ ई
श्वरोविभुरीशानोभर्तेन्द्रइनईशिता॥१०॥ अनोकहस्तरुः
शाखीविटपीफलिनोनगः॥ द्रुमोंऽघ्रिपःफलेग्राहीपादपो
वनस्पतिः॥११॥ तत्पर्यायचरोज्ञेयोहरिर्वलिमुखःकपिः॥ वा
नरःप्लवगश्चैवगोलांगूलोऽथमर्कटः॥१२॥ विपिनंगहनंकसम
रण्यंकाननंवनम्॥ कान्तारमटवीदुर्गंतच्चरस्स्याद्वनेचरः॥
१३॥ पुलिन्दःशबरोदस्युर्निषादोव्याधलुब्धकौ॥ धानुष्कोऽथ
किरातश्चसोरण्यानीचरःस्मृतः॥१४॥ वार्वारिकंपयोंभोऽ
बुपाथोर्णःसलिलंजलम्॥ क्षारंवनंकुशंनीरंतोयंजीवनंम
विषम्॥ तत्पर्यायचरोमत्स्यस्तत्पर्यायप्रदोघनः॥ तत्पर्या
योद्भवंपद्मंतत्पर्यायधरोम्बुधिः॥१६॥ पृथुरोमाषडक्षीणोया
दोवैसारिणोझषः॥ विशारीशफरीमीनःपाठीनोऽनिमिषस्ति
मिः॥१७॥ घनाघनोघनोमेघोजीमूतोऽभ्रवलाहकौ॥ पर्ज

न्यो मुदिरो नभ्राट् तडित्सौदामनी पविः ॥१८॥ आकालिकी स्त्र
पारुचिर्विद्युन्नत्पतिरंबुदः ॥ निर्घातमशनिं वज्रमुल्काशब्दं च
योजयेत् ॥१९॥ परिषत्कर्दमः पंकस्तज्जं तामरसं विदुः कमलेनं
लिनं पद्मं सरोजं सरसीरुहम् ॥२०॥ खरदण्डं कोकनदं पुंडरीकं
महोत्पलं ॥ इंदीवरं चारविंदं शतपत्रं च पुष्करं ॥२१॥ सौगंधिकं तु
कल्हारं हल्लकं रक्तसन्ध्यकम् ॥ स्यादुत्पलं कुवलयमथ नीलां
बुजन्म च ॥ इन्दीवरं च नीलेऽस्मिन् सिते कुमुदकैरवे ॥२२॥ तद्वती
बिसिनी ज्ञेया व्रतती वल्लुरी लता ॥ वल्लीनामानि योज्यानि वारिधि
र्वर्ण्यते धुना ॥२३॥ स्रोतस्विनी धुनी सिंधुः स्रवंती निम्नगापगाः
॥ नदीं नदो ह्रिरेफश्च सरिन्नाम्नी तरंगिणी ॥२४॥ तत्पतिश्च भवस्य
ब्धिः पारावारो ऽमृतोद्भवः अपारवारो ऽकूपारो रत्नमीनाभिधा
करः ॥२५॥ समुद्रो वारिराशिश्च सरस्वान्सागरो ऽर्णवः ॥ सीमोप
कण्ठं तीरं च पारं रोधो ऽवधिस्तटम् ॥२६॥ भंगस्तरंगः कल्लोलो
वीचिरुत्कलिकावलिः ॥ पाली वेलातटो च्छासी विभ्रमो यमु
दन्वतः ॥२७॥ मनुष्यो मानुषो मर्त्यो मनुजो मानवो नरः ॥ ना पु
मान्पुरुषो गोधो धवः स्यात्तत्पतिर्नृपः ॥२८॥ भृत्यो ऽथ भृतकः
पत्तिः पदातिः पदगो ऽनुगः भटो ऽनुजीव्यनुचरः शस्त्रजीवी च
किंकरः ॥२९॥ स्त्री नारी वनिता मुग्धा भामिनी भीरुरंगना ॥ ल
लना कामिनी योषित् योषा सीमंतिनी वधूः ॥३०॥ नितंबिन्यंब
ला बाला कामुकी वामलोचना ॥ भामा तनूदरी रामा सुंदरी यु
वती चेला ॥३१॥ भार्या जाया जनिः कुल्या कलत्रं गेहिनी गृहं ॥
महिला मानिनी पत्नी तथा दाराः पुरंध्रयः ॥३२॥ वल्लभा प्रेय
सी प्रेष्ठा रमणी दयिता प्रिया ॥ दृष्टा च प्रमदा कांता चंडी प्रणयि
नी तथा ॥३३॥ सती पतिव्रता सा ध्वी पतिवत्येकपत्न्यपि ॥ म
नस्विनी भवस्यां यो विपरीता निरूप्यते ॥३४॥ बन्धकी कुलटा मु
क्ता पुनर्भूः पुंश्चली खला ॥ स्वयं शांभिसारिका दूती स्वैरिणी सैफ

लीतयो ॥३५॥ गणिकाल्लंजिका वेश्या रूपाजीवा विलासिनी ॥ पण्य
स्त्री दारिका दासी कामुकी सर्ववल्लभा ॥३६॥ कान्तो हृदयेशः प्री
तः प्रियः कामी च कामुकः वल्लभो रमणः पतिः प्रेयान् विटश्च रमणो
वरः ॥३७॥ सावित्री जननी माता जनकः सविता पिता ॥ देहोप
घनः कायो वपुः संहननं तनुः ॥३८॥ कलेवरं शरीरं च मूर्तिरस्मि
न्भवः स्मृतः ॥ पुत्रः सूनुरपत्यं च तनूजो वात्मजः प्रजा ॥३९॥
उद्वहः स्यात् ... कान्नन्दनो ... नंधयो बालो
... दुहिता ... ॥४०॥ वयस्याली सहचरी ... सवयाः सखी
॥ आली विवर्जितं मित्रं सख्यं मित्रं सुहृत् ॥४१॥ सहकृत्वा
सहकारी सहायः सामवायिकः ॥ सनाभिः सगोत्रो बन्धुः सोदर्यो
... ॥४२॥ कनीयानग्रजो ज्येष्ठो भ्रातृजायी ... ननांदा
॥ भर्तुः स्वसा ननान्दा स्यान्मातुलानी ... ॥४३॥ वैर्यरा
तिरमित्रोऽरिर्द्विट् सपत्नो द्विषद्रिपुः ॥ भ्रातृव्यो दुर्जनः शत्रुर्दुष्टो हृ
षीकलो हितैः ॥४४॥ दीधितिर्भानुरुस्त्रो ऽंशुर्गभस्तिः किरणः कर
पादौ रुचिर्मरीचिर्भास्तेजोऽर्चिर्गौर्द्युतिः प्रभा ॥४५॥ दीप्तिर्ज्योतिर्म
हो धाम रश्मिरूर्ज्यो विभावसुः ॥ शीतोष्णप्रायपूर्वेन्वेतद्गुना विंदुभा
स्करौ ॥४६॥ शशी विधुः सुधारश्मिः कौमुदीकुमुदप्रियः ॥ कलाभृ
च्चन्द्रमाश्चन्द्रः कान्तिमान्नाथधीश्वरः ॥४७॥ इन्दुर्निशानितारक्षन
क्षत्रतत्पतिर्निशा ॥ क्षणदा रजनी नक्तं दोषा श्यामा क्षपाकरः ॥
॥४८॥ तरणिस्तपनो भानुर्ब्रध्नः पूषार्यमा रविः ॥ तिग्मः पतङ्गो द्युम
णिर्मार्तण्डोऽर्को ग्रहाधिपः ॥४९॥ इनः सूर्यस्तमोध्वान्ततिमिरारि
र्विरोचनः ॥ दिनं दिवाहर्दिवसो वासरस्तान्करश्च सः ॥५०॥ चक्र
वाकाब्जपर्यायबन्धुः कुमुदविप्रियः ॥ यमुनायमकानीनजन
कः सविता मतः ॥५१॥ वाहोऽश्वस्तुरगो वाजी हयो धुर्यस्तुरं
गमः ॥ सप्तिरर्वा हरी रथ्यः सप्ताश्वः स्वमपूरवान् ॥५२॥ खं वि
हायो वियद्व्योम गगनं नाकाशमम्बरं ॥ द्यौर्नभोऽन्तरिक्षं च मेघ

मेघपथः वायुपथ — पक्षिणः विद्याधरस्य पि

वायुपथोऽप्ययं ॥५३॥ तच्चरः खेचरस्तगः पक्षी पत्री पतत्र्यपि ॥ श-
कुन्तः शकुनिर्विश्वं पतंगो विष्किरो वयाः ॥५४॥ जाङ्गलं पिशितं मां-
सं पलं पेशी च तत्प्रियः ॥ यातुधानस्तथा रक्षो राक्ष्यादिश्च रूष्यते ॥
५५॥ सुरोऽदितेस्तडिङ्क्त्वा सेन्द्रो देवः सुरोऽमरः ॥ स्वर्गः स्वर्गोऽथ
लोकस्त्वत हास स्त्रिदिवो मनः ॥५६॥ तत्पतिः शक्र इन्द्रश्च सुनासी-
रः शतक्रतुः ॥ प्राचीनबर्हिः सुत्रामा वज्री चाखण्डलो हरिः ॥५७
शत्रुर्बलस्य गोत्रस्य पाकस्य नमुचेरपि ॥ वृत्रहा च सहस्राक्षो गो-
त्रभिद्वज्री पुरन्दरः ॥५८॥ विडौजाश्चाप्सरोनाथो वासवो हरिवा-
हनः ॥ मरुत्वांश्च मघवा च वृषा चैरावणाधिपः ॥५९॥ शतमन्यु-
स्तुराषाड् पुरुहूतश्च कौशिकः ॥ संक्रन्दनोऽथ मघवान्पुलोमा-
रिर्मरुत्सखः ॥६०॥ काष्ठा ककुद्दिगाशा च दश्या कन्यान्तराश्च हरित् ॥
तत्पतिर्यात्यरं योऽन्यं प्राक्षेपालगजोऽम्बरम् ॥६१॥ पवनः पवमानश्च
वायुर्वातोऽनिलो मरुत् ॥ समीरणो गन्धवाहः श्वसनश्च सदागतिः
॥६२॥ नभस्वान्मातरिश्वा च चरण्युर्जवनोऽनलः ॥ प्रभञ्जनोऽस्य प-
र्यायपुत्रो भीमाञ्जनात्मजौ ॥६३॥ तत्सखोऽग्निः शिखी वह्निः पा-
वकश्चाशुशुक्षणिः ॥ हिरण्यरेताः सप्तार्चिर्जातवेदास्तनूनपात् ॥६४॥
स्वाहापतिर्हुताशश्च ज्वलनो दहनोऽनलः ॥ वैश्वानरः कृशानुश्च
लोहिताश्वो विभावसुः ॥६५॥ वृषाकपिः शमीगर्भो हव्यवाहो हु-
ताशनः ॥ धनंजयो वीतिहोत्रः कृष्णवर्त्मा द्युषर्बुधः ॥ तदादिसूनुः
सेनानीः स्कंदस्कंदः शिखिवाहनः ॥६६॥ कार्त्तिकेयो विशाखश्च कुमा-
रः षण्मुखो गुहः ॥ शक्तिमान्क्रौञ्चभेदी च स्वामी शरवणोद्भवः ॥ ष-
डजन्मा ब्रह्मचारी च महोजा दैत्यघातकः ॥ तत्पिता शंकरः शंभुः
शिवः स्थाणुर्महेश्वरः ॥६७॥ त्र्यंबको धूर्जटिः शर्वः पिनाकी प्रम-
थाधिपः ॥ त्रिपुरारिर्विशालाक्षो गिरिशो नीललोहितः ॥६८॥ रुद्रो दु-
मौलीयज्ञारिस्त्रिनेत्रो वृषभध्वजः ॥ उग्रः शूली कपाली च शिपिवि-
ष्टो भवो हरः ॥६९॥ उमापतिर्विरूपाक्षो विश्वरूपः कपर्द्यपि ॥ भर्गो

रथी: त्रिपथगा जान्हवी हिमवत्सुता मन्दाकिनी द्युपथा पथधुनी
गंगानदीश्वरी विधिर्वेधा विधाता च द्रुहिणोऽजश्चतुर्मुखः॥७०
पद्मपर्याययोनिश्च पितामहविरंचिनौ॥ हिरण्यगर्भः स्रष्टा च प्र
जापतिः सदस्वपात्॥७१॥ ब्रह्मात्मभूरनन्तात्मा कस्तत्पुत्रो
हि नारदः॥ कृष्णो दामोदरो विष्णुरुपेन्द्रः पुरुषोत्तमः॥७२॥ के
शवश्च हृषीकेशः शार्ङ्गी नारायणो हरिः॥ केशी मधुर्बलिर्बाणो
हिरण्यकशिपुर्मुरः॥७३॥ तदादिसूदनः शौरिः पद्मनाभोऽप्य
धोक्षजः॥ गोविन्दो वासुदेवश्च लक्ष्मीः श्रीर्गोमतीन्दिरा॥७४॥
तत्पतिः शैलभूम्यादिधरश्चक्रधरस्तथा॥ तत्पुत्रो मन्मथः कामः
सूर्पकारिरनन्यजः॥७५॥ कायपर्यायरहितो मदनो मकरध्वजः॥
शिलीमुखः शरो बाणो मार्गणो रोपणः कणः॥७६॥ इषुः कांडे क्षुर
प्रं च नाराचं तोमरं खगः॥ कार्मुकं धन्व चापं च धुर्मेको दंडके धनुः
॥७७॥ शिलीमुखादेरसनं तत्कोटिमटनीं विदुः॥ पुष्पं सुमनसः फु
ल्लं लतान्तं प्रसवो द्रुमो॥७८॥ प्रसूनं कुसुमं दैपं तदायस्त्रः शरः
स्मरः॥ स्वान्तमास्वनितं चित्तं चेतोऽन्तःकरणं मनः॥७९॥ हृदयं विशि
खां कृतमारस्तत्र भवो मतः॥ मौर्वी जीवा गुणो गव्या ज्या लिर्भृङ्गः
शिलीमुखः॥८०॥ भ्रमरः षट्पदो ज्ञेयो द्विरेफश्च मधुव्रतः॥ मौर्व्या
दिप्रान्तमल्यादि कन्दर्पास्य भवेद्धनुः॥८१॥ हेतिरस्त्रं आयुधं श
स्त्रं पुष्पायस्त्रः स्मरो मतः॥ ध्वजः पताका केतुश्च चिन्हं तद्धैजयं
त्यपि॥८२॥ तत्स्तदंतो झषाद्यादिशभो विघ्नकरः स्मरः॥ कौक्षेयकोऽसिर्निस्त्रिं
शः कृपाणः करवालकः॥८३॥ तरवारिर्मंडलाग्रं खड्गनामा च लिं विदुः अक्षौहि
णी बलानीकं वाहिनी सा धनं चमूः॥ ध्वजिनी सेना पृतना सैन्यं दंडो वरूथिनी॥
कदनं समरं युद्धं संयुगं कलहं रणम्॥८५॥ संग्रामः सम्पराया जी
संपदां द्वंद्वं महाहवम्॥ गजो मतंगजो हस्ती वारणोऽनेकपः करी॥
॥८६॥ दन्ती स्तम्बेरमः कुंभी द्विरदेभौ मतंगमः॥ शुण्डालः साम
जो नागो मातंगः पुष्करी द्विपः॥८७॥ करेणुः सिन्धुरस्तेषु यन्तानि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तानिषाद्यपि॥ नागाद्यरिः कंठीरवो मृगेन्द्रः केसरी हरिः॥८८॥
व्याघ्रश्च शूरः शार्दूलः शरभोऽष्टापदो ऽष्टपात्॥ क्रोडो वराहो दं
ष्ट्री च घृष्टिः पोत्री च शूकरः॥ कोलः किरिः किटिश्चौणीभूदारः क
र्दमप्रियः॥८९॥ उष्ट्रो मयः शृंखलकः करभः शीघ्रगामिकः॥
कौलेयकः सारमेयो मंडलः श्वा पुरोगतिः॥९०॥ जिह्वापो ग्राम
शार्दूलः कुक्कुरो रात्रिजागरः॥ हेम चाष्टापदं स्वर्णं कनकार्जु
नं काञ्चनम्॥९१॥ सुवर्णं हिरण्यं भर्म जातरूपं च हाटकम्॥ त
पनीयं कलधौतं च कार्त्तस्वरं शिलोद्भवं॥९२॥ रूप्यं रजतं गुलि
काशुक्तिजं मौक्तिकं तथा॥ वित्तं वस्तु वसु द्रव्यं स्वार्थं रा द्रविणं
धनम्॥९३॥ कः स्वरतस्पतिं प्राहुः कुबेरं चैकपिंगलम्॥ वैश्रवणं
राजराजं मनुत्तराशापतिं तथा॥९४॥ अलकानिलयं श्रीदं धनपर्या
यदायकम्॥ राष्ट्रं जनपदो नग्रो जनान्तो विषयः स्मृतः॥९५॥ पु
री पूः पुरं नगरी पत्तनं पुटभेदनं॥ वक्त्रं लपनं आस्यं च वदन्ति व
दनं मुखम्॥९६॥ आननं श्रवणं श्रोत्रं श्रवः कर्णः श्रुतिं विदुः॥
दृगक्षि चक्षुर्नयनं दृष्टिर्नेत्रं विलोचनम्॥९७॥ कटाक्षः केकरापांगं
विभ्रमस्तस्य वेल्लितम्॥ दन्तवासोऽधरोऽप्योष्ठो वर्णितो दश
नच्छदः॥९८॥ शिरोधरो गलो ग्रीवा कंठश्च धमनी धमिः॥ दोर्दोषा
च भुजा बाहुः पाणिर्हस्तः करस्तथा॥९९॥ प्राहुर्ना हृशिरोऽंसं च
हस्तशाखा करांगुलिः॥ नासा घ्राणं मुरो वक्षः कुक्षिः स्याज्जठरो
दरम्॥१००॥ स्तनं पयोधरं कुचौ वक्षोजा इति वर्णितौ॥ कटिर्नि
तम्बः श्रोणी च जघनं जानु जन्तु च॥१॥ चलनं चरणं पादः क्र
मोऽङ्घ्रिश्च पदं विदुः॥ शिरो मूर्धोत्तमांगं कं प्रारभ्यं प्ररितं रितम्॥
॥२॥ वाग्वचो वचनं वाणी भारती गीः सरस्वती॥ सिंहद्विपधने
गर्जो हेषा श्वे बृंहितं गजे॥३॥ स्फीतं कृतं धेनुकलभैः स्तनितं
जलदे तथा॥ स्यन्दने चीत्कृतं मन्त्रे भटे घृष्टौ च हुंकृतम्॥४॥
सीत्कृतं मणितं कामे स्वडूतं शृंखलापुधे॥ मंजीरकं नूलाका

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिंनूपुरंतत्रैकरुतं॥५॥ काकुतंमरुतिक्रौंचहंसयोःध्वंक्तंमतं
॥प्रतीतसस्तुतलब्धदृष्टपरिचितस्मृतं॥६॥ संस्थितंदशमीस्थं
चपरासुंचमृतंविदुः॥ खेदोदुःखोप्यमर्षश्चरुट्कोपक्रोधमन्यवः॥
७॥ हर्षःप्रमोदःप्रमदोमुत्तोषानन्दमुत्सवाः॥ कृपानुकम्पानुक्रो-
शोदूतोक्तिःकरुणादया॥८॥ शेमुषीधिषणाप्रज्ञामनीषाधीः
स्तथाशयः॥ प्राज्ञोमेधाविमान्विद्वानभिरूपोविचक्षणः॥९॥ प
ण्डितस्सूरिराचार्योवाग्मीनैपायिकःस्मृतः॥ पारिषद्योबुधः
सभ्यःसदस्यःसत्सभोचितः॥१०॥ आस्थानाधिपतीराजाराज्ञ
सूयोनृपक्रतुः॥ विष्टरंमल्लकंपीठमासंदीमासनंविदुः॥११॥ चे
लंनिवसनंवासःक्षीरमम्बरमंशुकं॥ वस्त्राद्यन्तदिगाद्यादिसंजि
तोवृषभेश्वरः॥१२॥ विष्टपंभुवनंलोकोजगत्तस्यपतिर्जिनः॥ स
र्वज्ञोवीतरागोर्हन्केवलीधर्मचक्रभृत॥१३॥ तीर्थंकरस्तीर्थकर
स्तीर्थकृद्दिव्यवाक्पतिः॥ वर्षीयान्वृषभोज्यायान्पुरुःपाद्यःप्रजा
पतिः॥१४॥ ऐक्ष्वाकुःकाश्यपोब्रह्मागौतमोनाभिजोग्रजः॥ स
न्मतिर्महतिर्वीरोमहावीरःस्यकाश्यपः॥१५॥ नाथान्वयोव
र्द्धमानोयत्तीर्थमिहसांप्रतम्॥ कुंकुमंरुधिरंरक्तंवरसूरीमृग
नाभिजा॥१६॥ कर्पूरंघनसारंचहिमंसेवेतपुण्यवान्॥ समाल
भोगरागश्चप्रसाधनविलेपनम्॥१७॥ भूषणाभरणंकल्पमाल्यं
मद्वे मालागुणस्रजम्॥ मेखलारशनाःकांचीहेमपर्यायसूत्रकं॥१८॥
कटीस्त्र श्रोणीबिम्बेकटीसूत्रमानसूत्रमिवाहितं॥ मदिरामद्यमैरेयंसी
नंकष्य ने धुकादम्बरीमिरा॥१९॥ प्रसन्नावारुणीहालामधुवारासुरां
विदुः॥ शुण्डा॥ सवकरोप्येषःशौण्डोगर्वितमद्यपौ॥२०॥ सत्त्रो
स्तिपूतपानेषुविचित्राशब्दपद्धतिः॥ सर्पिर्हैयंगवीनाज्यंदुग्ध
क्षीरामृतंपयः॥२१॥ उदश्विन्मथितंतक्रंकालसेयंपिबेद्गुरुः॥
प्रायोवयोदशाःस्नेहपूर्णयौवनकंविदुः॥२२॥ तारुण्यंयौवनंचा
त्योवार्द्धनःस्थविरोमतः॥ वंशोन्वयोन्ववायःस्याद्वन्वायःसंततिः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुले॥२३॥उद्योवर्गश्चसंतानः काव्यमेवकवेःस्थितिः॥हंसो
मरालश्चक्रांगोहंसवाहःसनातनः॥२४॥मयूरोबर्हिणःकेकी
शिखीप्रावृटिकस्तथा॥नीलकंठःकलापीचशिखंडीनर्त्तप्रियः
हः॥२५॥वरटावारलीहंसीकोकईहामृगोरकः॥हरिणोमृगःश
षतस्तदंकशर्वरीकरः॥२६॥पन्नगोहिर्विषधरोलेलिहानोभुजं
गमः॥नागोरगःफणीसर्पस्तद्वैरीविनितात्मजः॥२७॥सुपर्णोग
गरुडस्तार्क्ष्योगरुत्मान्शकुनीश्वरः॥इन्द्रजिन्मंत्रपूतात्मावैन
तेयोविषक्षयः॥२८॥खमिन्द्रियंहृषीकंचस्रोतःसंकरणंविदुः॥
पुण्यंभाग्यंचसुकृतंभागधेयंचसत्कृतम्॥२९॥अघमंहश्चदुरितं
पाप्मापापंचकिल्बिषम्॥वृजिनंकलिलमेनोदुष्कृतंलज्जयीदमः
॥३०॥सदनंसद्मभवनंधिष्ण्यंवेश्मास्थमंदिरम्॥गेहंनिकेतनो
ग्रारंनिशांतंनिर्वृतंगृहम्॥३१॥वसत्यावसथावासंस्थानंधामा
स्पदंपदम्॥निकायंनिलयंरूपंशरण्यंविदुरालयम्॥३२॥खेयं
खातंचपरिखावप्रंस्याद्धूलिकुट्यमम्॥प्राकारःपरिधिःशालः
प्रतोलीगोपुरोवृतिः॥३३॥प्रासादसौधहर्म्याणिनिर्व्यूहोमत्तवारण
॥वातायनमनालम्बमालंब्यमुखमासनम्॥३४॥समःसवर्णःस
जातिस्सदृक्षःसदृशःसदृक्॥तुल्यःसधर्मःसरूपस्तत्कलाकसो
पमाभिधा॥३५॥विन्मन्योवर्धमानश्चगुरुःस्थानोम्बुजाननः॥
सिंह नादीतिपर्यायमुपमानेषुयोजयेत्॥३६॥व्यपदेशंनि
भंव्याजंपदंन्यतिकरंछलम्॥छद्मरत्तान्तमुल्लेखाशब्दमन्य
त्रनिर्णयेत्॥३७॥व्रातःपुञ्जःसमाजश्चसमूहःसन्ततिर्व्रजः
॥व्यूहोनिकायोनिकरोनिकुरंबःकदंबकम्॥३८॥ओघःसमुदयः
संघसंघातःसमितिस्ततिःनिचयःप्रकरःपंक्तिः पशूनांसमजो
व्रजः॥३९॥समीपाभ्यासमासन्नमभ्यर्णंसन्निधिंविदुः॥अवि
दूरंचनिकटंमवलग्नमनन्तरम्॥४०॥जित्याहलिहलंसीरंलांगं
लंतत्करोवलः॥रेवतीदयितोनीलवसनःकेशवाग्रजः॥४१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्जुनः फाल्गुनो जिष्णुः श्वेतवाजी कपिध्वजः ॥ गांडीवकामुं-
कीसव्यसाचीमध्यमपांडवः ॥ ४२॥ वृषसेनासुनिर्मोको दैत्यारि
शक्रनंदनः ॥ कर्णभूलिः किरीटी च शब्दभेदी धनंजयः ॥ ४३॥
समवर्त्ती यमः कालः कृतान्तो मृत्युरन्तकः ॥ कुरुकीचकयोः श-
त्रुर्वायुपुत्रो वृकोदरः ॥ ४४॥ धर्मात्मजो जातरिपुः कौंतेयो भरता-
न्वयः ॥ कौरव्यो राजलक्ष्मा च सोमवंशो युधिष्ठिरः ॥ ४५॥ कृ-
ष्णं नीलं सितं कालं धूमं धूम्रमलिप्रभं ॥ नमोऽन्धकारस्तिमिरं ध्वा-
न्तं सन्तमसं तमः ॥ ४६॥ श्वेतार्जुनः शुचिः श्वेतो वलक्ष्यं सितपा-
ण्डुरम् ॥ शुक्लावदातं धवलं पाण्डु शुभ्रं शशिप्रभम् ॥ ४७॥ लोहि-
तो रक्तमाताम्रं पाटलं विषदारुणम् ॥ गौरं पीतं हरिद्राभं पलाशं
हरितं हरित् ॥ ४८॥ हरिणी लोहिनी शोणी गौरी श्यैनी पिशंग्य-
पि ॥ सारङ्गी शबरी काली कल्माषी नीलपिंजरी ॥ ४९॥ पुरागम-
धु किंजल्कं मकरन्दं च कौसुमम् ॥ उपचाराद्रजः पांसुं रेणुं धूलीं
च योजयेत् ॥ ५०॥ कलंकावद्यमलिनं किंजल्कं लक्ष्म लांछनं
निर्वाधमंधमपंकं मलीमसं मपि त्यजेत् ॥ ५१॥ जनोदाहरणं की-
र्तिं साधुवादं यशो विदुः ॥ वर्णं गुणावलिं ख्यातिमवधानं तु साह-
सम् ॥ ५२॥ प्रेष्यादेशनिदेशाज्ञा नियोगः शासनं तथा ॥ सन्देशः
प्रियवार्त्ता प्रवृत्तिः किम्वदन्त्यपि ॥ ५३॥ कठोरं कठिनं स्तब्धं कर्क-
शं परुषं दृढम् ॥ अश्लीलं कोदलं फल्गु कोमलं मृदु पेशलम् ॥
॥ ५४॥ प्रत्यग्रं साम्प्रतं नव्यं नवं नूतनमग्रिमम् ॥ पुराणं जरठं जी-
र्णं प्राक्तनं सुचिरंतनम् ॥ ५५॥ भौरं दे होर्षचामन्त्रे कच्चित्किन्त्वनं
संशये ॥ द्राक् क्षणे ह्यायसपदि निमेषं मनरवल्वलम् ॥ ५६॥ उच्चै-
रुच्चावचं तुङ्गमुच्चमुन्नतमुच्छ्रितम् ॥ नीचं न्यग्गातनं कुब्जं नीचे-
र्ह्रस्वं नपेत्परम् ॥ ५७॥ अमा सह समं साकं सार्द्धं सत्रं सजूः समाः
॥ सर्वदा सततं नित्यं शश्वदात्यन्तिकं सदा ॥ ५८॥ शृंगी इति हरिर्ना
यद्वा हरिस्तिर्यंच मृगिणेः ॥ गोश्चतुष्पात्पशुस्तत्र महिषी नाम देहिकौ ॥ ५९

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वियोगमदनावस्थाविरहपल्लकविदुः॥प्रेमाभिलाषमालम्बरा
गःस्नेहमतःपरम्॥६०॥संहितःसहितंयुक्तंसंपृक्तंसंभृतंयुतं
॥संस्कृतंसमवेतंचप्राहुरन्वीतमन्वितम्॥६१॥वर्त्म ध्वासं
रणिःपन्थामार्गप्रचरसञ्चरौ॥त्रिमार्गकानामगङ्गाघोषागो
मण्डलंव्रजः॥६२॥कृतीनदीष्णोनिष्णातःकुशलोनिपुणःपटुः
॥क्षुण्णःप्रवीणःप्रागल्भःकोविदश्चविशारदः॥६३॥विदग्धश्चचतु
रोधूर्त्तश्चाटुकृत्कितवःशठः॥कापिनागरिकोज्ञेयोगोत्रसंज्ञ
कंनामैतत्॥६४॥मुग्धोमूढोजडोनेडोमूकोमूर्खश्चकद्वदः॥
संदेवानांप्रियोप्राज्ञोमन्दोधीनामवर्जितः॥६५॥पाष्टिकःकु
लमःशालिव्रीहिःस्तवकरिस्तथा॥वत्सःशकृत्करिर्जातिःषोडः
षट्दशनःस्मृतः॥६६॥शौण्डीरोगर्वितःस्तब्धोमानीचाहङ्कृद्
धृतः॥उत्क्षीवेउद्धुराद्दप्तौनीचश्चपिशुनोधमः॥६७॥चौरैका
गारिकस्तेनतस्करप्रतिरोधकाः॥निशाचरोगूढचरोहैरिकःप्र
णिधीश्वरैः॥६८॥प्रस्तरोपलपाषाणदृषद्धातुशिलाघनाः॥
तत्रजातमयोलोहंशातकुंभंनपेत्परम्॥६९॥साधीयोत्यर्थम
त्यंतनितांतंसुष्टुवैभृशम्॥स्फुटंसाधुखलुस्पष्टंविशदंपुष्कलं
मलम्॥७०॥चित्राश्चर्याद्भुतंचोद्यंविस्मयःकौतुकोप्यहो॥
अभियोगोद्यमोद्योगाउत्साहोविक्रमोमतः॥७१॥क्षामंशान्तं
कृशंक्षीणंहीनंजीर्णंपुरातनम्॥शीर्णावसानंन्यूनंचधैर्य
शौर्यंचपौरुषम्॥७२॥रहोनुरहसोपांशुरहस्यंचाभिनन्तिकः
॥कीनाशःकृपणोलुब्धोमुग्धोदीनोभिलाषुकः॥७३॥क्षिप्रा
शुमङ्क्षुस्वरंशीघ्रंसहसाद्रुतिद्रुतम्॥तूर्णंजवःस्यद्रोरंहोरयो
वेगस्तरोलघु॥७४॥पाशनीतःसितोवद्धस्सन्धानीतोनियन्त्रि
तः॥निपामितःशृङ्खलितोनिबद्धःपाशितोरिपुः॥७५॥का
न्तंचकमनंकम्रंकमनीयंमनोहरम्॥अभिरामंरमणीयंरम्यं
सौम्यंसुंदरं॥७६॥चारुश्लक्ष्णंचरुचिरंप्रशस्तंहृद्यवल्गुरम्॥

For Private and Personal Use Only

दर्शनीयं मनोज्ञं च चित्तपर्यायहारि च॥७७॥ अवश्यायस्तुषारश्च प्रालेयं तु हिनं हिमम्॥ नीहारं तत्करं विद्धि मृगांकं रोहिणीपतिम्॥७८॥ पुन्नागं सन्नरं प्राहुस्तिलकं च विशेषकम्॥ ललाटिका ललामापि पूर्णवादं तथा द्रुमं॥७९॥ अन्जनं कज्जलं नागं गं नेपाटलमारुणं॥ शालपरिधिं वृक्षं च कुल्यां स्त्रीं सारिणीं विदुः॥८०॥ चारो वसर्पः प्रणधिर्निगूढपुरुषश्चरः॥ तद्वानुक्तः सहस्रासः सत्यार्थः सूनृतामृतम्॥८१॥ अत्यन्तायं चिरायेति प्रहे कस्माद्दृलादिति॥ प्रयेणो ति कुतश्चेति विभक्तिप्रतिरूपकं॥८२॥ रम्भा स्त्री कदलीचिन्हं मोचासारतरुश्च सा॥ कीचकोध्वनिमद्वेणुस्तालो गेपक्रमोद्भवः॥८३॥ पुष्करं मुरजं पद्मं हस्तिहस्ताग्रनायकम्॥ निस्तलं वर्तुलं वृत्तं स्थपुटं विषमोन्नतं॥८४॥ दीर्घं प्रांशुं विशालं च बहुलं पृथुलं पृथु॥ उल्वणं दारुणं तिग्मं घोरं तीव्रोग्रमुल्कटम्॥८५॥ शीतकं तिमिरं याप्यं मन्दं विद्धि बिलं वितम्॥ सौहार्दं सौहृदं हृद्यं सौहृतं सख्य सौरभं॥८६॥ मैत्री मैत्रेयिकाजय्यं सहाय्यं संगतं मतम्॥ स्वभावः प्रकृतिः शीलं निसर्गो विश्वसो निजः॥८७॥ योगो गुणनिकाभ्यासः स्याद्भीक्ष्णं पुनर्मुहुः॥ मृषालीकं मुधामोघं वितथं विफलं वृथा॥८८॥ विधुरं व्यसनं कष्टं कृच्छ्रं गहनं मुदुरेत॥ समस्तं सकलं सर्वं कृत्स्नं विश्वं तथाखिलम्॥८९॥ शीकलं विकलं खंडं शल्कं लेशं कणं लवं॥ वैमेकोशश्च कलहः परिवादं कलनयेत॥९०॥ शोणितं लोहितं रक्तं रुधिरं सतजासृजम्॥ सन्तताना रता जस्रा न्वं दूकन्यापतिं वरं॥९१॥ उद्वाहः परिणयनं विवाहश्च विवेशनम्॥ शुषिरं विवरं रन्ध्रं छिद्रं गर्तं च गह्वरम्॥९२॥ श्वभ्रं रसं च पातालं नरकं पांत्यमेधसः॥ अदभ्रं भूरि भूयिष्ठं वहिष्ठं बहुलं बहु॥९३॥ प्रचुरं नैकमानन्त्यं प्राज्यं प्रभूतं पुष्कलं॥ भावो भवश्च संसारः संसरणं च संसृतिः॥९४॥

Interlinear glosses: तुषारस्य; तिलकस्य; कज्जलस्य; प्राकार; तस्य चारः इति; स्वाल्पस्य; सत्यस्य; कदल्याः; गजस्य; वर्तुलस्य; दीर्घस्य; तीक्ष्णस्य; अतीव; स्वभावस्य; पुनः पुनः नाम; कलहस्य; श्रोणि; रुधिरस्य; निरंतरस्य; विवाहस्य; नरकस्य; प्रचुरस्य

Left margin: बुद्धि; श्रयणाद्धि विधानम्

तत्वज्ञश्चतुरोधीरस्त्यजेज्जन्माजवंजवी॥ ऊर्ज्जस्यूर्ज्जस्वी
तरस्वीतेजस्वीचमनस्व्यपि॥९५॥ भास्करोभासुरःशूरःप्रवी
णःसुभटोमतः॥ उररीकृतमप्यूरीकृतमङ्गीकृतंतथा॥९६॥
अङ्गीकारोऽभ्युपगमःसत्यंकारःपणार्प्पणम्॥ तनुत्रंवर्म्म
कवचंमांगृत्तिर्बाणवारणम्॥९७॥ कूर्प्पासंकंचुकंछत्रमातपत्रं
स्मवारेणम्॥ केशंशिरोरुहंवालंकचंचिकुरमीरयेत्॥९८॥
चूडापाशंचधम्मिल्लंकवरीकेशवंधनम्॥ क्षेमंकल्याणमे
भयंश्रेयोभद्रंचमंगलम्॥९९॥ भावुकंभविकंभव्यंकुशलंशं
मंमास्त्रियाम्॥१००॥ वक्तावाचस्पतिर्यत्रश्रोताशक्रस्तथा
पितौ॥ शब्दपारायणस्यान्तंनगतौतत्रकेवयम्॥१॥ तथापि
किंचित्कस्मैचित्प्रतिबोधायसूचितम्॥ बोधयेत्किंपटुःकिंज्ञं
मार्गज्ञःसहयातिकिम्॥२॥ प्रमाणमकलंकस्यपूज्यपादस्य
लक्षणम्॥ द्विसन्धानकवेःकाव्यंरत्नत्रयमपश्चिमम्॥३॥
कवेर्धनंजयस्येयंसत्कवीनांशिरोमणेः॥ प्रमाणंनाममालेति
श्लोकानांचशतद्वयम्॥४॥ ब्रह्माणंसमुपेत्यवेदनिनदव्या
जात्तुषाराचलस्थानस्थावरमीश्वरंसुरनदीव्याजात्तथाके
शवम्॥ अप्यम्भोनिधिशायिनंजलनिधिध्वानापदेशादहो
फूत्कुर्वन्तिधनंजयस्यचभियाशब्दाःसमुत्पीडिताः॥१०५॥

॥इतिश्रीधनंजयकृतौनिघण्टुः॥ समाप्तः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीगणेशायनमः॥पाशांकुशप्रभृतिभूषणभूषितांगींसर्वांगर
म्यरमणीयविचित्रवेषां॥ब्रह्मादिसेवितपदांकमनीयरूपांदुर्गां
भजामिसततंत्रिपुरारिसेव्यां॥१॥ शब्दाबहुविधालोकेसंतिय
द्यपिविस्तरात्॥ तथापिकेचिद्गद्यंतेछात्राभावत्कहेतवे॥२॥
जातिशब्दाःक्रियाशब्दागुणशब्दास्तथापरे॥संज्ञाभेदाभवंत्य
त्रसंक्षेपादुच्यतेविधिः॥३॥गौरश्वःपुरुषोहस्तीशकुनिब्राह्मण
स्त्विति॥एधतेधयतेशेतेभवतीत्येवमादयः॥४॥रक्तःश्वेतो
र्बुदःकृष्णाएवंडित्थकपित्थवत्॥पुंसिकेचित्स्त्रियामन्येक्ली
बेकेचिदुदीरिताः॥५॥स्तनकेशवतीस्त्रीस्याल्लोमशःपुरुषःस्मृ
तः॥अनयोरंतरंयच्चतदुभेप्रोक्तंनपुंसकं॥६॥दृष्ट्वाजैमिनिकोश
सूत्ररचनांकात्यायनीयंमतंव्यासीयंकविशंकरप्रभृतिभिर्य
द्भाषितंनिश्चयात्॥यच्चानंदकविप्रवीररचितंबद्धूचयद्दंडिना
यद्वात्स्यायनशाश्वतादिकथितंकुर्वेऽभिधानाद्भुतं॥७॥माकुर्वं
तुभयंकरालकलितःप्रायःश्रुतेनाशनात्सर्वभ्रांतजनादनेकक
विता हीनप्रगल्भाश्रयात्॥ उद्धारंभवतोविधाय हृदयेभोभ्रात
रोयंमयाकर्त्तव्यःपरमोद्यमःश्रमविधेःशब्दात्कुतस्सीदथ॥८
किंपद्यभाररचनाभिरनेकवारंकिंवल्गनैःकिमिहदर्पपरीतवा
क्यैः॥यल्लभ्यतेकिलसमाधिविधेर्विधानात्किंतत्रविस्तरविवे
चनवाग्भिरर्थः॥९॥कोवेदशब्दजलधेरखिलस्यपारंसारंविधा
यविधिनामनसोविचारात्॥ शंबूकमर्कटझषादिभिरेवसंगः
प्रायोभवेदिहनरत्नमिलिःकदापि॥१०॥ यावान्कश्चित्रांतःशब्दो
त्रनपुंसकेहिवोद्धव्यः॥वर्जद्दिपुत्रमंत्रश्चित्रानेवंगरित्रंच॥११॥
यावानितिसमुच्चयोकश्चिदयत्रांतःशब्दःसनपुंसकेवोद्धव्यः॥
पुत्रमंत्रश्चित्रशब्दान्वर्जयित्वेत्यर्थःयथा॥सूत्रंशास्त्रंशास्त्रं
मित्रंपत्रंपवित्रंच॥गात्रंपोत्रंपात्रंदात्रंसत्रंपरित्रंचेत्यादि॥ अ
यंपुत्रःसुतःअयंमंत्रोहोमवाच्योवेदश्च हिशब्दोनुक्तसमु

For Private and Personal Use Only

च्चयार्थः॥तेनछत्रछात्रविष्णुमित्रादीनांपुंस्त्वप्राप्तेःसिद्धिः॥अयं
छत्रोनर्त्तकः आतपवारणवाचकस्यछत्रशब्दस्यनपुंसकतैव॥
इदंछत्रंवर्षातपवारणं॥अयंछात्रः॥अध्येता॥अयंविष्णुमित्रःकश्चि
त्पुरुषः॥यात्रामात्राभस्त्रादंष्ट्राविद्यास्त्रियांवरत्राच॥ईदूदंतम
च्चैकाच्शरद्दरदृषत्प्रावृषश्चैव॥१२॥यात्रामात्रादिकान्शब्दा
न्स्त्रियांस्त्रीलिंगेविद्याज्जानीयादित्यर्थः॥इयंयात्रातीर्थादि
गमनं॥इयंमात्राक्षरावयवस्तोकंच॥इयंभस्त्रालोहधमनी॥
इयंदंष्ट्रादशनविशेषः॥इयंवरत्रात्रिगुणीकृतारज्जुः॥वरत्रादी
नामपित्रांतत्वान्नपुंसकत्वप्राप्ते॥ब्रूमः॥त्रप्रत्ययाभावात्तद्वस्तु
भावादिति॥भावांतंत्रच॥भाववाचकाद्धातोस्त्रप्रत्ययःस्यात्॥
ईच्चऊच्चईदूतौतावंतेयस्यतदिदंशब्दरूपमीदूदंत अंतःशब्दः
प्रत्येकमभिसंबध्यते॥द्वंद्वांतेश्रूयमाणंपदंप्रत्येकमभिसंबध्य
तेइत्युक्तत्वात्॥एकोच्यस्यतत्एकाच्एकस्वरमित्यर्थः॥ई
दूदंतमच्चैकाच्स्त्रियांतच्छब्दरूपंभवति॥इयंस्त्रीयोषित्॥इ
यंश्रीदेवताविशेषःप्रभुशक्तिश्च॥इयंभ्रूरक्ष्णोरुपरिरेखा॥एका
जितिकिं॥सेनानीः॥ग्रामणीः॥शरदादयोपिस्त्रियां॥इयंशरत्
ऋतुविशेषः॥इयंदरत्ग्रीवास्थानं॥इयंदृषत्शिला॥इयंप्रा
वृट्जलधरसमयः॥चकारःसमुच्चयार्थः॥एवकारोवधारणे॥स्थू
णोर्णेस्त्रीयोगेस्तोगृहशशपूर्वकयोर्नपुंसकता॥सर्वस्याक्षिनाम्नो
जलनाम्नश्चैवमुक्तापः॥१३॥स्थूणोर्णइति॥स्थूणाचोर्णाचस्थूणो
र्णेस्त्रीयोगेस्तःस्त्रीलिंगेभवतइत्यर्थः॥इयंस्थूणाकाष्ठमयीद्धिकर्णि
का॥इयमूर्णामेषलोम॥तयोरेवस्थूणोर्णयोर्यथासंख्यंगृहशश
पूर्वकयोर्नपुंसकत्वं॥इदंगृहस्थूणं॥इदंशशोर्णं गृहशशपूर्वक
योरितिकिं॥इहमाभूत्इयंशालास्थूणा॥इयंमेषोर्णा॥सर्वशब्दोनि
विशेषवाची॥सर्वमक्षिनामजलनामचनपुंसकेभवति॥अक्षिना
मतावत्॥इदमक्षिलोचनं॥नेत्रंनयनंचक्षुर्दृगंबकमीक्षणादि॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जलपयोपद्इंजलंतोयंसलिलमंबुनीरंवार्वारिकाननमुदकंवन
मित्येवमादि॥जलशब्दत्वादप्शब्दस्यापिनपुंसकत्वंप्राप्नोतीत्या
हमुत्काप:अप्शब्दंवर्जयित्वेत्यर्थः॥अस्यहिस्त्र्यधिकारात्स्त्री
त्वं॥इमाआप:बहुवचनांतःसदैव॥जलकुसुमनामसर्वंनपुंसकं
स्यात्पद्मस्तुविभाषया॥अभ्रादृतेंबुदाख्यादिकेशनखदंतसंज्ञा
श्च॥१४॥जलकुसुमनामसर्वंनिर्विशेषंनपुंसकलिंगंभवति तद्यथा
॥इदंकमलंपंकजंकोकनदंकल्हारंकुशेशयमित्यादि॥जलकुसु
मद्वारेणनपुंसकत्वेप्राप्तेपद्मस्यविभाषाक्रियते॥इदंपद्मं॥अयंप
द्मइतिउक्तंच॥वसंतेशीतभीतेनकोकिलेनवनेरुतं॥अंतर्जल
गताःपद्माःश्रोतुकामाइवोत्थिताः॥ऋतेशब्दोवर्जनार्थेवर्त्तते
॥अभ्रशब्दमेकंवर्जयित्वाअंबुदामेघास्तेषामाख्यासंज्ञापर्याया
इत्यर्थःतेंबुदाख्याःशब्दाःपुंसिभवंतितद्यथा॥इमेअंबुदामेघाः
पयोधराघनजीमूताजलधरावलाहकाःकंधराइत्येवमादयः॥इ
मेकेशाः॥इमेदंताः॥इमेनखाः॥कंठस्तनबाहूनांसंज्ञाःपुंसिस्त्रि
यांभवेद्ग्रीवा॥पृष्ठललाटांशोदरजत्रूणिनपुंसकानिस्युः॥१५॥कं
ठसंज्ञाःस्तनसंज्ञाःबाहुसंज्ञाश्चपुंसिभवंति॥अयंकंठः॥गलइ
त्यादिः॥स्तनसंज्ञाश्च॥अयंस्तनःकुचःपयोधरइत्यादिः॥बाहु
संज्ञाश्चभुजस्तरणःधरणःचालनइत्यादिः॥कंठसंज्ञकत्वाद्ग्रीवा
शब्दस्यापिपुंसिप्रयोगःप्राप्नोतीत्याह॥स्त्रियांभवेद्ग्रीवा॥ग्रीवाश
ब्दस्यस्त्रीलिंगताभवति॥इयंग्रीवाशिरोधराकंधराइत्येवमादयः
॥पृष्ठादयःशब्दानपुंसकेस्युः॥तद्यथा॥इदंपृष्ठंपार्श्वयोर्पश्चिःइ
दंललाटंभ्रुवोरुपरिस्थानं॥इदमंशस्तनयोरुपरिस्थानं॥इदमुद
रंजठरः॥इदंजत्रुस्कंधसंबंधि॥इत्येवमादयः॥ऊर्म्मिध्वन्यंजल
यःपुंस्योष्ठकपोलगुल्फसंज्ञाश्च॥पक्षेरश्वकदोरवस्याहहुलमंध
कारश्च॥१६॥ऊर्म्मिश्चध्वनिश्चअंजलिश्चऊर्म्मिध्वन्यंजलयः॥
एतेशब्दाःपुंसिभवंति॥अयमूर्म्मिस्तरंगः॥अयंध्वनिःशब्दःअ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पमंजलिः करपुटः ओष्ठकपोलगुल्फसंज्ञाश्च संज्ञाशब्दः प्रत्येक
मभिसंबध्यते ओष्ठश्च कपोलश्च गुल्फश्च ओष्ठकपोलगुल्फा
॥ एतेषां संज्ञाः पर्यायास्ते पुंसि भवंति॥ अयमोष्ठः अधरदंतछ
दः अयंकपोलः गंड इत्येवमादयः॥ अयंगुल्फः पादग्रंथिः घुठः
घूंठ इत्येवमादयः घञ्चत्वरश्च ऋदोरप् पदरुजवेगस्पृशो घञि
त्येवमादिना प्रकरणे घञो विहित इति॥ येन विधिस्तदंतस्येति घ
ञ्प्रत्ययांताः शब्दाः पुंसि भवंति॥ तद्यथा॥ पादः रोगः वेगः स्पर्श
पाकः त्यागः योगः प्रसादः भेदः छेदः दाहः दोषः प्रकारविकार इ
त्येवमादयः॥ एरजिति॥ एरजइवर्णांतादच् प्रत्ययः स्यात्॥
अयंजयः नयः तथा ऋदोरप्॥ ऋवर्णांतादुवर्णांताच्च धातोरप
प्रत्ययः स्यात्॥ तत्र ऋवर्णांतात्॥ अयंकरः॥ वरः॥ भरः॥ शरः
नरः॥ इत्येवमादयः॥ उवर्णांतात्॥ अयंलवः॥ पवः॥ भवः इत्येव
मादयः॥ घञंतादंधकारशब्दस्यापि नित्यं पुंस्त्वं स्यादित्याह॥
बहुलमंधकारश्च॥ अंधकारो बहुलं पुंलिंगे भवति॥ विभाषा भ
वतीत्यर्थः॥ इदं अंधकारं॥ अयं अंधकारः॥ तथाचोक्तं॥ नेहाग
मोस्ति शलभस्य न मारुतस्य स्नेहक्षयोपि न भवेत्प्रथमे प्रदोषे
अव्यक्तवस्तुपुरुषप्रतिबोधितेन पारावतेन पतता कृतमंधका
रं॥ घ्राण्यंगमिदंतं बस्तिकुक्षिपाणीन्विमुच्य सर्वे स्त्री॥ जंघाशि
रास्नुषानासिकाचूडावसा चैव॥ १७॥ घ्राणो नाम वायुः सोस्यास्ती
ति घ्राणी तस्यांगं घ्राण्यंग इकारः अंते यस्य तदिदंतं॥ तत्सर्वं स्त्री
लिंगं भवति॥ तद्यथा इयं कटिः श्रोणिः अंगुलिः पंक्तिरित्यादि ब
स्तिकुक्षिपाणीनामपीदंतत्वाच्च स्त्रीत्वे प्राप्ते बाधः क्रियते॥ ए
तान्विमुच्य वर्जयित्वेत्यर्थः॥ पुंसीत्यधिकारात्तेषां पुंस्त्वमेव भव
ति॥ अयं वस्तिः नाभेरधः॥ अयं कुक्षिरुदरस्थानं॥ अयं पाणि
र्हस्त इति॥ जंघादयः शब्दाः स्त्रियां भवंति॥ इयं जंघा जानुनोर
धस्तात्॥ पादस्योपरिस्थाना॥ इयं शिरा देहधारिणी॥ इयं स्नुषा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रवधूः॥इयंनासिकागंधहारिणी॥इयंचूडाशिखा॥इयंवस
शोणितविकारः॥स्नेहश्च॥स्त्रक्स्रुक्स्फिक्त्वग्वाग्योषितो
द्दिवियास्त्रियांद्युनावौच॥दीधितिमेकामुत्क्रारश्म्यभिधानं
तुपुंस्येव॥१८॥स्त्रगादयःशब्दाःस्त्रियांभवंति॥तद्यथा॥इयंस्त्र
क्माला॥इयंस्रुक्यज्ञोपकरणभांडं॥इयंस्फिक्कटिप्रदेशः
॥इयंत्वक्बहिश्चर्म॥इयंवाक्वाणी इयंयोषित्बाला॥द्यौश्च
नौश्चद्युनावौचस्त्रियांभवतःइयंद्यौः स्वर्गः॥इयंनौः॥जलतरणिः
॥हिशब्दःपादपूरणेदीधितिमेकांवर्जयित्वारश्मिवाचकाःशब्दाः
पर्यायाश्चयेतेपुंसिभवंति॥तद्यथाइमेरश्मयःप्रग्रहाःकिरणाः
अंशवःपादाःमयूखाः॥अभीषवः॥गभस्तयः॥घृणयइत्येव
मादयः॥दीधितिशब्दःस्त्र्यधिकारात्स्त्रियांभवति॥इयंदी
धितिः॥तुशब्दःपादपूरणे॥मूर्द्धोक्षतक्षमज्जश्लेष्मात्माश्म
यूवपूषराजभीरहितं॥सर्वेह्यच्कंनांतंनपुंसकंपुंसिवाभवेद्ब्र
ह्म॥१९॥मूर्द्धन्उक्षन्तक्षन्मज्जन्श्लेष्मन्आत्मन्अश्म
न्युवन्पूषन्इत्येतैःशब्दैरहितंवर्जितंयदन्यत्ह्यच्कंहि
स्वरंच्नांतंप्रातिपदिकंतत्सर्वंनपुंसकंभवति॥यथाइदंच
र्मवर्मशर्मभस्मसद्मलोमइत्येवमादयः॥मूर्द्धादयोपिनांत
त्वात्द्व्यच्काअतस्तेषामपिनपुंसकताप्राप्नोति॥तदर्थमिति
प्रतिषेधःकृतःमूर्द्धोक्षतक्षेत्यादिपुंलिंगाधिकारात्पुंसिभ
वंति॥यथाअयंमूर्द्धाशिरः॥उक्षावृषभः॥मज्जासारः॥तक्षा
वर्द्धकिः श्लेष्माधातुविकारः॥आत्माशरीरस्थः॥अश्मानी
लः॥युवातरुणः॥पूषादित्यःपुंसिवाभवेद्ब्रह्मेति॥द्व्यच्कत्वा
न्नांतत्वाच्चब्रह्मशब्दस्यनपुंसकत्वेप्राप्तेपुंस्त्वंवाविधीयते
ब्रह्मशब्दोवानपुंसकलिंगोभवति॥इदंब्रह्मवेदाध्ययन
मीश्वरश्च॥अयंब्रह्माप्रजापतिः॥यद्येवंयत्द्व्यच्कंनांतंतन्न
पुंसकं॥एवंसतिराजन्शब्दस्यापिनपुंसकतास्यात्पुंस्यं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तर्भावोद्दृष्टल्यः॥१९॥ त्रुटिसीमसंध्यारात्रयः स्त्रियां धूलिवेणि
खार्यश्च॥ पुंसिनिशीथो ज्योत्स्नादयाशलाकास्त्रियां नित्यं॥२०
एतेशब्दाः स्त्रियां भवंति इयंत्रुटिः स्वल्पः॥इयं सीमाग्राममर्या
दा॥इयंसंध्यादिनावसानं॥इयंरात्रिः शर्वरी इयंधूलिः पांसुः॥इ
यं वेणी केशरचना॥इयंखारी परिमाणविशेषः निशीथशब्दः पुं
सिभवति॥अयंनिशीथोर्धरात्रः॥ज्योत्स्नादयाशलाकाः स्त्रियां
भवंति॥इयंज्योत्स्नाचंद्रप्रभा॥इयंदयाकरुणा इयंशलाकालो
हधमनी॥नित्यग्रहणंविभाषानिवृत्त्यर्थं॥पुंयोगेक र्णाहनूनपुं
सकेश्मश्रुजानुगुदशब्दाः एकाभिधानतास्यादस्राश्रुणोर्नित्यं॥
॥२१॥ पुंसोयोगः पुंयोगः तस्मिन् कर्णहनूभवतः॥यथाअयंकर्णःश्रो
त्रंकुंतीपुत्रश्च हनुःकपोलप्रदेशः॥श्मश्रुजानुगुदशब्दाः नपुंसकेभवं
ति॥इदंश्मश्रुमुखैकदेशरोमराजिः इदंजानुजंघामध्यस्थानं।
इदंगुदमपानं॥अभिधीयतेऽनेनेत्यभिधानंएकंचतदभिधानं
चतस्यभावः एकाभिधानतास्यात्भवेदित्यर्थः॥अस्राश्रुणो
र्नित्यंनपुंसकताभवति॥इदमस्रं॥इदमश्रु॥नयनजलमिति॥
एकएवार्थःनित्यवचनंपूर्ववत्॥२१॥ घुसकिरुपसर्गपूर्वःपुंस्य
न्योपपदेवेषुपूर्वःस्त्री॥येभ्योनञ्तान्पुंस्युक्तान्याञ्चाविनावि
द्धि॥२२॥ घुइति॥ दाधाघ्वदाविति षण्णां धातूनां घुसंज्ञा विहिता
॥सहकिनावर्ततइति सकिः उपसर्गेघोःकिरित्यादिना विहितःकि
प्रत्ययोगृह्यते उपसर्गाप्रादयः॥उपसर्गाःक्रियायोगइति॥उप
सर्गःपूर्वोयस्य सएवपुंलिंगोभवति॥यथाअयमादिनिधिः॥प्रणि
धिः आधिःसन्निधिः॥इत्येवमादयः॥ अन्योपपदकर्मण्यधि
करणेचेतिकिप्रत्ययः॥अयमंभोधिः॥जलधिःउदधिःतोयधिः
शरधिः इत्येवमादयः॥इषुशब्दोपपदेवास्त्री॥इयमिषुधिः॥
अयमिषुधिः॥तूणीरंयेभ्योधातुभ्योनञ्प्रत्ययः॥तान्पुंस्युक्ता
न्विद्धिजानीहि॥यांचशब्दंवर्जयित्वा॥यज याच यत विछ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रष्ठ॥रक्षोनङितिनङुप्रत्ययः॥अयंयज्ञः॥यत्नः॥विष्णुः॥प्र
ष्णः॥रक्ष्णः एवंतर्हियांचशब्दस्यापिनङंतत्वान्नपुंस्त्वंस्यात्
॥इत्यतआह॥यांचोविनेति॥स्त्र्यधिकारात्स्त्रीयांचार्थन॥२२
तनुकायशरीराणिस्त्रीपुन्नपुंसकेषुजानीहि॥दधिसक्थ्य
स्थीनिस्युर्नपुंसकेस्त्रीतुकक्षास्यात्॥२३॥एतान्शब्दान्यथा
संख्यंस्त्रीपुन्नपुंसकेषुविद्धि॥इयंतनुः॥अयंकायः॥इदंशरीरं
॥दधिसक्थ्यस्थिशब्दानपुंसकेस्युः॥यथाइदंदधि॥क्षीरविका
रः॥इदंसक्थिउर्वोर्मध्यं॥इदमस्थिकीकसं॥कक्षाशब्दःस्त्रियां
भवेत् यथाइयंकक्षाबाहुमूलं॥अन्यच्च॥जघनाभरणेस्त्रीणां
करीणांमध्यबन्धने॥अवस्थासुचहर्म्याणांनित्यंकक्षाव्यव
स्थिता॥२३॥सुमनोप्सरोविरहितमद्यच्कमसंतंतुपुंसिस्यात्॥
द्यच्कंपुनर्नपुंसकप्रकृतात्न्यत्रवैजरसः॥२४॥सुमनस् अप्सरस्
इत्येताभ्यांविरहितमुज्झितमित्यर्थः॥असअंतेयस्यतदिदमसं
तंपुंसिभवेदित्यर्थः॥अयमंगिराःचंद्रमाःस्थूलशिराः॥पुरूरवाः
॥उच्चैश्रवाः।दुर्वासाः॥वृषुपशादयादयः॥सुमनसोप्सरसश्च
स्त्र्यधिकारात्स्त्रियांप्रवृत्तिः॥इमाःसुमनसः कुसुमानि॥इमाअ
प्सरसोदेवस्त्रियः॥द्व्यच्कमसंतंनपुंसकंभवति।इदमोजःतेजः
वर्चःशिरःयशःछंदःश्रोतःचेतःपयः॥तपःअंभःजरस्शब्दस्या
पिनपुंसकतास्यादित्यतआहान्यत्रवैजरसः॥नपुंसकात्प्रकृता
च्चपुल्लिंगादन्यस्मिन्जरस्शब्दोभवति॥स्त्रियां॥इयंजरावृद्ध
भावः॥२४॥पुंसिक्षुरखुरबिंदुक्षुपायुमणिकीलकेलिवलयः॥नि
घसंघोद्घोपघ्नोपविघ्नघमार्घवर्णाश्च॥२५॥एतेशब्दापुंसिभवं
ति॥तद्यथा॥अयंक्षुरः॥नापितोपकरणः अयंखुरःपशुपादः॥
अयंबिंदुःविसर्जनीयावयवः॥अन्यच्च॥अयमिक्षुस स्यजातिः
॥अयंपायुःअपानं॥अयंमणिः॥रत्नंकीलःशंकुः प्रहरणविशेष
॥अयंकेलिः॥हासः॥अयंकलिः॥कलहः॥अयंवलिर्दैत्यः॥ए

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगृह्यदेवतोपहारौच॥निघादयःशब्दाःपुंसिभवंति॥अयंनिघः
पर्वतः॥अयंसंघःसमूहः अयमुद्घः प्रशस्तः॥अयमुपघ्नआश्र
यः॥पर्वतश्च॥अयमोघोनदीवेगः॥पुरुषारंभश्च॥विघ्नःकर्मनि
घातः॥घर्मोनिदाघः॥अर्घःपूजामूल्यविशेषः॥वर्णोहरितपीता
दिः॥ब्राह्मणादिः॥अकारादीनिचाक्षराणि॥२५॥पणगुणगण
कणशोणाःकिणफणघुणशाणबाणचूर्णाश्च॥निःपंदिपुंसिपं
थावाष्पोष्माध्वानश्चविज्ञेयाः॥२६॥पणादयःशब्दाःपुंसिभवंति
॥अयंपणोविंशतिगंडकः॥अयंगुणःसंख्याख्यःशुक्लादिपाटला
दिश्चअयंगणःसंघातःअयंकणःपरमाणुः॥शोणोनदः॥किणोनि
कषः फणोभुजंगफणः घुणःकीटविशेषः॥शाणःपाषाणविकारः॥
बाणःशरः असुरःघृष्टिकाच॥अयंचूर्णःशकलःखंडइत्यर्थः॥अ
यंपंथामार्गः॥अयंबाष्पोश्रु॥अयमूष्माघर्मः॥अयमध्वामार्गः
नित्यग्रहणंविभाषानिरस्यर्थं॥२६॥ ॥नपुंसकेश्वभ्रतृणरणार्णा
नि॥वीणातूणाघोणाघृणास्तुनियतंस्त्रियांविद्यात्॥२७॥एते
नपुंसकलिंगेभवंति॥इदंश्वभ्रंगर्त्तः॥इदंतृणंगृहछादनद्रव्यवि
शेषःरणंयुद्धं॥ऋणमुद्धारः॥अधमर्णश्चएतान्शब्दान्स्त्रि
यांनियतंनिश्चितंविद्यात्॥इयंवीणावाद्यविशेषः॥तूणाइषु
धिः इयंघोणानासिका॥ इयंघृणादयाबुद्धिः॥तुशब्दः॥पादपूर
णे॥२७॥ यदनांतमकर्त्तरितन्नपुंसकेविद्यानिःस्त्रियामेव॥पौ
भावेऽणापौतोपुंस्युक्तौमन्युमृत्यूच॥२८॥ अनअंतेयस्यतदि
दमनांतंअकर्त्तरिअनप्रत्ययांतंयत्प्रातिपदिकंतन्नपुंसकेवि
द्धिजानीहि॥नपुंसकाद्भावेक्त इत्यत्र वर्त्तमानेल्युड्वेतिल्युट्॥यु
वोरनाविस्यनादेशः वचनं॥भजनंभाजनं॥पानं॥आसनं॥प्रया
णं॥शासनं॥अधिकरणमित्यादि॥अकर्त्तरीतिकिं॥नंद्यादिभ्यो
ल्युट्॥नंदनः॥मरणःमदनः॥कुलनः॥शातनः॥दमनः॥संकर्ष
णः॥मधुसूदनःजनार्दनइत्यादि॥अनिःस्त्रियामेव॥एवका

For Private and Personal Use Only

रोवधारणार्थः आक्रोशेन ज्यनिः ।यथादूयमंभोजनिःअकारणि
अहरणिः अ खा दनिः॥अशरणिरित्येवमादिः॥अणचअध्वअ
णायौ यौतौपुंस्युक्तौ॥णौअणचेत्यणप्रत्ययः।त्यागः।उपदेश
उपसर्गःइत्यणप्रत्ययः॥निघःपर्वतः॥किंचान्यौमन्युमृत्यू
पुंसिभवतः॥अयंमन्युर्दयाशोकश्चमृत्युर्नाशः॥२७॥ पट
पुटकटघटचेंटवाटजूटवटाद्हिपुंस्युक्ताः॥अवटखटपट्टकि
राटकीटाश्चकूटतटयोश्चनपुंसकता॥२८॥एतेपटादयःश
ब्दाःपुंसि भवंति॥अयंपटःप्रावरणः॥पुटःपत्रस्य॥कटस्तृण
स्य॥कटोगजकुंभश्चघटःकलशः॥चेंटःफलनिबंधनं॥वाटःमार्ग
जूटःकेशबंधनं॥वटोवृक्षविशेषः॥अवटःकूपः॥खटःशिरसिप्रहा
रः॥पट्टःराजप्रसादः॥किराटोवणिक्॥कीटःकृमिः॥कूटतटशब्दौ
नपुंसकेभवतः॥इदंकूटंद्रव्यस्थानं॥इदंतटंनदीकूलं॥२८॥ घंटाज
टासटानांप्रथमाप्रकृतिर्वसाशिफानांचस्वर्नाम्नांपुंयोगस्त्रिविष्ट
पंस्यादुभयहीनं॥२९॥एतेघंटादयःशब्दास्त्रियांभवंति॥प्रथमा
कृतिःस्त्रीलिंगमित्यर्थः॥इयंघंटावाद्यविशेषः॥इयंजटाकेशविन्या
सः॥इयंसटाकेशरः॥इयंवसामेदः॥इयंशिफाकंदः॥अयंस्वर्गः
नाकः॥अयंत्रिदिवःस्वर्गादिनामत्वात्पुंस्त्वंत्रिविष्टपस्यप्राप्तौती
त्यतआह॥त्रिविष्टपंस्यादुभयहीनं॥नस्त्रीनपुमानित्यर्थः॥इदं
त्रिविष्टपंस्वर्गः॥२९॥ संवत्सरगिरिमासार्णवर्तुदेवासुराभिधानानां
॥नित्यंपुं योगःस्याच्छरासिपंकारिनाम्नांच॥३०॥अभिधानशब्दः
प्रत्येकमभिसंबध्यते॥संवत्सराभिधायिनांशब्दानांसंवत्सरपर्या
याणांच॥गिर्यादिपर्यायाणांच॥पुंयोगःस्यादित्यर्थः॥ तद्यथा॥अ
यंसंवत्सरःहायनोब्दइत्यादि॥अयंगिरिःपर्वतःधरशैलइत्यादि॥मा
साभिधायिनां॥अयंमासः॥हूपसः॥ मासविशेषोपिपुंसि॥अयंचैत्रः
वैशाखःज्येष्ठःआषाढइत्यादि॥अर्णववाचिनां॥अयमर्णवः॥ समु
द्रःसागरःपारावारः सरित्पतिरित्यादि॥अयमृतुःवसंतः॥ग्रीष्मः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देववाचिनां॥देवःसुरः॥असुरवाचिनां॥असुरः दैत्यःशराभिधा
यिनांशरःकांडः॥अयमसिःखड्गःमंडलाग्रः॥ अयंपंकः कर्दमः
जंबालः॥ अयमरिःशत्रुःवैरी॥रिपुः॥विपक्षइत्यादि॥३०॥ भाक्क
लुकशारज्जिवष्टकाश्च नित्यंस्त्री यामी वि का द॥विद्युद्दिग्भूम्यभि
धानंवल्लीसरितांचविज्ञेयं॥३१॥ एतेशब्दाःनित्यंस्त्रियांभवंति॥
इयंभाः॥दीप्तिः॥कलुःपामा॥कशादनीरज्जुःकुप्रामयी॥इष्टका
पकमृत्तिका॥दधिकावीरणशलाका॥कंष्टिकाच॥विद्युदादीना
मभिधानंस्त्रियांभवति यथाइयंविद्युत्तडित्॥चंचला॥शतह्र
दाक्षणप्रभासौदामिनी॥ऐरावतीत्यादि॥दिगभिधानं॥आशा॥
काष्ठाककुप्॥विदिगित्यादयः भूम्यभिधानं॥इयंभूमिः॥धरार
सा॥पृथ्वीक्ष्माक्ष्मादित्यादिः॥वल्ल्यभिधानं॥इयंवल्ली॥व्रततिः
प्रतानिनीइत्यादयः॥सरिदभिधानं॥इयंसरित्॥नदीकुल्यास्र
वंतीनिम्नगातटिनीत्यादयः॥३१॥ छायासुरानिशावालुकाःस्त्रि
यांस्युश्चमूकंथेशश्च॥आपत्संपद्विपत्प्रतिपत्समिद्विपुषश्चैव॥
३२॥ छायादयःशब्दाःस्त्रियांस्युर्भवेयुरित्यर्थः॥यथाछायावृ
क्षादेः प्रतिबिंबः॥सुरामदिरानिशारात्रिः॥वालुकासिकताचमूः
सेना॥कंथाप्रसिद्धा॥इराजलभूमिः॥एतेशब्दाःस्त्रीलिंगेभवं
ति॥यथाइयमापत्व्यसनं॥संपद्धनं॥विपत्दुःखं प्रतिपत्तिथि
विशेषः॥समित्काष्ठं॥विप्रुट्बिंदुः॥३२॥ कुशकूबरकुंजांकुरकु
ठारकुंदकुतुपाहिपुंस्युक्ताः॥कुलकूलकुंकुमानिनपुंसकान्ये
वजानीयात्॥३३॥एतेशब्दाःपुल्लिंगेउक्ताः॥यथायंकुशः॥दर्भः
॥अयंकूबरोरथस्कंधः॥कुंजोगहनः॥अंकुरोबीजप्रादुर्भावः॥कु
ठारःपरशुः॥कुंदपुष्पजातिःकुतुपश्चर्मपात्रं॥एतानिनपुंसका
निजानीयात्॥एवकारोवधारणे॥इदंकुलंब्राह्मणानां॥कुलंन
दीतटं॥कुंकुमंकाश्मीरं॥३३॥लोहसुखपर्णवनधनसंज्ञाश्चन
पुंसकेप्रोक्ताः॥शीराद्यर्थेपुंस्युक्तावटवीतूक्तास्त्रियामेव॥३४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संज्ञाशब्दःप्रत्येकमभिसंबध्यते॥लोहादिसंज्ञानपुंसकेभवं
ति॥इदंलोहमायसं॥मुखंलपनंतुंडमाननमित्यादि॥इदंपर्णंप
लाशमित्यादि॥वनंविपिनंकाननमित्यादि॥इदंधनंद्रविणंवस्वि
त्येवमादि॥शीरार्थौशब्दोपुंसिभवतः॥अयंशीरोलंकारः॥अर्थो
द्रव्यं॥अटवीतूक्तास्त्रियामेव॥इयमटवीवनं॥३४॥राशिपलां
डुकमंडलुगडुतूलमुहूर्त्तपरशुशंकूनां॥दृतिसीधुकंकटानांपुंसि
चगदितःप्रयोगोहि॥३५॥एषांप्रयोगःपुंसिगदितःकथितः॥रा
शिर्धान्यादीनां॥पलांडुर्लसुनजातिः॥कमंडलुःकाष्ठमयंजल
पात्रं॥गडुःकुब्जं॥तूलःकार्पासादेः॥मुहूर्तोद्वादशात्मकः॥पर
शुर्वृक्षभेदीः॥शंकुःचिन्हंकिलश्च॥दृतिश्चर्म॥अयंसीधुःसुरा॥अ
यंकंकटोहस्तिकवचं॥३५॥शालामालादोलावेलाफेलाशिला
तुलालीला॥सेनापालिबलिद्रुवागुराश्चस्त्रियामुदिताः॥३६॥एते
स्त्रीलिंगेउदिताःकथिताः॥इयंशालागृहविशेषः॥मालास्रक्॥
दोलाक्रीडासाधनं॥वेलाकूलंसमुद्रस्य॥फेलाभक्तोछिष्टं॥धा
नाश्चशिलाअश्मा॥तुलापलशतानुमानं॥लीलाअतिरसकोविद
श्वसेनाहस्त्यश्वपदातिसमुदायः॥पालिःपंक्तिप्रदेशः॥बलिःक
रःउपहारः॥दद्रुःकुष्टविशेषःवागुरामृगबंधनीरज्जुः॥३६॥पा
तालजालमलखलकपालशैवालशीलनालानिचीरचीवरविपं
तिचविद्धितृतीयाप्रकृतिकानि॥३७॥एतेषांतृतीयाप्रकृतिःतृती
यास्थानेनपुंसकस्यदृष्टत्वात्पातालादीनितृतीयाप्रकृतीनिवि
द्धिजानीहि॥यथाइदंपातालंरसातलंजालंमत्स्यबंधनंगवाक्षश्च
॥मलं॥पापं॥खलंमर्दनस्थानंव्रीहीणांकपालंमस्तकास्थि॥खंडंच
शैवालंजलसंभवं॥शीलंविनयनालंपद्मादीनां॥चीरंजीर्णवस्त्रं
॥चीवरंभिक्षाप्रावरणं॥वियदाकाशं॥३७॥मुंडनितंबक्षपगुल्म
सान्वंकवंशपूगशंखरथाश्चपुंसिस्युः॥जघनांबरफलमूलांगा
नितुविमुच्य॥३८॥एतेशब्दाःपुंसिस्युः॥अयंमुंडोमुंडितशिराः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नितंबः पश्चाद्भागः स्त्रीकट्याः॥ ह्रस्वशाखामूलकोवृक्षः स्पः॥
गुल्मः शाखापत्रप्रावरणः सानुः पर्वतैकदेशः॥ अंकश्चिन्हं॥ वेशो
न्वयः॥ पूगः क्रमुकः॥ शंखः कंबुः रथः स्पंदनः॥ नपुंसकाधिकारात्
जघनादयो नपुंसके स्युः इदं जघनं कटिप्रदेशः॥ अंबरमाकाशं व
स्त्रं च॥ फलं वृक्षादीनां॥ मूलं शिफा॥ अंगमवयवः॥ ३८॥ क्षीरोद
श्विन्नवनीतवर्षकुंडांडघृतभगगगनानि॥ विद्यान्नपुंसकान्यो
दनश्च पुंसि स्त्रियां न्पाच॥ ३९॥ एतानि नपुंसकानि स्युः॥ यथा इ
दं क्षीरं दुग्धं॥ इदमुदश्वित्तक्रविशेषः नवनीतं दधिविकारः॥ व
र्षं संवत्सरः॥ कुंडं पेयादिपात्रं॥ अंडं बीजादिप्रादुर्भावः॥ घृतमा
ज्यं॥ भगं योनिः॥ गगनमाकाशं॥ ओदनस्तु॥ पुंसि भवति॥ अय
मोदनः॥ भक्तं स्त्रियां न्पाच॥ धनुषो गुणः॥ ३९॥ विषसंज्ञाः पुं
सि विषं तु नपुंसकं स्यात् स्त्रियां तिथिर्वोक्ता॥ अतिथिस्तु पुंसि शकृ
न्नीतशोणितानीतरप्रकृतौ॥ ४०॥ विषसंज्ञाः पुंसि भवंति॥ हाला
हलः॥ कालकूटः ब्रह्मपुत्रः॥ विषं नपुंसकं॥ इदं विषं सर्पशरीरजं
च॥ तिथिशब्दो वा विभाषया स्त्रीलिंगे भवति पुंलिंगश्च॥ यथा इयं
तिथिः॥ अयं तिथिः अतिथिशब्दः पुंसि भवति॥ अयमतिथिरभ्या
गतः॥ शकृदित्यादीनीतरप्रकृतौ नपुंसके भवंति॥ इदं शकृत् पुरी
षं नीतं धृतं॥ शोणितं रुधिरं॥ ४०॥ मुक्त्वा दिनाहनी दिवसनामा
नि पुंसि स्त्रियां त्विड्डुताराः पाणिगृगः पुंस्यक्तः स्त्रियां समाश्चै
व वर्षाश्च॥ ४१॥ दिनाहनी मुक्त्वा अन्ये दिवसपर्यायाः पुंसि भवंति
अयं दिवसो वासरः घस्रः सूर्यकर इत्यादि॥ दिनाहनी नपुंसके
भवतः इदं दिनमहः॥ स्त्रियां त्विड्डुताराः त्विडादयः शब्दाः स्त्रि
यां भवंति॥ इयं त्विट् कांतिः॥ इयमुडुर्नक्षत्रं॥ इमास्ताराः नक्षत्रा
णि॥ पाणिगृगः पुंसि भवति॥ अयं पाणिगृगः॥ पाणिगृग्रहणम
न्यगृगनिवृत्त्यर्थं॥ ४१॥ भवति नपुंसकयोगः संख्यापूर्वस्य रात्रि
शब्दस्य॥ ससमासस्य तु तस्यैव पुंसि योगं न जानीयात्॥ ४२॥ ९

For Private and Personal Use Only

